1

ब्र० श्रीगुरुभ्योनमः॥ श्रीरामवेदव्यासायनमः॥ हरिः ॐ॥ ॥ नारायणंगुणैःसर्वैरुदीर्णंदोषवर्जितं॥ ज्ञे भा०
१ यंगम्यंगुरूंश्चापिनत्वासूत्रार्थउच्यते॥ १॥ द्वापरेसर्वत्रज्ञानानांकुलीभूतेतन्निर्णयायब्रह्मरुद्रेंद्रादिभिरर्थितोभ अ०
गवान्नारायणोव्यासत्वेनावततार॥ अथेशनिरगमापिपरिहारेच्छूनांतद्योगमविजानतांतत्साफल्यार्थंवेदमुत्सन्नं
ति व्यंजयंश्चतुर्धाव्यभिजत्॥ चतुर्विंशतिधैकशतधासहस्रधाद्वादशधाच॥ तदर्थनिर्णयायब्रह्मसूत्राणिचकार॥
तथोक्तंस्कांदेनारायणाद्विनिष्पन्नंज्ञानंकृतयुगेस्थितं॥ किंचित्तदन्यथाजातंत्रेतायांद्वापरेखिलं॥ गौतमस्य
१ ऋषेःशापाज्ज्ञानेत्वज्ञानतांगते॥ संकीर्णबुद्धयोदेवाब्रह्मरुद्रपुरस्सराः॥ शरण्यंशरणंजग्मुर्नारायणमनामयं॥
तैर्विज्ञापितकार्यस्तुभगवान्पुरुषोत्तमः॥ अवतीर्णोमहायोगीसत्यवत्यांपराशरात्॥ उत्सन्नान्भगवान्वेदा ना
नुज्जहारहरिःस्वयं॥ चतुर्धाव्यभजत्तांश्चचतुर्विंशतिधापुनः॥ शतधाचैकधाचैवतथैवचसहस्रधा॥ कृ
ष्णोद्वादशधाचैवपुनस्तस्यार्थवित्तये॥ चकारब्रह्मसूत्राणियेषांसूत्रत्वमंजसा॥ अल्पाक्षरमसंदिग्धंसा १
रवद्विश्वतोमुखं॥ अस्तोभमनवद्यंचसूत्रंसूत्रविदोविदुः॥ निर्विशेषितसूत्रत्वंब्रह्मसूत्रस्यचाप्यतः॥ यथा

व्यासवृत्रमेकस्य कृष्णस्यान्ये विशेषणात्॥ सविशेषणसूत्राणि ह्यपराणि विदो विदुः मुख्यस्य निर्विशेषणश ष
ब्दोन्येषां विशेषतः॥ इति वेदविदः प्राहुः शब्दतत्त्वार्थवेदिनः॥ सूत्रेषु येषु सर्वेपि निर्णयाः समुदीरिताः॥ शब्द
जातस्य सर्वस्य यत्प्रमाणश्च निर्णयः॥ एवंविधानि सूत्राणि कृत्वा व्यासो महायशाः॥ ब्रह्मरुद्रादिदेवेषु मनु
ष्यपितृपक्षिषु॥ ज्ञानं संस्थाप्य भगवान् क्रीडते पुरुषोत्तम इत्यादि॥ ॐ॥ अथातो ब्रह्मजिज्ञासा॥ ॐ॥ १
१ अथशब्दो मंगलार्थोधिकारानंतर्यार्थश्च॥ अतःशब्दो हेत्वर्थः॥ उक्तं च गारुडे॥ अथातः शब्दपूर्वाणि सूत्राणि नि
खिलान्यपि॥ प्रारभंते नियत्यैव तत्किमत्र नियामकं॥ कश्चार्थश्च तयोर्विद्वन् कथमुत्तम तातयोः॥ एतदाख्याहि थो
मे ब्रह्मन् यथा ज्ञास्यामि तत्त्वतः॥ एवमुक्तो नारदेन ब्रह्मा प्रोवाच सत्तमः॥ आनंतर्येधिकारस्य मंगलार्थे तथैव त
च अथशब्दस्त्वतःशब्दो हेत्वर्थे समुदीरितः॥ परस्य ब्रह्मणो विष्णोः प्रसादादिति वा भवेत्॥ स हि सर्वमनोवृत्ति
प्रेरकः समुदीरितः॥ सिसृक्षोः परमाद्विष्णोः प्रथमं द्वौ विनिसृतौ॥ ॐकारश्चाथशब्दश्च तस्माद्ब्राह्मणकौ क्र थाँ
मात्तत्रैव तुर्यं वदंश्चापि वतीयोन उदाहृतः॥ अकारः सर्ववाग्रूपः परब्रह्माभिधायकः॥ तथौ प्राणात्मको प्रोक्तौ
व्याप्तिस्थिति विधायकौ॥ अतश्च पूर्वमुच्चार्यौ सर्व एते सतां मताः॥ अथातःशब्दयोरेवं वीर्यमाज्ञाय तत्त्व

ब्र० तः॥सूत्रेषुतुमहाप्राज्ञास्तावेवादौप्रयुंज्यतइति॥अधिकारश्चोक्तोभागवततंत्रेमंदमध्योत्तमत्वेनत्रिविधाह्य भा०
१ धिकारिणः॥तत्रमंदामनुष्येषुयउत्तमगणामताः॥मध्यमाऋषिगंधर्वादेवास्तूत्तमामताः॥इतिजातितोमं १
दस्तथान्योगुणपूर्वकः॥भक्तिमान्परमेविष्णौयस्त्वध्ययनवान्नरः॥अधमःशमादिसंयुक्तोमध्यमःसमुदाहृतः॥
आब्रह्मस्तंबपर्यंतमसारंत्वाप्यनित्यकं॥विज्ञायजातवैराग्योविष्णुपादैकसंश्रयः॥सउत्तमोऽधिकारीस्यात्संन्यस्ता
२ खिलकर्मवानिति॥अध्ययनमात्रवतोऽप्यविशेषादितिचपरे॥शांतोदांतउपरतस्तितिक्षुःसमाहितोभूत्वात्मन्येवा
त्मानंपश्येत्॥परीक्ष्यलोकान्कर्मचितान्ब्राह्मणोनिर्वेदमायान्नास्त्यकृतःकृतेन॥तद्विज्ञानार्थंसगुरुमेवाभि
गच्छेत्समित्पाणिःश्रोत्रियंब्रह्मनिष्ठं॥यमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्माविवृणुतेतनुंस्वां॥यस्यदेवेपराभ
क्तिर्यथादेवेतथागुरौ॥तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइत्यादिश्रुतिभ्योव्योमसंहितायांच॥अंत्यजाअपिये
भक्तानामज्ञानाधिकारिणः स्त्रीशूद्रब्रह्मबंधूनांतंत्रज्ञानेऽधिकारिता॥एकदेशेपरोक्तेतुनतुग्रंथपुरःसरे॥त्रैवर्णि २
कानांवेदोक्तेसम्यग्भक्तिमतांहरौ॥आहुरप्युत्तमस्त्रीणामधिकारंतुवैदिके॥यथोर्वशीयमीचैवशच्याद्याश्चतथा
पराइति॥यतोनारायणप्रसादमृतेनमोक्षः॥नचज्ञानंविनाअत्यर्थप्रसादः॥अतोब्रह्मजिज्ञासाकर्तव्या॥यज्ञान

वसरोऽन्यत्रपदंतत्रप्रतिष्ठितं ॥ वाक्यंचेतिसतांनीतिःसावकाशोऽनतत्स्वेदितिबृहत्संहितायां ॥ तमेवंविद्वानमृत
इहभ०। वतिनान्यःपंथाअयनायविद्यते ॥ प्रियोहिज्ञानिनोयर्थमिहंसचममप्रियः ॥ उदाराःसर्वएवैतेज्ञानी
त्वात्मैवमेमतं ॥ यमेवैषवृणुतेतेनलभ्यः ॥ आत्मावारेद्रष्टव्यःश्रोतव्योमंतव्योनिदध्यासितव्यइतिश्रुतिस्मृ
तिभ्यः ॥ कर्मणाद्वधमःप्रोक्तःप्रसादःश्रवणादिभिः ॥ मध्यमोज्ञानसंपत्त्याप्रसादस्तूत्तमोमतः ॥ प्रसादादध
धमाद्विष्णोःस्वर्गलोकःप्रकीर्तितः ॥ मध्यमाज्जनलोकादिःउत्तमेस्वेवमुक्तिदः ॥ श्रवणंमननंचैवध्यानं
भक्तिस्तथैवच ॥ साधनंज्ञानसंपत्तौप्रधानंनान्यदिष्यते ॥ नचैतानिविनाकश्चिद्ज्ञानमापकुतश्चनेतिनार
दीये ॥ ब्रह्मशब्दश्चविष्णावेवमंतःसमुद्रेकवयोवयंतीतियदक्षरेपरमेप्रजाःयतःप्रसूताजगतःप्रसू
तीतोयेनजीवान्व्यससर्जभूम्यामित्युक्त्वातदेवतत्तदुसत्यमाहुस्तदेवब्रह्मपरमंकवीनामितिहिश्रुतिः ॥ त
त्वोविष्णुरितिवचनाद्विष्णुरेवतत्रोच्यते ॥ नचेतरशब्दात्तत्प्राप्तिः ॥ नामानिविश्वाभिनसंतिलोकेयदावि
रासीदन्नतस्यसर्वं ॥ नामानिसर्वाणियमाविशंतितंवैविष्णुंपरममुदाहरंतीतिभाल्लवेयश्रुतिः ॥ योदेवा

३

प्र० हि

ब्र० १ नां नामधा एक एव तं संप्रश्नं भुवना यंत्यन्या इत्येवशब्दादन्येषां सर्वनामता ॥ अजस्य नाभावध्येकम भा०
र्पितं यस्मिन्विश्वानि भुवनानि तस्थुरिति विष्णोर्लिंगं ॥ न च प्रसिधार्थं विना ऽन्योर्थो युज्यते ॥ अजस्य ६
नाभावितियस्य नाभेरजभूद्यतः पुष्करं लोकसारं तस्मै नमो व्यस्तसमस्तविश्वविभूतये विष्णवे लोकक
र्त्रे इति स्कांदे ॥ परो दिवा पर एना पृथिव्येति समाख्या श्रुतौ ॥ यं कामये तं तमुग्रं कृणोमि तं ब्राह्मणं तमृषिं
२ तं सुमेधामिति सुक्ते ममयोनिरप्स्वंतः समुद्र इत्युक्तेः ॥ उग्रो रुद्रः समुद्रं तन्नारायणः प्रसिद्धत्वात् सूचि
सा तत्वाच्चार्थस्य ॥ न चाविरोधे प्रसिद्धिः परित्यज्यते ॥ उक्तन्यायेन श्रुतय एतमेव वदंति ॥ वेदे रामायणे चै च
व पुराणे भारते तथा ॥ आदावंते च मध्ये च विष्णुः सर्वत्र गीयत इति तु विशेषः ॥ न चैतदग्रंथे
विरोधः ॥ एष मोहं सृजाम्याशु यो जनान्मोहयिष्यति ॥ त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय ॥ अ ३
तथ्यानि वितथ्यानि दर्शयस्व महाभुज ॥ प्रकाशं कुरु चात्मानमप्रकाशं च मां कुरु इति वाराहवचनात् ॥

५ थ

शैवेचस्कांदे॥ पचाद्दपिकल्पेह्यहंब्रह्मेशानादयःसुराः॥तदैवाच्युतयांसेवयदेवहंपराङ्मुखइति॥ब्राह्मे

चब्रह्मवैवर्ते॥ नाहंचैनशिवोन्येचतच्छक्त्यैकांशभागिनः॥बालःक्रीडनकैर्यद्वत्क्रीडतेस्माभिरच्युतः॥ न ३ ति॥

चवैष्णवेषुतथा॥ तच्छैषमोहमिसुच्चकं॥ब्रह्मसूत्रोलक्षणामाह॥ ॐ जन्माद्यस्ययतः॥ ॐ॥ सृष्टिस्थितिसं

हारनियमनज्ञानाज्ञानबंधमोक्षायतः॥उत्पत्तिस्थितिसंहारनियतिज्ञानिमावृत्तिः॥बंधमोक्षौचपुरुषार्थयस्मात्स

हरिरेकराडितिस्कांदे॥यतोवाइमानिभूतानिजायंतेयेनजातानिजीवंति॥प्रयंत्यभिसंविशंति॥ तद्विज्ञास जि ति

स्वतद्ब्रह्मेति॥ यउत्रिधातुपृथिवीमुतद्यामेकोदाधारभुवनानिविश्वा॥ चतुर्भिःसाकंनवतिंचनामभिश्चक्रंनव

त्तंव्यतीड्डुर्वीविपतुः॥ परोमात्रयातन्वांवृधाननतेमहित्वमन्वश्नुवंति॥ नतेविष्णोजायमानोनजातोदेवमहि

म्नःपरमंतमाप॥ योनःपिताजनितायोविधाताधामानिवेदभुवनानिविश्वेत्यादिच॥ अनुमानतोन्येनकल्पनीयाः

ॐ शास्त्रयोनित्वात्॥ ॐ॥ नावेदविन्मनुतेतंबृहंतंसर्वानुभुमात्मानंसांपराये॥ औपनिषदःपुरुषइत्यादिश्रुति

ध्य भ्यः॥ नचानुमानस्यनियतप्रामाण्यं॥श्रुतिसाहाय्यरहितमनुमानंनकुत्रचित्॥ निश्चयात्साधयेदर्थंप्रमाणां

यं

सू तरमेकच । श्रुतिस्मृतिसहाय्यं यत्प्रमाणांतरमुत्तमं । प्रमाणपदवीं गच्छेन्नात्र कार्याविचारणा । पूर्वोत्तराविरोधेन भा०
१ कोऽप्यर्थोऽभिमतो भवेत् । इत्याद्यमूलनं तर्कः शुष्कतर्कं तु वर्जयेत् । इत्यादि कौर्मे । शक्यत्वाच्चानुमानानां सर्वत्र सर्व १
त्राशक्यते कर्तुमागमं हि विनानुमा ॥ तस्मान्नसाशक्तिमती विनागममुदीक्षितुमिति वाराहे । चेतोधातुर्वरकपिका
घृतधूमाधिवासनं । जातिस्मृतिरयस्कान्तः सूर्यकान्तोंबुभक्षणं । प्रेतभूताप्ययश्चैव देवताभ्युपयाचनं ॥
४ मृतकर्मनिवृत्तिश्च प्रमाणमिति निश्चय इति मोक्षधर्मवचनाच्च नास्तिक्यवादोऽप्ययुज्यते । दर्शनाच्च तपआ
दिफलस्य । ऋग्यजुःसामाथर्वाश्च भारतं पंचरात्रकं । मूलरामायणं चैव शास्त्रमित्यभिधीयते ॥ यच्चानुकू
लमेतस्य तच्च शास्त्रं प्रकीर्तितं ॥ अतोन्यो ग्रंथविस्तारो नैव शास्त्रं कुवर्त्म तदिति स्कांदे ॥ सांख्यं योगः पाशुपतं
वेदारण्यकमेव च इत्यारभ्य वेदपंचरात्रयोरैक्याभिप्रायेण पंचरात्रस्यैव प्रामाण्यमुक्त्वा इति तेषां भिन्नमतत्वं ४ २मि
प्रदर्श्य मोक्षधर्मेष्वपि । शास्त्रं योनिः प्रमाणमस्येति शास्त्रयोनि ॥ अज्ञानां प्रतीयमानमपि नेत्यनेनैवांशा
स्त्रयोनित्वं ॥ कुतः ॥ ॐ ॥ तत्तु समन्वयात् ॥ ॐ ॥ अन्वय उपपत्त्यादिलिंगं । उक्तं च ब्रह्मसंहितायां ॥ उपक्रमोप

5
संहारावभ्यासोपूर्वताफलं ॥ अर्थवादोपपत्तीच लिंगं तात्पर्यनिर्णयइति ॥ उपक्रमादितात्पर्यलिंगैः सम्य
क् निरूप्यमाणेतदेवशास्त्रगम्यं ॥ मांविधत्तेभिधत्तेमां विकल्प्यापोह्यइत्यहं ॥ इत्यस्याहृदयंसाक्षान्नान्यो
मद्वेदकश्चनेतिभागवते ॥ ननुयतोवाचोनिवर्तंतेअप्राप्यमनसासह ॥ अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं
नित्यमगंधवच्चयत् ॥ अवचनेनैवप्रोवाच ॥ यद्वाचानभ्युदितं येनवागभ्युद्यते ॥ यच्छ्रोत्रेणनशृणोति येनश्रोत्रमि
दंश्रुतमित्यादिभिर्नतच्छब्दगोचरं ॥ नेत्याह ॥ ॐ ईक्षतेर्नाशब्दं ॐ सएतस्माज्जीवघनात्परात्परं पुरिशयंपुरुषमी ५
क्षते ॥ आत्मन्येवात्मानंपश्येत् ॥ विज्ञायप्रज्ञांकुर्वीतेत्यादिवचनैरीक्षणीयत्वाद्वाच्यमेव ॥ औपनिषदत्वान्नाव
चनेनेक्षणं ॥ सर्वेवेदायत्पदमामनंतितपांसिसर्वाणिचयद्वदंति ॥ वेदैश्चसर्वैर्नित्यादिश्रुतिस्मृतिभ्यश्च ॥ अ
वाच्यत्वादिकंत्वप्रसिद्धत्वात् ॥ नतदीदृगितिज्ञेयंनवाच्यंनचतर्क्यते ॥ पश्यंतोपिनपश्यंतिमेरोरूपंविपश्चितइ
तिवत् ॥ अप्रसिद्धेरवाच्यंतद्वाच्यंसर्वागमोक्तितः ॥ अतर्क्यंतर्क्यमज्ञेयंज्ञेयमेवंपरंस्मृतमितिगारुडे ॥ नचा
शब्दत्वमितरसिद्धौ ॥ ५ ॥ ॐ गौणश्चेन्नात्मशब्दात् ॐ ॥ नचगौणआत्मादृशोवाच्यश्चानेनेनिगणइतियुक्तं ॥

ब्र॰ आत्मशब्दात्॥ योगुणैः सर्वतो हीनो यश्च दोषविवर्जितः॥ हेयोपादेयरहितः स आत्मेत्यभिधीयते॥ एतदन्य भा॰
१ स्वभावोऽसौ यः सोनात्मेति सतां मतं॥ अनात्मन्यात्मशब्दस्तु सोपचारः प्रयुज्यत इति वामने। द्वे वाव ब्रह्मणो रू १
पे आत्मा चैवानात्मा च तत्र यः स आत्मा स नित्यः शुद्धः केवलो निर्गुणश्च यस्त्वनीदृशः सोनात्मेति तलव
कारब्राह्मणं॥ न च मुख्ये सत्यमुख्यं युज्यते॥ ॐ॥ तन्निष्ठस्य मोक्षोपदेशात्॥ ७॥ नहि गौणात्मनिष्ठस्य मो
५ क्षः॥ यस्यानुवित्तः प्रतिबुद्ध आत्मा अस्मिन्संदेह्ये गहने प्रविष्टः॥ स विश्वकृत्स हि सर्वस्य कर्ता तस्य लोकः स उ
लोक एवेत्यात्मनिष्ठस्य मोक्षस्य उपदिश्यते॥ अयमात्मा ब्रह्म। ब्रह्मेति परमात्मेति भगवानिति शब्द्यते॥ द
त्तं दुर्वाससे सोमप्रात्मेशब्रह्मसंभवान्॥ चेतनस्तु द्विधा प्रोक्तो जीव आत्मेति च प्रभो॥ जीवा ब्रह्मादयः प्रोक्ताः
प्रयुज्यते आत्मैको जनार्दनः॥ इतरेष्वात्मशब्दस्तु सोपचारोऽभिधीयते॥ तस्यात्मनो निर्गुणस्य ज्ञानान्मोक्ष उदाहृतः॥ ५
सगुणास्त्वपरे प्रोक्तास्तज्ज्ञानान्नैव मुच्यते॥ परो हि पुरुषो विष्णुस्तस्मान्मोक्षस्ततः स्मृत इति पाद्मे॥ ॥
ॐ हेयत्वावचनाच्च ॐ॥ तमेवैकं जानथ आत्मानमन्या वाचो विमुंचथ॥ अमृतस्यैष सेतुरित्यन्येषां

6

हे यत्त्ववचनाद्दृश्यं हि यत्त्ववचनान्न गौणआत्मा॥ ॥ॐ॥ स्वाप्ययात्॥ॐ॥ पूर्णमदः पूर्णमिदं पू
द र्णात्पूर्णमुदच्यते॥ पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥ स आत्मन आत्मानमुद्धृत्य आत्मन्येव विलो
पय स्थौल्येवं भवति॥ स देवो बहुधा भूत्वा निर्गुणः पुरुषोत्तमः॥ एकीभूय पुनः शेते निर्दोषो हरिरादि
ति कृदित्यादिस्वस्यैव स्वस्मिन्नप्ययवचनात्। न हि गौणात्मनि निर्दोषस्य लयः॥ न च कासुचिच्छाखास्वन्य
थोच्यते॥ ॐ गतिसामान्यात्॥ॐ॥ सर्वे वेदा युक्तयः सुप्रमाणा ब्राह्मं ज्ञानं परमं ह्येकमेव॥ प्रकारेति यं
न विरोधः कुत्रचिद्वेदेषु सर्वेषु तथेतिहास इति पैंग्यश्रुतेर्गतेर्ज्ञानस्य साम्यमेव॥ॐ श्रुतत्वाच्च॥ॐ॥
एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा॥ कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केव
ब्र लो निर्गुणश्चेति॥ न शब्दः श्रूयते न चाप्रसिद्धं कल्प्यं॥ सर्वशब्दावाच्यस्य लक्षणायुक्तेः॥ ॐ॥ तमे
व समन्वयं प्रकटयन्नानंदमयोऽभ्यासादित्यादिना समस्तेनाध्यायेन प्रायेण प्रायेणान्यत्र प्रसिद्धानां
शब्दानां परमात्मनि समन्वयः प्रदर्श्यतेऽस्मिन्पादे॥ नान्यथा तदृष्टेः॥ ब्रह्मजिज्ञासा कर्तव्येत्युक्तं॥

ब्र॰ तत्र ब्रह्म ब्रह्मपुच्छं प्रतिष्ठेत्यानंदमयावयवत्वेन प्रतीयते॥ न ह्यवयविनं विना अवयवमात्रस्यज्ञेयप भा॰
१ तेसत आह॥ ॥ॐ आनंदमयोऽभ्यासात् ॐ॥ आनंदमयो ब्रह्मादिः प्रकृति विष्णुर्वा। ब्रह्मशब्दाद्धि १
रण्यगर्भस्य प्राप्तिः। शतानंदत्वाच्च। अष्टमूर्तित्वात्सूर्यप्रोक्तत्वाच्च रुद्रस्य। एवमन्येषामपि मनमयो निर्म
हुं ह्मेति ब्रह्मशब्दाद्भूतभावाच्च प्रकृतेः॥ बृहजाति जीवकमलासनशब्देरा सिद्धिरिति ब्रह्मशब्दादेवस
र्वजीवानां॥ अन्नमयत्वादेश्च॥ तथापि न तदानंदमयशब्देनोच्यंते किंतु विष्णुरेव। तदेव ब्रह्म परमं क
६ वीनां। एतमेव ब्रह्मेत्याचक्षते॥ ब्रह्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यते। असंपूर्णाः परे यस्मादुपचा
रेण वाक्त्वेन॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्यते। वासुदेवात्मकं ब्रह्म मूलमंत्रेपावायतिरिया ६
दिषु तस्मिन्नेव प्रसिद्ध ब्रह्मशब्दाभ्यासात्॥ ॐ विकारशब्दान्नेति चेन्न प्राचुर्यात् ॐ॥४॥ विकारा
त्मकत्वात्तदभिमानित्वाच्च युज्यते प्रकृत्यादीनां मयट् शब्दः न तु परमात्मन इति मा भूत्। प्रचुरानंदत्वा
श्री द्ध्यानंदमयः न तु विकारित्वात्॥ अन्नादीनां च प्राचुर्यमेव। अद्यते इति चेद्भूतानि तस्मादन्नं तदुच्यते

ब्र.सू. इति व्याख्यानात्। तस्माच्चुर्यं चयुज्यते॥ उपजीव्यत्वमेवाद्यत्वं। स वा एष इत्यन्यप्रारंभात्। येन्नं ब्रह्मोपास भा.
ते इत्यादि ब्रह्मशब्दाद्धेतुरूपत्वाच्च न विकारित्वम विरोधश्च॥ न च पृथक्कल्पनायुक्ता॥ स्वरूपेच्चयुज्यते प्र
चुरप्रकाशो रविरितिवत्॥ ॐ॥ तद्धेतुव्यपदेशाच्च ॐ॥ १४॥ को ह्येवान्यात्कः प्राण्याद्यदेष आकाश टे
आनंदो न स्यादिति॥ ॐ मांत्रवर्णिकमेव च गीयते ॐ॥ १५॥ ब्रह्मविदाप्नोति परमिति सूचयित्वा स
त्यं ज्ञानमनंतं ब्रह्मेति मंत्रवर्णोपिलक्षितमेव परं ब्रह्म शब्दानुसंधानाद्गीयते॥ न चावयवत्व विरोधः॥ स शि
रोसदक्षिणः पक्षस्सउत्तरः पक्षः स आत्मा सपुच्छमिति तस्यैवावयवत्वोक्तेश्चतुर्वेदसिखायां॥ शिरो नारा
यणः पक्षो दक्षिणः सव्य एव च। प्रद्युम्नश्चानिरुद्धश्च संदोहो वासुदेवकः॥ नारायणोथ संदोहो वासुदेव
शिरोपि वा। पुच्छं संकर्षणः प्रोक्तः एक एव तु पंचधा॥ अंगांगित्वेन भगवान् क्रीडते पुरुषोत्तमः॥ ऐश्व
र्यान्न विरोधश्च चिंत्यस्तस्मिन् जनार्दने॥ अतर्क्ये हि कुतस्तर्कस्त्वप्रमेये कुतः प्रमेति बृहत्संहितायां॥ न सश
ब्देन विशेषणान्न तत्संभूतं चिन्मात्रमेवोच्यते॥ इदमिति च दृश्यमानसंनिहितत्वात्॥ अनन्योप्यन्यशब्देन
तथैको बहुरूपवान्। प्रोच्यते भगवान् विष्णुरैश्वर्यात्पुरुषोत्तम इति ब्रह्मांडे॥ न चोक्तप्राप्त्याविर्भिंच्या

त्रो ३ अथसोऽभयंगतोभवति ॥

ब्रसू॰ दिरुच्यते ॥ ॐ नेतरोनुपपत्तेः ॐ ॥ १६ ॥ नह्यन्यज्ज्ञानान्मोक्षउपपद्यते । तमेवंविद्वानमृतइहभवतिनान्यः भा॰
१ पंथाअयनायविद्यतेइतिश्रुत्तेः ॥ ॐ भेदव्यपदेशाच्च ॐ ॥ १७ ॥ तेयेशतंप्रजापतेरानंदाःसएकोब्रह्मण १
आनंदःअदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयंप्रतिष्ठांविंदते । सयश्चायंपुरुषेवरह्मादिभेदव्यपदेशा
त्तु । नचतत्त्वमस्यहंब्रह्मास्मीत्यादिविरोधः ॥ नामानिसर्वाणियमाविशंतीतितच्छब्दवाच्योह्युक्तेः ॥ इदंहि
विश्वंभगवानिवेतरोयतोजगत्स्थाननिरोधसंभवःअसर्वःसर्वइत्यपि ॥ विद्याविनिंदाबोधःभेददृष्ट्याभिमा
नेननिःसंगेनापिकर्मणा ॥ जुष्टंयदापश्यत्यन्यमीशमस्यमहिमानमितिवीतशोकः । असर्वःसर्वइवात्मैवस
८ न्नात्मैवप्रसङ्ग पराङि-वैकईयतेबहुधेयतेसपुरुषःसईश्वरःसब्रह्मासर्वांतर्यामिकोविष्णुःसर्वनाम्नां ८
श्चि । धीयते ॥ एषोहंत्वमसौचेतिनतुसर्वस्यचरूपतः ॥ नैतद्दिष्टंनिपुरुषंएकंकुरुकुलेदृष्टेत्याहेश्च । उक्ताचपा
सिः । ब्रह्मैवसन्नित्यपिजीवएवब्रह्मशब्दः । उपपद्यतेचविरोधेः । प्रमादात्मकत्वाद्बंधस्यमुक्तत्वंचयुज्यते ॥ वि
मुक्तिर्हित्वान्यथारूपंस्वरूपेणव्यवस्थितिरितिभागवते ॥ नचतत्तदनुमानविरोधः ॥ ॐ कामाच्चनानुमानापेक्षा ॐ १८

यथाकामं ह्यनुमातुं शक्यते॥ अतो न तत्त्वे पृथगनुमानमपेक्ष्यते॥ उक्तं च स्कांदे। यथाकामानुमा यस्मात्तस्मात्सानप
गाश्रुतेः। पूर्वापरविरोधाय चेष्यते नान्यथा क्वचित् इति नैषा तर्केण मतिरापनेयेति च॥ ॐ अस्मिन्नस्य च तद्यो रा
गं शास्ति ॐ॥ अस्य जीवस्य युक्तिसमुच्चये च शाह॥ सोऽश्नुते सर्वान्कामान् सह ब्रह्मणा विपश्चिता। अनिलयनेऽ
भयं प्रतिष्ठां विंदते। एतमानंदमयमात्मानमुपसंक्रामतीत्यादि। अदृश्येऽनात्म्य इत्युक्तं। तस्मात् दृश्य इत्यंतः प्रवि
ष्टं कवरि मेर्तं। अंतश्चंद्रमसि मनसा चरंतं। सहैव संतं न विजानंति देवा इत्यंतस्थस्य कस्यचिद् दृश्यते। स चैंद्रोरा
जांस सयुंजतीत्यादौ इतरन्यः प्रतीयते॥ तस्मात्स एवानंदमय इति मंतव्यं॥ ७॥ ॐ अंतस्तद्धर्मोपदेशात् ॐ॥
अंतः श्रूयमाणो विष्णुरेव॥ अंतः समुद्रे मनसा चरंतं ब्रह्मान्वविंदद्दशहोतारमर्णे॥ समुद्रेंतः कवयो विचक्षते। म
रीचीनां पदमिच्छंति वेधसः॥ यस्यांडकोशं शुष्ममाहुरित्यादि तद्धर्मोपदेशात्॥ स हि क्षीरसमुद्रशायी। तस्य
च वीर्यमिदं कोशः॥ सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः॥ अप एव ससर्जादौ तासु वीर्यमवासृजत्॥
तदंडमभवद्धैमं सहस्रांशुसमप्रभं॥ यस्मिन्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः॥ आपो नारा इति प्रोक्ता आपो वै न
स्मृत रसूनवः। अयनं तस्य ताः पूर्वं तेन नारायणः इति व्यासस्मृतेः॥ अहं तत्तेजो न श्मीभ्नारायणं पुरुषं जातमग्रतः।

प्रस्तने

ब्रसू पुरुषात्सन्दृतिर्जगदंडमिति चतुर्वेदशिखायां ॥ ॐ भेदव्यपदेशाच्चान्यः ॐ ॥ इदं स्यात्मा निहितः पंच होता वा भा०
१ यो रात्मानं कवयो निचिक्युः । अंतरां दिसेमनसा चरंतं देवानां ब्रह्मान्वविंदन् इत्यादि भेदव्यपदेशात् ॥ को ह्येवान्यात्कः १
प्राण्याद्यदेष आकाश आनंदो न स्यात् । इत्याकाशस्यानंदत्वे हेतुरुक्तः । ननु विष्णोरिति नियमं तव्यं यतः ॥ ॐ आका
शस्तल्लिंगात् ॐ ॥ अस्य लोकस्य का गतिरित्याकाश इति होवाचेत्यत्र भूताकाशस्य प्राप्तिः । न चासौ युज्यते किंतु
८ विष्णुरेव । स एष परो वरीयानुद्गीथः स एषोनंत इत्यादि तल्लिंगात् ॥ विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि
विममे रजांसि । परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवंतीत्यादिनानंतस्यैव हि तल्लिंगं । अनंतो भगवान्
ब्रह्मानंद इत्यादिभिः पदैः प्रोच्यते विष्णुरेवैकः परेषामुपचारत इति ब्राह्मे । नामानि सर्वाणि यमाविशंती ८
ति चोक्तं ॥ ८ ॥ ॐ अत एव प्राणः ॐ ॥ नद्ध्येहं प्राणो अभवं महानुभोगः प्रजापतेर्भुजः करिष्यमाणो यद्दे
वान् प्राणयोन वेति मेला भोगशब्देन परमानंदत्वं प्राणस्योक्तं । स च प्राणः प्रसिद्धो वायुरिति प्राप्त इति नचैवं ॥
यतो विष्णुरेव प्राणः । अत एव श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे इत्यादि तल्लिंगादेव ॥ ८ ॥ यो वेद निहितं गु
हायामित्युक्तं । तच्च गुहानिहितं विमे कर्णापतयतो वि चक्षुर्वीदं ज्योति हृदय आहितं यत् । वि मे मनश्चरति दूर

ओधीः किंस्विद्वक्ष्यामि किमनुमनिष्ये इति ज्योतिमुक्तं। तच्च ज्योतिश्च निरुक्तं हा सति छेश्च्याग्नि रेवेतिप्रा
प्तेतआह॥ ॐ ज्योतिश्चरणाभिधानात्॥ ॐ॥ २४॥ विष्णुरेवज्योतिः। कृष्णादीनां विचरणाभिधानात्।
सहि परोमात्रयातन्वा वृधान इत्यादिना कर्णादिर्विविदुरः॥ १०॥ ६९॥ ॐ छंदोभिधानान्नेतिचेन्नतथाचे
तोर्पण निगदात्तथाहि दर्शनं॥ ॐ॥ अथयदतः परो दिवो ज्योतिर्दीप्यत इत्युक्तस्य ज्योतिषो गायत्री
वाइदंसर्वमिति गायत्र्याः समानंभः॥ तस्मान्न विष्णुरिति चेन्न। तथाचेतोर्पणार्थं हि निगद्यते। अग्निग
यत्र्यादिशब्दार्थरूपोसौ विति चेतोर्पणार्थं हि निगद्यते। तथाहि दर्शनं। गायत्री नाय तिचेत्यादि। सर्वछं
दोभिधोह्येषसर्वदेवाभिधोह्यसौ। सर्वलोकाभिधोह्येषस्त्वेषांतदुपचारनइतिवाम्ने॥ ॐ भूतादिपाद
व्यपदेशोपपत्तेश्चैवं॥ ॐ॥ २६॥ एतावानस्य महिमातो ज्यायांश्च पूरुषः पादोस्य सर्वाभूतानि त्रि
पादस्यामृतं दिवीति। सुवर्णकोशं रजसापरीवृतं देवानां वसुधानीं विराजं। अमृतस्य पूर्णां तामु कलां वि
चक्षते। पादगुंषढोनुर्न किलाविविद्विनइतिश्रुतेः। पादइत्येकदेशपरिमितं चतुर्भागोवेतिविवक्षितं
चेत्। सहि पुरुषसूक्ताभिधेयः। यज्ञेनयज्ञमयजंतेति यज्ञशब्दात्। यज्ञोविष्णुर्देवेतिहि श्रुतेः॥ ६८॥

ब्रसू० १ तस्मिन्काले महाराजा राम एवाभिधीयते तथा हि पौरुषे सूक्ते विष्णुरेवाभिधीयत इति च स्कांदे ॥ ॥ भा० १
ॐ उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॐ ॥ २७ ॥ त्रिपादस्यामृतं दिवीति पूर्वोपदेशः ।
परो दिव इति पंचम्यंतः पश्चिमः । तस्मान्नैकं वस्त्वत्रोच्यत इति चेन्न । त्रिसप्तलोकापेक्षयोभयस्मिन्नप्य
विरोधात् ॥ ११ ॥ २८ ॥ प्राणो विष्णुरित्युक्तं । तत्रं ता वा एताः शीर्षन्श्रियः श्रितश्चक्षुः श्रोत्रं मनो वाक्प्राण इत्य
त्र प्राणस्य विष्णुत्वं न विद्यते । इंद्रियैः सहाभिधानादित्यत आह ॥ ॐ प्राणस्तथानुगमात् ॐ ॥ २८ ॥ श्री
९ तं देवाः प्राणयंत स एषोऽसुः स एष प्राणः प्राणान्वृच इत्येव विद्यात् । तदयं प्राणो ह्यधितिष्ठतीत्याद्यनुगमात् । अ
त्रापि प्राणो विष्णुरेव । विष्णुमेवानयन्देवाः विष्णुं भूतिमुपासते । स एव सर्ववेदोक्तस्तद्यथा देह उच्यत
इति स्कांदे । ब्रह्मशब्दानुगमाच्च ॥ ॐ न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबंधभूमा ह्यस्मिन् ॥ ॐ २९ ९
प्राणो वा अहमस्मि ऋषे इति वक्तुरात्मोपदेशादिंद्र एवेति चेन्न । प्राणस्त्वं प्राणः सर्वाणि भूतानीति बह्वध्या ८
त्मसंबंधोऽप्यत्र विद्यते ॥ ॐ शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॐ ॥ ३० ॥ शास्त्रमंतर्यामित्वं विष्णुः स्वं परं पद
मिति भागवते । न चन्नाम्नोच्यते विष्णुः सर्वशास्त्रहहेतुतः । न क्वापि किंचिदाभासात्तमृते पुरुषोत्तममिति च

10

पाद्मे अहंमनुरभवंसूर्यश्चेत्यादिवत्॥ॐ जीवमुख्यप्राणलिंगान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादि
हतद्योगात्॥ॐ॥ ३१ ॥तावंतिशतसंवत्सरस्यांल्लुं सहस्राणिभवंतीति जीवलिंगं प्राणसंवादादिमुख्य
प्राणलिंगं तस्मान्नेति चेन्न अंतर्बहिस्सर्वगतत्वेनेत्युपासात्रैविध्यादिहाश्रितत्वाच्च सएतमेवसीमानं
विदार्यैतयाद्वाराप्रापद्यत सएतमेवपुरुषंब्रह्मततममपश्यत् एतंह स्मवैतद्विद्वानाहमहिदासऐतरेय
इत्यादिना महिदासाभिधोजज्ञेइतरायास्तपोबलात् साक्षात्सभगवान्विष्णुर्यस्तंत्रंवैष्णवंव्यधादि
तिचब्रह्माण्डे तत्तदुपासनायोग्यतांयाचपुरुषाणां केषांचित्सर्वगत्वेनकेषांचिद्धृदिहरिः केषांचिद्बहिरेवा
सावुपास्यःपुरुषोत्तमइतिब्राह्मे अग्नौक्रियावतांविष्णुर्योगिनांहृदयेहरिः प्रतिमास्वप्रबुद्धानांसर्वत्र
विदितात्मनामितिच॥ ८ ॥ इतिश्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानंदतीर्थभगवत्पादा
चार्यविरचिते प्रथमाध्यायस्यप्रथमःपादः॥ ८ ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥
अस्मद्गुरुवंतर्गतसीतापते श्रीरामकृष्णवेदव्यासार्पणमस्तु॥ ॥ श्रीगुरुभ्योनमः ॥ ॥

ब्रसू॰ हरिः ॐ ॥ ॐ ॥ लिंगाच्च कानांशब्दानां विष्णौ प्रवृत्तिं दर्शयन् सस्मिन्यादि प्राधान्येन। ब्रह्मतत्त्वमिति सर्वगत भा॰
त्वमुक्तं विष्णोः। तच्चतस्यैतस्यासावादित्यो नस इत्यादिना आदित्यस्यप्रतीयत इत्यतो ब्रवीति॥ ॐ सर्वत्रप्र
१ सिद्धोपदेशात् ॐ॥ स यश्चायमशरीरः प्रज्ञात्मेत्यादिना सर्वज्ञोऽप्यमानो नारायण एव तदेव ब्रह्म परमं २
कवीनां परमं यो महद्भूयः वासुदेवात्परः कोनुब्रह्मशब्दादि[illegible]तो भवेत् सहि सर्वगुणैः पूर्णस्तदन्येतु
पचारत इतितस्मिन्नेव प्रसिद्धब्रह्मशब्दोपदेशात्॥ ॐ विवक्षितगुणोपपत्तेश्च॥ ॐ॥ २॥ स यो नोभु
त इत्यादि सहि न ते विष्णो जायमानो इत्यादिना अभुतत्वादिगुणः सस विना स वायुः सइंद्रः सोऽभुतः
१० सोऽश्रुदृष्टयापाहिनिः यः परः परमो यो विष्णुर्योनंत इत्यादि चतुर्वेदशिखायां नचादित्यशब्दाच्चक्षुर्मयपुरुषादि
श्च जीव इति वाच्यं॥ ॐ अनुपपत्तेस्तु न शारीरः ॐ॥ एकस्य सर्वशरीरस्य [illegible]नुपपत्तेरेव॥ ॐ कर्मकर्तृ
व्यपदेशाच्च॥ ॐ॥ ४॥ आत्मानं परस्मै शंसतीत्यादि॥ ॐ शब्दविशेषात्॥ ॐ॥ ५॥ एतमेव ब्रह्मेत्याच १०
क्षत इति नहि जीवमेव ब्रह्मेत्याचक्षते एषउ एव ब्रह्मैष उ एवात्मैष उ एव सवितैष उ एवं ज्ञेय उ एव इत्य
ई रतिपरः परानंद इति चेंद्रद्युम्नशाखायां॥ ॐ स्मृतेश्च ॐ॥ ६॥ अत्मा आत्मा गुडाकेश सर्वभूता

शयस्थितः गामाविश्य च भूतानि धारयाम्यहमोजसेत्यादिनचाप्राणिकं कल्प्यं॥ ॐ अर्भकौकस्त्
अ त्वव्यपदेशाच्चनेतिचेन्न निचाय्यत्वादेवं व्योमवच्च ॐ॥ ७॥ सर्वभूतेष्वितस्तल्पौकस्त्वाच्चक्षुर्मयत्वा पु
दिना जीवव्यपदेशाच्चनेतिचेन्न अर्भकौकस्त्वेन चक्षुर्मयत्वादिरूपेण च तस्यैव विष्णोर्निचाय्यत्वात्।
सर्वगतत्वेप्यल्पौकस्त्वं युज्यते च व्योमवत्। सर्वेन्द्रियमयो विष्णुः सर्वप्राणिषु चास्थितः। सर्वनामाभि
धेयश्च सर्ववेदोदितश्च सह इति स्कांदे॥ ॐ संभोगप्राप्तिरितिचेन्न वैशेष्यात् ॐ॥ ८॥ जीवपर
योरेकशरीरस्थत्वेन समानभोगप्राप्तिरितिचेन्न। सामर्थ्यवैशेष्यात्। उक्तं हि गारुडे। सर्वज्ञत्वाल्पज्ञताभे
दात्सर्वशक्त्यल्पशक्तितः॥ स्वातंत्र्यपारतंत्र्याभ्यां संभोगो नेशजीवयोरिति च॥ १॥ ८॥ जन्माद्यस्यय
त इत्युक्तं। तत्र सर्वाकृत्स्नं स यद्यद्देवासृजत तत्तदत्तुमध्रियत॥ सर्वं वा अत्तीति तददितेरदितित्वमित्यदि
तेः प्रतीयते। स यद्यद्देवासृजतेति पुंलिंगं च कूटस्थोऽक्षर उच्यत इत्यादिवत्। अत्तोच्यते॥ ॥ ॐ अ
त्ता चराचरग्रहणात् ॐ॥ ९॥ नहि चराचरस्य सर्वस्यात्तृत्वमदितेः। स्रष्टा माता तथैवात्ता निखिलस्यै
क एव तु। वासुदेवः परः पुंसामितरेल्पस्य वा न वेति स्कांदे। एकः पुरस्ताद्य इदं बभूव यतो बभूव भुव

ब्रसू॰ नस्य गोपाः। यमप्येति भुवनं सांपराये स नो हरिर्घृतमिहायुषेत्तु देव इति श्रुतिः॥ ॐ प्रकरणाच्च ॐ॥ १॥ भा॰
१ अप्स्वं वत्सरसृष्ट्यादिनीतत्प्रकरणाच्च। नेहासीत्किंचनाग्र्यासीन्मृत्युरासीद्धरिस्तदा। सोऽस्मनोमनसा २
स्राक्षीदय एव जनार्दनः॥ शयानस्तासु भगवान्निर्ममेऽण्डं महत्तरं। तत्र संवत्सरं नाम ब्रह्माणमसृजत्प्र
भुः॥ तमत्तुं व्याददादास्यं तदासौ विरुरावह॥ अथ तत्कृपया विष्णुः सृष्टिकर्मण्ययोजयत्। सोऽसृजद्भु
११ वनं विश्वमौद्यार्थं हरये विभुरिति ब्रह्मवैवर्त्ते॥ २॥ सर्वश्चैकः पर उक्तः॥ ऋतं पिबंतौ सुकृतस्य लोके गुहां
प्रविष्टौ परमे परार्धे। छायातपौ ब्रह्मविदो वदंति पंचाग्नयो ये च त्रिणाचिकेता इति पिबंतौ प्रतीयेते। तौ
काविति उच्यते॥ ॐ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॐ॥ ११॥ गुहां प्रविष्टौ पिबंतौ विष्णुरूप एव।
घर्मसिमंताश्रिवृतं व्यापतुः तयोर्जुष्टं मातरिश्वा जगामेत्यादिना तद्दर्शनात्॥ आलां[illegible]नरात्मेति हि निरेक ए ११
व द्विधा स्थितः। निविष्टो हृदये नित्यं रसं पिबति कर्मजमिति बृहत्संहितायां॥ शुभं पिबत्यसौ नित्यं नाशुभं स
हरिः पिबेत्। पूर्णानंदमयस्यास्य चेष्टा नाज्ञायते क्वचिदिति पाद्मे। यो वेद निहितं गुहायामित्यादिना प्रसि
द्धं हि शब्देन दर्शयति॥ ॐ विशेषणाच्च ॐ॥ १२॥ यः सेतुरीजानानामक्षरं ब्रह्म तत्परमिति॥ ५॥ ५

12

पृथग्वक्तुं गुणास्तस्य न शक्यंते ऽमितत्वतः। यतोतो ब्रह्मशब्देन सर्वेषां ग्रहणं भवेत्। एतस्माद्ब्रह्मशब्दोयं
विष्णोरेव विशेषणं अमिता हि गुणा यस्मान्नान्येषां तमृते विभुमिति मा॰श्रे। नच जीवे समन्वयोभिधीयते
सत्य आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा सत्यं भिदा मैवारुवण्यो मैवारुवण्यो मैवारुवण्यः इति पैंगिश्रुतेः॥
आत्मा हि परमः स्वतंत्रोधिकगुणो जीवोल्पशक्तिरस्वतंत्रोवर इति भाल्लवेयश्रुतिः। यथेश्वरस्य जीवस्य
भेदः सत्यो विनिश्चयात्॥ एवमेहि वह्निमेवाच्यं सत्यांक्तुमिहार्हसि॥ यथेश्वरश्च जीवश्च सत्यभेदौ परस्परं॥
तेन सत्येन मां देवाः त्रायंतु सह केशवाः इत्यादेर्न सत्यो भेदः॥ ८॥ ॥ आदित्ये विष्णुमित्युक्तं। य एष
आदित्ये पुरुषः सोहमस्मि स एवाहमस्मीत्यादावग्नीनामेवादित्यादिस्थत्वमुच्यते। अतोऽक्ष्यादित्यस्थ
योचैक्याद्य एषोंतरक्षिणि पुरुषो दृश्यत इत्यत्राप्यग्निनेवोच्यते। अतस्तद्यथा पुष्करपलाश आपो न श्लि
ष्यंत एवमेवं विदि पापं कर्म न श्लिष्यत इत्यग्निज्ञानादेव सर्वपापाश्लेषान्मोक्षोपपत्तिरित्यतो ब्रवीति॥
ॐ अंतर उपपत्तेः॥ ॐ॥ १३॥ चक्षुरंतस्थो विष्णुरेव। त्रिपादस्यामृतं दिवीत्यादिना तस्यैवामृतत्वाद्यु
पपत्तेः। ब्रह्मशब्दाद्युपपत्तेश्च। सोहमस्मीत्यादित्वंतर्यामिणापेक्षया॥ अंतर्यामिणामीशेशामपेक्ष्याहं

ब्र.सू. ह्यमितिसपि सर्वेशब्दाः प्रयुज्यंते सतिभेदेपि वस्तुष्विति महाकौर्मे ॥ ॐ स्थानादिव्यपदेशाच्च ॐ ॥ १४ ॥ तद्यद भा०
१ स्मिन्सर्पिर्वोदकं वासिंचति वर्त्मनी एव गच्छतीत्यादि स्थानशक्तिः । वामिनि भामिनि नियामकत्वशक्तिश्चोच्यते । २
तस्यश्चेन लिंगं । स ईशः सोऽसपत्नः सद्विः सपरः परोवरीयान् यद्यप्यस्मिन्सर्पिर्वोदकं वासिंचति वर्त्मनी दं
एव गच्छति स वामनः स भामनः स आनंदः सोऽच्युत इति चतुर्वेदशिखायां । यस्थानत्वादिकं च मुख्यं सर्व
१२ वस्तुभिः । स वामनः परोस्माकं गतिर्नियेवाचिंतये दिनिवामने ॥ ॐ सुखविशिष्टाभिधानादेव च ॐ ॥ १५ ॥
प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति । विज्ञानमानंदं ब्रह्म आनंदो ब्रह्मेति व्यजानादित्यादेस्तस्यैव तल्लक्षणं । लक्षणं प
रमानंदो विष्णोर्नेवन संशयः । अव्यक्तादिनृणां नास्तु विष्णुरानंदभागिन इति ब्रह्मवैवर्ते । नच मुख्यस्य मु १२ नानु
ख्यं युज्यते ॥ ॐ श्रुतोपनिषत्कगत्यभिधानाच्च ॐ ॥ १६ ॥ स एनं ब्रह्म गमयतीति । न ह्यन्यविषयान्य
गतिर्युक्ता ॥ ॐ अनवस्थितेरसंभवाच्च नेतरः ॐ ॥ १७ ॥ जीवस्य जीवांतरनियामकत्वे ऽनवस्थितेः
साम्यादसंभवाच्च न जीवः । नियमे प्रमाणाभावात् । अनीश्वरापेक्षित्वाच्च । १८ ॥ यः पृथिव्यां तिष्ठन्पृथि हरी
व्या अंतरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमंतरो यमयत्येष त आत्मांतर्याम्यमृत इत्यादिना

त

13

र्न्तर्याम्युच्यते। तत्र चेदममृतमित्युक्तममृतत्वमुच्यते। स च यस्य पृथिवी शरीरं इत्यादिना सर्वात्मकत्वात्
कृतिस्तत्तज्जीवो वायुक्तः। न हि विष्णोः पृथिव्यादिशरीरत्वमंगीक्रियत इत्यत आह॥ ॐ अन्तर्याम्यधि
दैवादिषु तद्धर्मव्यपदेशात्॥ ॐ॥ १८॥ यं पृथिवी न वेद पृथिव्या अंतर इत्यादिना अधिदैवादिषु तद्धर्मव्य यः
पदेशाद्विष्णुरेवांतर्यामी। स हि न ते विष्णो जायमानो न जातः स योतोऽश्रुतो गतो मतो न तो दृष्टः सर्वेषां भू
तानामंतरपुरुष इत्यादिना विदितोऽतश्च॥ ॐ न च स्मार्तमतद्धर्माभिलापात्॥ ॐ॥ १९॥ त्रिगुणत्वादि
प्रधा तद्धर्मानुक्तेर्न स्मृत्युक्तं प्रधानमंतर्यामी॥ ॐ शारीरश्चोभयेपि हि भेदेनैनमधीयते॥ २०॥ य आत्म
न नि तिष्ठन्नात्मनोंऽतरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमंतरो यमयत्येष त आत्मांतर्याम्यमृत इत्यो वि
ज्ञाने तिष्ठन्विज्ञानादंतरो यं विज्ञानं न वेद यस्य विज्ञानं शरीरमित्युभयेपि शाखिनो भेदेनैनं जीवमधीय
ते। शीर्यते नित्यमेवास्माद्विष्णोः स्थूलजगदीदृशं। न मते च परो ह्यस्मिन् शरीरं तस्य तज्जगदिति वचना
दशरीरत्वविरोधः॥ छ॥ ॥ अदृश्यत्वादिगुणो विष्णोरुक्तः तत्र यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमच
क्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यंति धीरा इत्यत्रायथो श्री

ब्र०सू० र्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति यथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीह भा०
१ ह विश्वमिति सूक्त्वा तस्माच्चाक्षरात्परतः पर इति परः प्रतीयत इत्यतो ब्रवीत् ॥ ॐ अदृश्यत्वादिगुणको ध २
र्मोक्तेः ॥ ॐ ॥ २१ ॥ पृथिव्यादि दृष्टान्तमुक्त्वाक्षरात्संभवतीह विश्वमित्यनेन पराभिधानात् । कूटस्थोऽक्षर उच्य
त इति स्मृतेश्च प्रकृतेश्चाप्राप्तिः । ब्रह्मशब्दात्परतः पराभिधानादेवैवं हिरण्यगर्भस्य । तमेव विद्वानमृत इह भ वे
१२ वति न कर्म हि चितो षं यस्माद्विद्यातन्त्रतिर्यथा । अथ द्वे वाव विद्ये वेदितव्ये परा चैवापरा च तत्रापरा वेदाख्या या०
न्यंगानि यान्युपांगानि याभिमतांगानि सापरा अथ परा यया स हि वेदितव्योऽपि सा वदृश्यो निर्गुणः परः प
ते रमेश्वरादिना तद्धर्मत्वेनावगत पर विद्याविषयत्वोक्तेः विष्णुरेवादृश्यत्वादिगुणकः ॥ ॐ विशेषणभेद १२
व्यपदेशाभ्यां च नेतरौ ॥ ॐ ॥ २२ ॥ यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तप इति विशेषणान्न प्रकृतिः ॥
तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायत इति भेदव्यपदेशान्न विरिंचः । अपरं त्वक्षरं या सा प्रकृतिर्जड
रूपिका ॥ श्रीः परा प्रकृतिः प्रोक्ता चेतना विष्णुसंश्रया । तामक्षरं परं प्राहुः परतः परमक्षरं । हरिमे
वाखिलगुणमक्षरत्रयमितीमीरिते स्कान्दे ॥ श्रीराभिधानादक्षरात्परतः पर इत्यपि विशेषणमेव ॥

जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इति भेदव्यपदेशादीशापदप्राप्तोपि न रुद्रः ॥ ॐ
रूपोपन्यासाच्च ॥ ॐ ॥ २३ ॥ यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिमिति ॥ एको नारायण
आसीन्न ब्रह्मा न च शंकरः स मुनिर्भूत्वा समचिंतयत्तत एते व्यजायंत विश्वो हिरण्यगर्भोग्निर्यमो वरुणरुद्रें
द्रा इति तस्य हेतस्य परमस्य नारायणस्य चक्षूंषि रूपाणि शुक्लं नक्तं गौरमन्नं रूप्यामिति स एतान्येतेभ्यो वीची
१५ कूपत् विमिश्राणि व्यमिश्रयत् अत एतादृगेन रूपमिति तस्यैव रूपाणि अभिधीयंत इति ॥ अदृश्यत्वादिगु
णेषु सर्वगतत्वं यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्त इति वैश्वानरस्याह्मित्यत
आह ॥ ॐ वैश्वानरः साधारणशब्दविशेषात् ॥ ॐ ॥ २४ ॥ अग्नौ विष्ण्वोः साधारणस्य वैश्वानरशब्द
स्य विष्णावेव प्रसिद्धास्त शब्देन विशेषणाद्वैश्वानरो विष्णुरेव ॥ ॐ स्मर्यमाणमनुमानं स्यादिति ॐ ॥
॥ २५ ॥ अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रित इति स्मर्यमाणमत्रापि स एवोच्यत इत्यस्यानुमापकं ॥
समाख्यानात् ॥ इति शब्दसमाख्याप्रदर्शकः ॥ ॐ शब्दादिभ्योंतः प्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदे
शादसंभवात्पुरुषविधमपि चैनमधीयते ॥ ॐ ॥ २६ ॥ अयमग्निर्वैश्वानरः । वैश्वानरमृतआजात

ध्रु

ब्र.सू. १ मग्निमित्यादिश्चाद्वः। वैश्वानरेतोऽहुतं भवति। हृदयं गार्हपत्यो मनोन्वाहार्यपचनमास्यमाहवनीय इत्याद्यग्नि भा० २ भा
लिंगमादिशब्दोक्तं। एतेनेदमंगं पत्यते तथाप्युक्तं प्रथमभागेन श्योमीय मित्यादिना पाचकत्वेनांतः प्रति
ष्ठानं प्रतीयते। तस्मान्न विष्णुरिति चेन्न। अथ हैनमालानमणोनणीयांसं पन्न ततः परं विश्वं हिमातं त्वम्
पासीनेति सर्वनामा सर्वकर्मा सर्वलिंगः सर्वगुणः सर्वकामः सर्वधर्मः सर्वरूप इति स एतमेवमात्मान
रमु १८ विश्वं हि मामादुपास्ते तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेषु देवेषु सर्वेषु वेदेषु कामचारो भवतीति
तत्तन्नामलिंगादिना तस्यैव दृष्ट्युपदेशान्महोपनिषदि। अनामत्वादनामत्वाद्गुणनाशितः। अ
ब्राह्मणः पचेस वैब्रह्मात्मा विष्णुरवहीत्यादिना कोन आत्मा किं ब्रह्मेति [illegible] नंभाश्चान्येषामसंभवा
च्च विष्णुरेव वैश्वानरः। चंद्रमा मनसो जातः चक्षोः सूर्योऽजायतेत्यादिना यः पुरुषाख्यो विष्णुरभि १८
हितः स त्रिविधमेवात्रमूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मेत्यादिनैनं वैश्वानरमभिधीयते च शा
स्त्रेन सकलवेदतंत्रपुराणादिषु विष्णुपरत्वं पुरुषसूक्तस्य दर्शयति। तथा च पाद्मे। यथा हि पौरुषं सूक्तं
नित्यं विष्णुपरायणं। तथैव मे मनो नित्यं भूयाद्विष्णुपरायणमिति चतुर्वेदशिखायां च। सहस्रशीर्षा

पुरुषः सहस्राक्षः सहस्रपादित्येष एवाचिंत्यः परः परमो हरिरनादिरनादिरनंतोनंतशीर्षोनंताक्षोनंत
बाहुश्चानंतगुणोनंतरूप इति। बृहत्संहितायां च। यथैव पौरुषं सूक्तं विष्णोरेवाभिधायकं। न तथा सर्ववे
दाश्च वेदांगानि च नारदेत्यादि॥ यस्माच्च जायते चांगाल्लोके वेदादिकं हरेः। तन्नामवाच्यमंगं तद्यथा ब्राह्मा
दिकं मुखमिति नारदीयवचनान्नास्ते दोषः किं विरोधः॥ ॐ अत एव न देवताभूतं च॥ ॐ अग्निर्वैश्वानरादिशब्द
स्तेजसि भूतेग्निदेवतायां च प्रसिद्धोप्यतः पूर्वोक्तहेतुत एवात्र न सा तच्छाभिधीयते॥ ॐ साक्षादप्यविरोधं
जैमिनिः॥ ॐ॥२८॥ नाग्न्यादयः शब्दाः अग्न्यादिवाचकाः। तथापि साक्षादेवानन्ययोगेन ब्रह्मवाचकैः
शब्दैर्व्यवहारार्थमनभिज्ञानाच्चान्यत्र व्यवहारं तीत्यभ्युपगमेऽविरोधं जैमिनिर्वक्ति। व्यासचित्तस्थिता
काशादवच्छिन्नानि कानि चित्॥ अन्येभ्यव्यवहारं ते तान्युरीकुरुगृहादिवदिति स्कांदवचनान्नमतानां प
रस्परविरोधः॥ ॐ अभिव्यक्तेरित्याश्मरथ्यः॥ ॐ॥२९॥ तत्र तत्र प्रसिद्धावप्यग्न्यादिषु ब्रह्मणोभि
व्यक्तेरग्न्यादिसूक्तनियम इत्याश्मरथ्यः॥ ॐ अनुस्मृतेर्बादरिः॥ ॐ॥३०॥ तत्र तत्रोक्तस्य विष्णोरग्न्या
दिषु स्मर्यमाणत्वोक्तनियम इति बादरिः॥ ॐ संपत्तेरिति जैमिनिस्तथा हि दर्शयति॥ ॐ॥३१॥ श्री

ब्रसू साक्षादप्यविरोधं वदन् जैमिनिः सूक्तादिनियममस्यादिशाखासामन्यते तं यथायथोपासते तदेव भव भा.
१ तीति दर्शयति न ह्यन्योपासकोऽन्यं प्राप्नुत इति युज्यत इत्यत आह ॥ ॐ आमनन्ति चैनमस्मिन् ॥ ३
नं ॐ ॥ ३२ ॥ एनं विष्णुं अग्न्यादावामनन्ति योगिनः । तिष्ठन्नयं एषां एतस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुष इ
त्यादिना ॥ ८ ॥ ८ ॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पा
१५ दाचार्यविरचिते प्रथमाध्यायस्य द्वितीयः पादः ॥ ✿ ॥ ✿ ॥ श्रीवेदव्यासार्पणमस्तु ॥ २
हरिः ॐ ॥ तत्र चान्यत्र च प्रसिद्धानां शब्दानां विष्णौ समन्वयं प्रायेणास्मिन् पादे दर्शयति ॥ विष्णोः परविद्या
विषयत्वमुक्तं । तत्र यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैस्तमेवैकं जानथ आत्मा
नमित्यत्र प्राणानां ग्रन्थिर्नाडिरुद्रोमा विशान्तकः प्राणेश्वरः कृत्तिवासाः पिनाकीत्यादिना रुद्रस्य प्राणा १५
धारत्वप्रतीतेः । स एषोऽन्तश्चरते बहुधा जायमान इति जीवलिङ्गाच्चैतयोः प्राप्तिरिति । अत उच्यते ॥
ॐ द्युभ्वाद्यायतनं स्वशब्दात् ॥ ॐ ॥ १ ॥ तमेवैकं जानथ आत्मानमित्यात्मशब्दात् द्युभ्वाद्याश्रयो वि
ष्णुरेव । आत्मब्रह्मादयः शब्दास्तमृते विष्णुमव्ययं । न संभवन्ति यस्मात्तेनैवाशागुणपूर्णतेति हि ब्रह्म

16

वैवर्ते ॥ ॐ मुक्तोपसृप्यव्यपदेशात् ॥ ॐ ॥ २ ॥ अमृतस्यैव सेतुरिति । ब्रह्मविदाप्नोति परं । नारायणं महा
ज्ञेयं विश्वात्मानं परायणं । मुक्तानां परमा गतिः । एतमानन्दमयमात्मानमुपसंक्रामतीत्यादिना तस्यै
व मुक्तप्राप्यत्वव्यपदेशात् बहुनात्र किं मुक्तेन यावद्ब्रह्म तं न गच्छति । योगिनां तावन्न मुक्तिः स्यादेष शास्त्रस्य नि
र्णय इत्यादि स्कपुराणे ॥ ॐ नानुमानमतच्छब्दात् ॥ ॐ ॥ ३ ॥ नानुमानात्मकागमकल्पितरुद्रोऽत्र वाच्यः परि
भस्मधरोग्रत्वादितच्छब्दाभावात् । सोऽन्तकः स रुद्रः स प्राणभृत् स प्राणनायकः स ईशो योऽहनि र्यन्नितो
यो विष्णुर्यः परः परो वरीयानित्यादिना प्राणग्रंथिरुद्रत्वादेर्विष्णोरेवोक्तत्वात् । ब्रह्मांडे च । रुजं द्रावय
ते यस्माद्रुद्रस्तस्माज्जनार्दनः । ईशनादेव चेशानो महादेवो महत्त्वतः । पिबन्ति ये नरा नाकं मुक्ताः सं
सारसागरात् । तदाधारो यतो विष्णुः पिनाकीति ततः स्मृतः । शिवः सुखात्मकत्वेन शर्वः शंरोधनाद्ध
रिः । कृत्यात्मकमिमं देहं यतो वस्ते प्रवर्तयन् । कृत्तिवासास्ततो देवो विरिंचश्च विरेचनात् । बृंहणाद्ब्र
ह्मनामासौ ऐश्वर्यादिंद्र उच्यते । एवं नानाविधैः शब्दैरेक एव त्रिविक्रमः । वेदेषु सपुराणेषु गीयते पु ९
रुषोत्तम इति वामने च ॥ न तु नारायणादीनां नाम्नामन्यत्र संभवः । अन्यनाम्नां गतिर्विष्णुरेक एव

ब्रस्० १ प्रकीर्त्तितइति। स्कांदेच। कृतेनारायणादीनि नामानिपुरुषोत्तमः प्रादादन्यत्रभगवान्राजेववर्त्ती भा० ३
स्वकंपुरमिति चतुर्मुखःशतानंदोब्रह्मणःपद्मभूरिति उग्रोभस्मधरोनग्नःकपालीतिशिवस्यच
विशेषनामानिदत्तोस्वकीयान्यपिकेशवइतिच वामनेब्राह्मे॥ॐ प्राणभृच्च ॐ॥ एतेनैवहेतुभि
र्नजीवोवायुश्च अजायमानोबहुधाविजायतइतितस्यैवबहुधाजन्मोक्तेः॥ॐ भेदव्यपदेशाच्च ॐ
१६ न्नचैकंवाच्यं। जुष्टंयदापश्यत्यन्यमीशमस्यमहिमानमितिभेदव्यपदेशात्॥ॐ प्रकरणात् ॐ॥ ६॥
देविष्ट्वेवेदितव्यइतितस्यैवैतत्प्रकरणं॥ॐ स्थित्यदनाभ्यांच ॐ॥ ७॥ द्वासुपर्णासयुजासखायास
मानंवृक्षंपरिषस्वजाते। तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति ईशजीवयोःस्थि
त्यदनोक्तेः॥ ५ प्राणोवाआशायाभूयानित्युक्त्वायोवैभूमातत्सुखमित्युक्तेतस्यैवभूमत्वप्राप्तिः उक्तेन १६
प्राणानित्यादिलिंगात् प्राणशब्दश्चवायुवाचीति अतोवक्ति॥ॐ भूमासंप्रसादादध्युपदेशात् ॐ॥ ८॥
संप्रसादात्स्वरूपसुखरूपत्वात् अध्युपदेशात्सर्वेषामुपर्युपदेशाच्चविष्णुरेवभूमा सहस्रशीर्षंदेवं विश्वा
क्षंविश्वशंभुवं विश्वंनारायणंदेवं अक्षरंपरमंपदं विश्वतःपरमांनित्यमितिहिश्रुतिः तमुत्क्रामंतंमा

 १ यदाधारं तं यत्नेन भर्तुं निर्वच्य भारं पुनरस्तमेति प्रणास्य

योनूत्क्रामतीत्यादिनानोत्क्रमणादिलिंगविरोधोपि॥ ॐ धर्मोपपत्तेश्च ॐ॥ ९॥ सर्वगतत्वादिधर्मो
पपत्तेश्च अदृश्यत्वादिगुणाः अदृष्टं द्रष्टृ श्रुतं श्रोतृ इत्यादिना अहं सोमम्याहनसं बिभर्मीत्यादेस्तस्यापि सं
भवान्मध्यमाक्षरस्योंकार इति अतो ब्रूते॥ ॐ अक्षरमंबरांतधृतेः॥ ॐ॥ १०॥ एतस्मिन्नु खल्वक्ष
क्षरे गार्ग्याकाश ओतश्च प्रोतश्चेयंबरांतस्य सर्वस्य धृते ब्रह्मैवाक्षरं यउत्रिधातुपृथिवीमुतद्यामेको
दाधारभुवनानिविश्वा भर्तासिन्ध्रियमाणो बिभर्ष्येको देवो बहुधानि विष्टः यस्मिन्निदं संच विचैति
धि सर्वं यस्मिन्देवा अधिविश्वे निषेदुरित्यादिश्रुतेः पृथिव्यादि प्रकृत्यंतं भूतं भव्यं भवच्च यत् विष्णु
नैको बिभर्तीदं नान्यस्तस्मात् क्षमो धृताविति च स्कांदे॥ ॐ साच प्रशासनात् ॐ॥ ११॥ साच सं
वृतिः प्रशासनादुच्यते एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इत्या
दिना तच्च प्रशासनं विष्णोरेव स सार्धगर्भो भुवनस्यरेतो विष्णोस्तिष्ठति प्रदिशा विधर्मणि चतुर्भिः
साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतीरं वीविपदित्यादिश्रुतेः एकः शास्तान द्वितीयोस्ति शास्ता यो
हृद्ध्यस्तमहमिहं ब्रवीमि नकेवलं मे भवतश्च राजन् सर्वे बहूनां चापरेषामित्यादेश्च॥ मे

ब्रसू १ ॐ॥ अन्यभावव्यावृत्तेश्च॥ ॐ॥ १२॥ अस्थूलमनण्वित्यादिनास्थूलाण्वादीनामन्यमित्यादिश्च भा० ३
वस्तुस्वभावानां व्यावृत्तेश्च सगुणो निर्गुण इत्यादि विष्णोरेव ते धर्माः अस्थूलोऽनणुरूपोसावविश्वो विश्व एव च विरुद्धधर्मोऽस्थूलोऽनणुरमध्यमो मध्यमो व्यापकोऽयोसौ हरिरादिरनादिरविश्वो विश्वः रूपोसावैश्वर्यपुरुषोत्तम इति च ब्राह्मे॥ ८॥ १॥ सदेव सोम्येदमग्र आसीदित्यादिना सतः स्रष्टृत्वमुच्यते तच्च सद् बहु स्यां प्रजायेयेति परिणाम प्रतीतेर्न विष्णुः सत् विकारः सदाशुद्धो नित्य आत्मा सदा हरिरित्यादिना विकारः प्रसिद्ध इति अतो ब्रवीति॥ ॐ ईक्षतिकर्मव्यपदे
१ शात्सः॥ ॐ॥ १३॥ न दृक्षते नीक्षति कर्मव्यपदेशात्स एव विष्णुरुच्यते नान्योतोस्ति द्रष्टा नान्योऽतोस्ति द्रष्टेत्यादिना तस्यैव हि तद्रूपं बहुत्वं चाविकारेणोक्तं अजायमानो बहुधा विजायत इति ८ ४ चंद्रादित्याध्यानत्वं विष्णोरुक्तं अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोस्मिन्नंतर आकाशः किं तदत्र विद्यते उभे अस्मिन्द्यावापृथिवी अंतरेव समाहिते उभावग्निश्च वायुश्च सूर्याचंद्रमसावुभौ विद्युन्नक्षत्राणीत्यादिना आकाशस्य प्रती १७

आ

व्यापके

कृ

ठि

यते स्याकाशो न विष्णुः तस्यां तेसुषिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितमिति श्रुतेरिति प्राप्त आह ॥ ॐ द
हर उत्तरेभ्यः ॐ ॥ १४ ॥ य आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः स
त्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः इत्यादिभ्यः उत्तरेभ्यो गुणेभ्यो दहरे विष्णुरेव ॥ योऽशनाया
पिपासे शोकं मोहं जरां मृत्युमत्येति स एषः सर्वेभ्यः पापेभ्य उदित इत्यादिना विष्णोरेवैते धर्माः
नियतीर्णाशनायादिरेक एव हरिस्ततः अशनायादिकानन्येन प्रसादात्तरंतीति हीति पार्थे सापेक्ष
निरपेक्षयोश्च निरपेक्षं स्वीकर्तव्यं सत्यकामः परो नास्ति तमृते विष्णुमव्ययं सत्यकामत्वमन्येषां भवे
त्तत्काम्यकामितेति स्कांदे ॥ ॐ गतिशब्दाभ्यां तथाहि दृष्टं लिंगं च ॐ ॥ १५ ॥ अहरहर्गच्छंत्य एतं ब्रह्म
लोकं न विंदंतीति सुप्तस्य तद्गतिर्ब्रह्मशब्दश्चोच्यते सता सोम्य तदा संपन्नो भवतीति श्रुतेः स्वं हि सुप्तो
गच्छति अरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोक इति लिंगं च तथा हि दृष्टं अरश्च वैण्यश्च सुधासमु
द्रौ तत्रैव सर्वाभिमतप्रदौ ह्यदाविद्यादिना तस्यैव हितत्व लक्षणत्वेनोच्यते ॥ ॐ धृतेश्च महिम्नोऽस्यास्मिन्नुपल
ब्धेः ॐ ॥ १६ ॥ एष सेतुर्विधृतिरिति धृतेः एष भूताधिपतिरेष भूतपाल इत्यादि यस्य महिम्नोऽस्मिन्नुप

घु हि १८

ब्रसू लब्धेः एतस्मिन्खल्वक्षरे गार्ग्याकाश ॐ तश्च प्रोतश्च एतस्य वाक्षरस्य प्रशासने गार्गि इति हि सर्वाधिप भा
१ तिः स हि सर्वपालः स ईशः स विष्णुः पतिं विश्वस्यात्मेश्वरमित्यादिश्रुतिभ्यस्तस्यैष महिमा सर्वेशो ३
विष्णुरेवैको नान्योस्ति जगतः पतिरिति स्कान्दे ॥ ॐ प्रसिद्धेश्च ॥ ॐ ॥ १७ ॥ तत्रापि दहरं गगनं विशोक
स्तस्मिन्यदंतस्तदुपासितव्यमिति प्रसिद्धेश्च न दहरं तत्तुल्यत्वापेक्षत्वात् असुषिरश्रुतिविरोधः ॥ ॐ इतरप
रामर्शात्स इति चेन्नासंभवात् ॐ ॥ १८ ॥ परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यते एष आत्मे
१८ ति होवाचेति जीवपरामर्शात्स इति चेन्न तस्य स्वतो अपहतपाप्मत्वासंभवात् ॥ ॐ उत्तराच्चेदा ध
विर्भूतस्वरूपस्तु ॥ ॐ ॥ १९ ॥ स तत्र पर्येति जक्षन्क्रीडन्रममाण इत्याद्युत्तरवचनात् जीव इति चेन्न ति
तत्र परमेश्वरप्रसादादाविर्भूतस्वरूपो मुक्त उच्यते यत्प्रसादात् मुक्तो भवति स भगवान्सर्वेशः ॥ १८
ॐ ॥ अन्यार्थश्च परामर्शः ॥ ॐ ॥ २० ॥ यं प्राप्य स्वेन रूपेण जीवोभिनिष्पद्यते स एष आत्मेति पर
मा मार्थश्च परामर्शः ॥ ॐ अल्पश्रुतेरिति चेत्तदुक्तं ॐ ॥ २१ ॥ दहर इत्यल्पश्रुतेरिति चेन्न निर्धार्य
त्वादेवं व्योमवच्चेत्युक्तत्वात् एष म आत्मान्तर्हृदये ज्यायानिति श्रुत्युक्तत्वाच्च ॥ ॐ ॥ अदृश्यत्वा म

17

दयः परमेश्वरगुणाः उक्ताः तेषां सुखं शाश्वतं नेतरेषां तदृतदितिमन्यंते निर्देश्यं परमं सुखमित्या
दिनाज्ञानिसुखस्याप्यनिर्देश्यत्वमत्ते यत्नं चोच्यते अतोवक्ति ॥ ॐ अनुकृतेस्तस्य च ॐ ॥ २२ ॥ तमे
वभांतमनुभातिसर्वमित्यनुकृतेस्तस्यभासासर्वमिदंविभातीति वचनाच्चपरमात्मैवानिर्देश्यसुखरू
पः नहिज्ञानिसुखमनुभातिसर्वं न च तद्भासा अहं तत्तेजो न रश्मी इति नारायणभासा हि सर्वं वि
भाति ॥ ॐ अपि स्मर्यते ॐ ॥ २३ ॥ यदादित्यगतं तेजो जगद्भासयतेऽखिलं यच्चंद्रमसि यच्चाग्नौ तत्ते
जो विद्धि मामकमिति न तद्भासयते सूर्यो न शशांको न पावकः यद्गत्वा न निवर्तंते तद्धाम परमं ममेति
वि च विष्णुरेव जिज्ञास्य इत्युक्तं तत्र ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति मध्ये वामनमासीनं विश्वे स्य
देवा उपासत इति सर्वदेवोपास्यः कश्चिदुच्यते सचएवमेवैषप्राण इतरान् प्राणान् पृथक् पृथगेव स्यः
सन्निधत्ते योयं मध्यमः प्राणः कुविदंगेत्यादिना प्राणव्यवस्थापकत्वान्मध्यमत्वात्सर्वदेवोपास्यत्वा
च्चः वायुरेवेति प्रतीयते अतो ब्रवीत् ॥ ॐ शब्दादेव प्रमितः ॐ ॥ २४ ॥ वामनशब्दाद्देव विष्णुरिति रि
प्रमितः न हि श्रुतेर्लिंगं बलवत् श्रुतिलिंगसमाख्याचवाक्यं प्रकरणं तथा पूर्वपूर्वबलीयस्त्वादेव

ब्रसू॰ मागमनिर्णय इति। स्कांदे तच्च लिंगं विष्णोर्नैव तस्यैव प्राणलोचनेऽस्मिन्देहे त्वं प्राणो भव इति॥ ॐ हृद्यपे भा॰
१ क्षया तु मनुष्याधिकारित्वात् ॐ॥२५॥ सर्वगतस्यापि तस्यांगुष्ठमात्रत्वं हृद्यवकाशापेक्षया युज्य ३
ते इतरप्राणिनामंगुष्ठाभावेऽपि मनुष्याधिकारत्वान्न विरोधः ७ मनुष्याणामेव वेदविद्याधिका
र इत्युक्तं तिर्यगाद्यपेक्षयैव मनुष्यत्वविशेषणमुक्तं ननु देवाद्यपेक्षयेत्याह॥ ॐ तदुपर्यपि बाद
रायणः संभवात् ॐ॥२६॥ तदुपरि मनुष्याणां सतां देवादित्वप्राप्त्युपरि संभवति हि तेषां विशिष्टबु
१९ द्ध्यादिभावात् तिर्यगादीनां तदभावादभावः तेषामपि यत्र विशिष्टबुद्ध्यादिभावस्तत्राविरोधः निषे
मी धाभावात् दृश्यंते हि जपितिर्यादयः॥ ॐ विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्॥२७॥ मा
नुषा एव देवादयो भवंतीति तदुपरीत्युक्तं तत्र यदि मनुष्याः संतो देवादयो भवंति तर्हि पूर्वं देवताभावाद्देवतोद्दिष्ट १९
कर्मणि विरोध इति चेन्न अनेकेषां देवतापदप्राप्तेर्दर्शनात् ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति
देवा इति॥ ॐ शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्यां ॐ॥२८॥ वाचा विरूपनित्यया इति श्रुतेरा
प्य निश्चयान्नित्यत्वापेक्षत्वाच्च मूलप्रमाणस्य स्वतःप्रामाण्यप्रसिद्धेश्च नित्यत्वाद् दृश्यत तदुदितानामनि देवा॰ मी

सत्वात् पुनरन्यभावनियमाभावाच्च शब्दे विरोध इति चेन्न सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत् य
थैव नियमः काले सुरादिनियमः तथा तस्मान्नानीशं क्वापि विश्वमेतद्भविष्यतीत्यादेरत एव शब्दत्वेपि वांऽप्रभ
वनियमात् महतोऽप्यसृक्षाद्यथेदानींतथोपर्यपिक्षविष्यंतीति इतरेषामनुमानाच्च ॥ ॐ अत एव च नित्यत्वं
ॐ ॥२९॥ अत एव शब्दस्य नित्यत्वादेव देवप्रवाहनित्यत्वमुक्तं ॥ ॐ समाननामरूपत्वाच्चावृत्तावप्यवि
रोधो दर्शनात् स्मृतेश्च ॐ ॥३०॥ अतीतानागतानां देवानां समाननामरूपत्वात् प्राप्तपदानां मुक्त्या उत्क्र
मावप्यविरोधः यथापूर्वमिति दर्शनात् अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ऋषीणां नामधेया
नि याश्च वेदेषु दृष्टयः वेदशब्देभ्य एवादौ निर्ममे स महेश्वर इति स्मृतेश्च ॥ ॐ मध्वादिष्वसंभवादनधि
कारं जैमिनिः ॐ ॥३१॥ वसूनामेवैकोभूत्वेत्यादिना प्राप्तफलत्वात् प्राप्तपदानां मध्वादिष्वनधिकारं जै
मिनिर्मन्यते ॥ ॐ ज्योतिषि भावाच्च ॐ ॥३२॥ ज्योतिषि सर्वज्ञत्वभावाच्च आदित्यप्रकाशेंतर्भाववत्
तज्ज्ञाने सर्ववस्तूनामंतर्भावात् नित्यसिद्धत्वाच्च विद्यानां ॥ ॐ भावं तु बादरायणोऽस्ति हि ॐ ॥३३॥ फले
विशेषभावात् प्राप्तपदानामपि देवानां मध्वादिष्वधिकारं बादरायणो मन्यते अस्ति हि प्रकाशवि

ब्र॰ शेषः यावत्सेवापचेत्तत्सेनावत्सुखविशेषता संभवाच्चाप्रकाशस्य परमेकैमूर्तेऽरिं तेषांसामर्थ्ययोगाच्चदे भा॰
१ वानामप्युपासनं सर्वं विधीयते नित्यं सर्वयज्ञादिकर्म चेतिस्कांदे उक्तफलानधिकारमात्रं जैमिनिमतं ॥ ३
अतोनमत विरोधः सर्वज्ञस्यैव कृष्णस्यलेकदेश विचिंतितं स्मीरुयमुनयोर्बूयुस्तन्मतंनविरुध्यतेत इ
तिब्राह्मे ॥ ७ ॥ ॥ मनुष्याधिकारात् वादित्युक्ते ऽविशेषाच्छूद्रस्याप्यत्रहानेवाशुद्धेतिपौत्रायणो हेरधिकार इत्य
अ॰ तआह ॥ ॐ शुगस्यतदनादरश्रवणात्तदाद्रवणात्सूच्यतेहि ॥ ॐ ॥ ३४ ॥ नासौपौत्रायणः शूद्रः किंतुशुचाद्रव
२० णमेवशूद्रत्वं ॥ कम्वरएनमेतत्संतमितिसनादरश्रवणात् सहसंजिहानएवक्षत्तारमुवाचेतिसूच्यतेहि ॥ ॐ क्ष
त्रियत्वावगतेश्चोत्तरत्र चैत्ररथेनलिंगात् ॐ ॥ ३५ ॥ अयमश्वतरीरथइति चित्ररथसंबंधिलिंगैपौत्रा लिंगे व
यणस्य क्षत्रियत्वावगतेश्च ॥ रथस्यश्वतरीपुत्रश्चित्रइत्यभिधीयतइतिब्राह्मे ॥ यत्रवेदारथस्तत्रनवेदोय २०
त्रनोरथइतिचब्रह्मवैवर्ते ॥ ॐ संस्कारपरामर्शात्तदभावाभिलापाच्च ॐ ॥ ३६ ॥ अष्टवर्षंब्राह्मण
मुपनयीत तमध्यापयीतेत्यध्ययनार्थसंस्कारपरामर्शात् नाग्निर्नयज्ञोनक्रियानसंस्कारोनव्रतानि च
शूद्रस्येतिपैंगिश्रुतौ संस्काराभावाभिलापाच्च उत्तमस्त्रीणांतुनशूद्रवत्सपत्नीमिपराधमइत्यादि

षुअधिकारदर्शनात्।संस्काराभावेनाभावस्तुसामान्येन।अस्तिचतासांसंस्कारः।स्त्रीणांप्रदानक
र्मैवयथोपनयनंतथेतिस्मृतेः।। ॐतदभावनिर्धारणेचप्रवृत्तेः ॐ।।३६।। नाहमेतद्वेदभोयद्गोत्रो
हमस्मीतिसत्यवचनेनसत्यकामस्यशूद्रत्वाभावनिर्धारणेगौ।तिहमतस्यनैतदब्राह्मणोविवक्तुमर्हती
तितत्संस्कारेप्रवृत्तेश्च।। ॐश्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ॐ।।३८।।श्रवणेत्रपुजतुभ्यां
श्रोत्रपरिपूरणं अध्ययने जिह्वाच्छेदः अर्थविधारणे हृदयविदारणमितिप्रतिषेधात् नाग्नि
र्नयज्ञः शूद्रस्यतथैवाध्ययनंकुतः केवलैवतुशुश्रूषात्रिवर्णानांविधीयतइतिस्मृतेश्च विदुरादीनां
तुसम्भज्ञानवाल्लभ्यविशेषः छ यदिदंकिंचजगत्सर्वंप्राणएजतिनिःसृतंमहद्भयंवज्रमुद्यतं यए
तद्विदुरमृतास्तेभवंतीतिउद्यतवज्रज्ञानात्मोक्षः प्रतीयतइति। अतोब्रवीत्।। ॐकंपनात्ॐ ३९
एजतीतिकंपनवचनादुद्यतवज्रोभगवानेव। कोह्येवान्यात्कः प्राण्याद्यदेषआकाशआनंदोनस्या
दितिहिश्रुतिः प्राणस्यप्राणमुतचक्षुषश्चक्षुरितिच नमस्यतोपिसर्वास्यश्रेष्ठभगवतोहरेः किमुता
न्यस्यजगतोयस्यचेष्टानस्यतइतिस्कांदे चैंक्रंचंक्रमणादेषवर्जनाद्वज्रउच्यते खंडनाद्व

ब्र.सू. ड्डण वैषहेतिनामास्यचयं हरिरिति ब्रह्मवैवर्ते ॥ हृदय आहितं ज्योतिः परमात्मेत्युक्तं तत्र योयं विज्ञान भा०

१ मयः प्राणेषु हृद्यंतर्ज्योतिः पुरुष इत्यत्रोभौ लोकावनुसंचरतीति वचनाज्जीव इति प्रतीयत इति अ ३

त उच्यते ॥ ॐ ज्योतिर्दर्शनात् ॐ ॥ ४० ॥ विष्णुरेव ज्योतिर्विष्णुरेवात्मा विष्णुरेव ब्रह्म विष्णुरेव

बलं विष्णुरेव यशो विष्णुरेवानंद इति दर्शनात् चतुर्वेदशिखायां ज्योतिर्विष्णुरेव । प्राज्ञेनात्मनान्वा

पा ३ रूढ उत्सर्जन्याति इति वचनात्तस्यापि लोकसंचरणमस्त्येव ॥ सर्वाधारत्वं विष्णोरुक्तं तत्राकाशो

सू २१ वै नाम नामरूपयोर्निर्वहिते यत्राकाशस्य प्रतीयते वै नामेति प्रसिद्धोपदेशात्सिद्धाकाशश्चांगीक सू

र्तव्य इति अत उच्यते ॥ ॐ आकाशोऽर्थांतरत्वादिव्यपदेशात् ॐ ॥ ४१ ॥ ते यदंतरा तद्ब्रह्मेत्यर्था

तरत्वादिव्यपदेशादाकाशो हरिरेव अवर्प्य यतो वाचो निवर्तंत इत्यादिश्रुतेस्तस्य हि तल्लक्षणं २१

अनामासो प्रसिद्धत्वादरूपो भूतवर्जनादिति ब्राह्मे ॥ १२ असंगत्वं परमात्मन उक्तं तच्च

सयत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुष इति स्वप्नादिद्रष्टुः प्रतीयते स च जी

वः प्रसिद्ध इति अतो वक्ति ॥ ॐ सुषुप्त्युत्क्रांत्योर्भेदेन ॐ ॥ ४२ ॥ प्राज्ञेनात्मना संपरिष्वक्तो न

बाह्यं किंचनवेदनांतरंप्राज्ञेनात्मनान्वारूढउत्सर्जन्नातीतिभेदव्यपदेशान्नजीवः स्वप्नादिद्रष्टृत्वंच
सर्वज्ञत्वान्नस्यैवयुज्यते ८ १३ एषनित्योमहिमाब्राह्मणस्येतिब्राह्मणस्यापिनियममहिमाप्रतीयते
सचब्राह्मणःसवाएषमहानजआत्मेत्यजशब्दाद्विविंचइतिप्राप्तं देवानांचविद्याकर्मणोःपदप्राप्तिःसू
चितातदुपर्यपीति।अतोब्रवीति।ॐपत्यादिशब्देभ्यःॐ।४३ सर्वस्याधिपतिःसर्वस्येशानःस
वाएषनेतिनेतीत्यादिशब्देभ्योनियममहिमाविष्णुरेव उतामृतत्वस्येशानोयदन्नेनातिरोहति सत्या
ह्वगर्भाभुवनस्यचेतोविष्णोस्तिएतिप्रदिशाविधर्मणि सयातोभुतइत्यादिश्रुतिभ्यस्तस्यैवहितेशब्दाः
४३।१४॥इतिश्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्येश्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते
प्रथमाध्यायस्यतृतीयःपादः॥ ३ ॥श्रीकृष्णार्पणमस्तु॥ ८ ८ ८ ८ ८ ८
श्रीगुरुभ्योनमः श्रुतिलिंगादिभिरन्यत्रैवप्रसिद्धानामपिशब्दानांसामर्थ्येन विशेषहेतुभिर्विष्णावेवप्रवृत्तिंदर्शि
यत्यस्मिन्पादे।।ॐआनुमानिकमप्येकेषामितिचेन्नशरीररूपकविन्यस्तगृहीतेर्दर्शयतिचॐ
तत्तुसमन्वयादितिसर्वशब्दानांपरमेश्वरेसमन्वयःउक्तः।तन्नयुज्यते।यतोऽव्यक्तात्पुरुषःपरइतिसांख्या

अ. नुमानपरिकल्पितंप्रधानमप्येकेषांशाखिनामुच्यतइतिचेन्न।तस्यैवपारतंत्र्याच्छरीररूपकेऽव्यक्तेविन्य भा
१ स्तस्यपरमात्मनएवाव्यक्तशब्देनगृहीतेः।क्तप्रत्ययःकुत्सने।परमात्मनएवाव्यक्तशब्दःतत्तंत्रत्वेनत ४
च्छरीररूपत्वादितरस्याप्यव्यक्तशब्दः।तुच्छेनाभ्वपिहितंयदासीदितिदर्शयतिच।अव्यक्तमचलंशां
ब्रि तंनिष्कलंनिष्क्रियंपरंयोवेदहरिमात्मानंसभयादनुमुच्यतइतिपिप्पलादशाखायां।अक्षरंब्रह्मपरम
मित्युक्तोऽव्यक्तोऽक्षरइत्युक्तइतिवचनाच्च॥ ॐसूक्ष्मंतुतदर्हत्वात् ॐ॥ २॥ सूक्ष्ममेवाव्यक्तशब्देनो
२२ च्यते।तद्ध्यव्यक्ततामर्हति।सूक्ष्मत्वंचमुख्यंतस्यैव।यत्तत्सूक्ष्मंपरमंवेदितव्यंनित्यंपदंवैष्णवंह्यामनं
ति।यत्तल्लोकानविदुर्लौकिसारंविंदंतेतत्त्वयोयोगनिष्ठाइतिचपिप्पलादशाखायां।मुख्येचविद्यमा
नेनामुख्यंयुक्तं॥ ॐतदधीनत्वादर्थवत् ॐ॥ ३॥ तदधीनत्वाच्चाव्यक्तत्वपरत्वादीनांतस्यैवा
व्यक्तपरापरत्वादिकमर्थवत्।यदधीनोगुणोयस्यतद्गुणीसोऽभिधीयते।यथाजीवःपरात्मेतियथा २२
राजाजयीसपीतिस्कांदे॥ ॐज्ञेयत्वावचनाच्च ॐ॥ ४॥ अन्यस्यनवाच्यत्वंयुज्यते॥ ॐवदती
तिचेन्नप्राज्ञोहि॥ ॐ॥ ५॥ महतःपरंध्रुवंनिचाय्यतंमृत्युमुखात्प्रमुच्यतइतिज्ञेयत्वंवदतीतिचेन्न।

प्राज्ञः परमात्मा हि तत्रोच्यते। अणोरणीयान्महतो महीयानिति तस्यैव महतो महत्त्वं। सर्वस्मात्परस्य
महतोपि परत्वमुच्यते॥ ॐ प्रकरणात् ॐ॥ ६॥ सोध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति
तस्य ह्येतत्प्रकरणं॥ ॐ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॐ॥ ७॥ त्रयाणामेव पितृसौमनस्य
४३ स्वर्ग्याग्निपरमात्मनां प्रश्न उपन्यासश्च। अविज्ञातप्रार्थनं च प्रश्न इत्यभिधीयत इति वचनान्न विरोधः
ॐ महद्वच्च ॐ॥ ८॥ यथा महच्छब्दो महत्तत्त्वे प्रसिद्धोपि परममहत्त्वात्परमात्मन एव मुख्यः।
एवमितरेपि॥ ॥ॐ चमसवदविशेषात् ॐ॥ ९॥ यथा चमसशब्दोन्यत्र प्रसिद्धोपीदं तच्छिरः
एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न इति श्रुतेः शिरोवाचकः। एवमव्यक्तादिशब्दाः सर्वेन्यत्र प्रसिद्धा अ
पि नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरंतीत्यादिश्रुतेः परमात्माभिधायका एव अ
विशेषाच्छ्रुतेः॥ १॥ छ॥ वसंते वसंते ज्योतिषा यजेतेत्यादिकर्माभिधायकस्य कर्मक्रमादिविरोधान्न युज्य
त इत्यत आह॥ ॐ ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके ॐ॥ १०॥ ज्योतिरादिकर्मवाचकत्वेन प्रसि
द्धाभिधेयोपि स एव एष इमं लोकमभ्यार्चद्दिव्युपक्रम्य तावा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव

ब्रसू. व्याहृतिः प्राणएवप्राणश्च इत्येव विद्यादिति ह्यधीयतएके ॥ ॐ कल्पनोपदेशाच्च मध्वादिवदविरोधः भा.
१ ॥ ॐ ॥ ११ ॥ ॐ मधुविद्यादिवत् सर्वशाखार्थत्वेनपरस्यकल्पनोदपदेशाच्चनकर्मक्रमादिविरोधः ॥ २८ ६
ॐ नसंख्योपसंग्रहादपिनानाभावादतिरेकाच्च ॐ ॥ १२ ॥ यस्मिन्पंचपंचजना आकाशश्चप्रतिष्ठित इ
त्यादिषु बहुसंख्योपसंग्रहेपिनविरोधः ॥ तस्यैवाकाशादिषु नानाभावात् तदतिरिक्तस्यचानुपलम्भाच्च ॥ पंचैपंचज
२३ नानाह ॥ ॐ प्राणादयोवाक्यशेषात् ॐ ॥ १३ ॥ प्राणस्यप्राणमुतचक्षुषश्चक्षुरुतश्रोत्रस्यश्रोत्रमन्नस्या
न्नंमनसोमन इतिवाक्यशेषात् ॥ ॐ ज्योतिषैकेषामसत्यन्ने ॐ ॥ १४ ॥ तद्देवज्योतिषांज्योतिरित्यनेनकाण्वानांपं
चकं ॥ ८८ ॥ अवांतरकारणत्वेनापिसएवोच्यत इतिवक्ति ॥ ॐ कारणत्वेनचाकाशादिषुयथाव्यपदिष्टो
क्तेः ॥ ॐ ॥ १५ ॥ आकाशादिष्ववांतरकारणत्वेनसएवव्यवस्थितः ॥ यथाव्यपदिष्टस्यैवपरस्ययआत्मनआको २३
तिष्ठन्नित्यादिनाकाशादिषूक्तेः ॥ ४ ॥ ८९ ॥ सर्वशब्दानांपरमात्मवाचकत्वेकथमन्यत्रव्यवहार इति ॥ अतो का
ब्रवीत् ॥ ॐ समाकर्षात् ॐ ॥ १६ ॥ परमात्मवाचिनः शब्दा अन्यत्रसमाकृष्यव्यवह्रियंते ॥ परस्यवाचकाः श
ब्दाः समाकृष्येतरेष्वपि ॥ व्यवह्रियंतेसततंलोकवेदानुसारत इतिपाद्मे ॥ नहिकथंतेषांशब्दानांजगति

प्रसिद्धेः ॥ ॐ जगद्वाचित्वात् ॐ ॥ १६ ॥ जगतिव्यवहारो लोकस्य । ननु परमात्मनि तथा । अतो जगति प्रसि
द्धेः शब्दानां ॥ ॐ जीवमुख्यप्राणलिंगादिति चेन्न व्याख्यातं ॐ ॥ १८ ॥ तदधीनत्वात्तच्छब्दवाच्यत्वमित्यु
क्ते । तज्जीवमुख्यप्राणयोर्लिंगं अस्य यदैकांशाखां जीवो जहात्यथ सा शुष्यति । वायुना हि सर्वलोकान्नेनी
२५ यंत इत्यादिश्रुतिभ्य इति चेन्न । उपासात्रैविध्यादिति व्याख्यानत्वादिति ॥ ॐ अन्यार्थं तु जैमिनिः प्रश्न
व्याख्यानाभ्यामपि चैवमेके ॐ ॥ १९ ॥ परमात्मज्ञानार्थं कर्मादिकमपि वदतीति जैमिनिः । कस्मिन्नु भगवो
विज्ञाते सर्वमिदं विज्ञातं भवतीति तस्मै स होवाच द्वे विद्ये वेदितव्ये । कथं नु भगवः स आदेशो भवति यथा सौ
म्यैकेन मृत्पिंडेनेत्यादिना प्रश्नव्याख्यानाभ्यां । एवमपि चैके पठंति । यस्तं न वेद किमृचा करिष्यतीति ॥ ॐ
वाक्यान्वयात् ॐ ॥ २० ॥ वाक्यस्यापेक्षमन्वयो युज्यते पृथक् पृथक् स्थितस्यापि परमात्मना ॥ ॐ
प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः ॐ ॥ २१ ॥ नान्यः पंथा अयनाय विद्यत इति प्रतिज्ञासिद्धे लिंगत्वेन कर्मादि
कमुच्यत इत्याश्मरथ्यः । यस्मादेवं मनिसफलमन्यत्तस्मान्नान्यः पंथा इति ॥ ॐ उत्क्रमिष्यत एवंभावा
दित्यौडुलोमिः ॐ ॥ २२ ॥ उत्क्रमिष्यतो मुमुक्षोः कर्मादिना [illegible]व्यं साधनसाधनत्वेन । अतस्तद्वक्त्यौडु
लोमिर्मन्यते ॥ ॐ अवस्थितेरिति काशकृत्स्नः ॐ ॥ २३ ॥ सर्वपरमात्मन्यवस्थितमिति काशकृत्स्नः ॥

७॥ प्रतिज्ञा च॥ प्रकोपि चेत्

ब्रसू॰ कृष्णद्वैपायनमतादेकदेशविदः पचे॥ वदंतितेयथाप्रोक्तं न विरोधः कथंचनेतिपाठे॥ ६॥ ५॥ स्त्रीश भा॰
१ ब्दोप्यपितस्मिन्नेवेत्याह॥ ॐ प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधात्॥ ॐ॥ २४॥ हं नैतमेव पुरुषं सर्वाणि ४
नामान्यभिवदंति यथा नद्यः स्यंदमानाः समुद्रायणाः समुद्रमभिविशंत्येवमेवैतानि नामानि सर्वाण्यपि पुरु
षमभिविशंतीति प्रतिज्ञादृष्टांतानुपरोधात् प्रकृतिशब्दवाच्योपि स एव॥ ॐ अभिध्योपदेशाच्च॥ ॐ॥ स
२८ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं॥ महामायेत्यविद्येति नियतिर्मोहिनीति च॥ प्रकृतिर्वासनेत्येवं
तवेच्छानंत कथ्यत इति वचनात् तदभि[illegible]वच प्रकृतिशब्देनोच्यते॥ सोभिध्यासजुतिः स प्रज्ञः स आनंद
इति श्रुतेरभिध्या च स्वरूपमेव॥ ध्यायति ध्यानरूपोसौ सुखी सुखमयोपि च॥ परमैश्वर्ययोगेन विरु
द्धार्थतयेष्यत इति ब्राह्मे॥ ॐ साक्षाच्चोभयाम्नानात्॥ ॐ॥ २६॥ एष ह्येव पुरुष प्रकृतिरेष आले २९
ख ब्रह्मैष लोक एष आलोको यासौ हरिरादिरनादिरनंतोनंतः परमः पराह्वश्च्युप इति पैंगिश्रुतौ साक्षा
देव प्रकृतिपुरुषशब्दाम्नानात्॥ ॐ आत्मकृतेः परिणामात्॥ ॐ॥ २७॥ प्रकर्षेण करोतीति प्रकृतिरिति यो
प्र ५५ गाच्च॥ प्रकृतावपि विश्यतां परिणामे तत्स परिणाम नियामकत्वेन तत्रच्छिद्रात्मनो बहुधाकरणात्॥ अ

ब्र॰सू॰ त्वादिति। ब्रह्मेशानादिभिर्देवैर्यद्वक्तुं नैव शक्यते। तद्यस्य स्वभावः केवलस्य स तस्य वान् केवलो हर इति भा॰
२ च। न ते महित्वमन्वश्नुवंति। न ते विष्णो जायमानो न जात इत्यादि च॥ फलत्वेऽपि युक्तिविरोधे तन्मा १
नत्वात्॥ अत्रोच्यते॥ ॐ तदनन्यत्वमारंभणशब्दादिभ्यः॥ ॐ॥१५॥ स्वतंत्रत्वेन साधनासृष्टिर्लोके
दृष्टा। नैवं ब्रह्मणः। किंतु स्वरूपसामर्थ्यादेव तस्य सृष्टिः॥ किंस्विदासीदधिष्ठानमारंभणं कतमत्स्वित्क
(२७) थासीदिति ह्याक्षेपः। अधिष्ठानाद्यनुक्तेः। आदिशब्दाद्युक्तिश्च। परतंत्रो ह्यपेक्षते। न स्वतंत्रः किमपे
क्षते। साधनानां साधनत्वं यतः। किं तस्य साधनैरित्यादिभिः॥ ॐ भावे चोपलब्धेः॥ ॐ॥१६॥ स्वतंत्रसाधन
भावे प्रमाणैरनुपलभ्येत। अनुक्तं पंचभिर्वेदैर्न वस्त्वस्ति कुतश्चन। अतो वेदत्वमेतेषां यत्तत्सर्वविदुक्तादिति स्कां (२)
दे॥ अद्भ्यः संभृतः पृथिव्यै रसाच्चेत्यादिना साधनांतरप्रतीतेः कथमनुपलब्धिरित्यत आह॥ ॐ सत्वाच्चा
वरस्य ॐ॥१७॥ अवरस्य तदधीनस्य साधनस्य सत्वात्। कालश्चासीत्पुरुष आसीत्परम आसीच्च यद्दासीत्
[illegible] तदावृतमासीदथ ह्येक एव परम आसीद्यस्यैतदासीदथ ह्येतदासीदिति हि काषायणश्रुतिः॥
ॐ असद्व्यपदेशान्नेति चेन्न धर्मांतरेण वाक्यशेषात् ॐ॥१८॥ नासदासीन्नो सदासीदिति सर्वस्यासत्वः

यद्धा विरुद्धसिद्धांतावकर्तृकत्वाचेतनकर्तृकत्वजीवकर्तृत्वादयोपि । अकस्मात्सीदमाविरासीदक
स्माल्लुप्यमभ्युपैति । प्रधानादिदमुत्पन्नं प्रधानमधितिष्ठति । प्रधाने लयमभ्येति न ह्यन्यत्कारणं मतं ॥
जीवाद्भवंति भूतानि जीवे तिष्ठंत्यचंचलाः । जीवे तु लयमृच्छंति न जीवात्कारणं परं । इत्यादिश्रुतिग्रा
सा निराकृताः । यथा दुःखादिषु जीवस्यास्वातंत्र्यं एवमन्येष्वपीति दृष्टांतः । श्रुतिगतिस्तु ब्रह्मवाच
कत्वेन प्रदर्शिता यत्रान्यवाचकत्वेप्यविरोधस्तत्रान्यदप्यमुख्यतयोच्यते यत्र विरोधस्तत्र ब्रह्मैवोच्यत
इति नियमः ॥ ४ । ५ । ७ । ॐ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॐ ॥ कर्माणि विज्ञानमय
श्च आत्मा परेऽव्यये सर्व एकीभवंतीति मुक्तजीवस्य परापत्तिरुच्यते । अतस्तयोरविभा
गः ॥ अतः पूर्वमपि स एव । न ह्यन्यस्यान्यत्वं युज्यत इति चेत् । स्याल्लोकवत् । यथा लोके उदके उ
दकांतरस्यैकीभावव्यवहारेप्यंतर्भेदोस्त्येव ॥ एवं स्यादत्रापि । तथा च श्रुतिः । यथोदकं शुद्धे शुद्ध
मासिक्तं तादृगेव भवतीति ॥ स्कांदे च । उदकं तूदके सिक्तं मिश्रमेव यथा भवेत् । न चैतदेव भवति यतो
वृद्धिः प्रदृश्यते ॥ एवमेव हि जीवोपि तादात्म्यं परमात्मना । प्राप्तोपि नासौ भवति स्वातंत्र्यादिविशेष

२६ न

यैवआत्माप्रकृतिमनुविश्यात्मानंबहुधाचकारतस्मात्प्रकृतिस्तस्मात्प्रकृतिरित्याचक्षतइतिशालुवेयश्रुतिः
अविकारोपिपरमःप्रकृतिंतुविकारिणीं।अनुप्रविश्यगोविंदःप्रकृतिश्चाभिधीयतइतिनारदीये॥नचा
न्यद्रूकल्पं॥अप्रमाणिकत्वात्॥ॐयोनिश्चहिगीयतेॐ॥२८॥अव्यवधानेनोत्पत्तिद्वारकत्वंचप्रकृति
त्वंतचास्यगीयते॥यद्भूतयोनिंपरिपश्यंतिधीराइति॥व्यवधानेनसूतिस्तुपुंस्त्वंविदुर्दिनुच्यते॥सूतिरव्यव
धानेप्रकृतिरमितिस्थितिः॥उभयात्मकसूतित्वाद्वासुदेवःपरःपुमान्॥प्रकृतिःपुरुषश्चेतिशब्दैरेको
भिधीयतइतिब्रह्माण्डे॥२८॥ॐएतेनसर्वेव्याख्याताव्याख्याताःॐ॥२९॥एतेनसर्वेशून्यादिशब्दाअपि
व्याख्याताः॥एषह्येवशून्यएषह्येवतुच्छएषह्येवाभावएवह्येवाव्यक्तोदृश्योचिंत्योनिर्गुणश्चेतिमहोपनि
षदि॥शमूनंकुरुतेविष्णुर्नदृश्यःसन्परःस्वयं॥तस्माच्छून्यमितिप्रोक्तस्तोदनात्तुच्छमुच्यते॥नैषभाव
यितुंयोग्यःकेनचित्पुरुषोत्तमः॥अतोऽभाववदेनंनाश्यत्राज्ञोरास्यपि॥सर्वस्यतदधीनत्वाच्चत
द्व्याप्तिधेयता॥अन्येषांव्यवहारार्थमिष्यतेव्यवहर्तृभिरितिमल्लाकोर्मे॥एतेनतदधीनत्वादियु
क्तिसमुदायेन॥अवधारणार्थंसर्वस्याप्युक्तस्याध्यायमूलतः॥द्विरुक्तिंकुर्वतेप्राज्ञाअध्यायांतेविनि

ब्रह्म० र्णयइतिवराहसंहितायां ॥८॥८॥ इतिश्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानंदतीर्थभ भा०
२ गवत्पादाचार्यविरचिते प्रथमाध्यायस्य चतुर्थः पादः ॥४॥ समाप्तोऽयमध्यायः ॥१॥ श्रीकृष्णार्पणं १
श्रीवेदव्यासाय नमः ॥ उक्तेऽर्थे विरोधं दर्शयत्यनेनाध्यायेन । प्रथमपादे युक्त्या विरोधं प्रथमतः स्मृति
श्रीपति विरोधं ॥ ॐ स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात् ॐ ॥१॥
सर्वज्ञा हि रुद्रादयः । अतस्तेषां वचनविरोधे अप्रामाण्यमेव स्यादिति चेन्न । अन्यस्मृतीनां विष्ण्वादि
२५ भिर्नितरां सर्वज्ञैरेव कृतत्वात्ताधिक्यं च सिध्यति ॥ ॐ इतरेषां चानुपलब्धेः ॥ ॐ ॥ २ ॥ इतरेषां ता
सुस्मृतिषूक्तानां कल्पानां प्रत्यक्षतोऽनुपलब्धेर्न प्रामाण्यं तासां युक्तं । चशब्देन भागोपलब्धिरंगीकृता २५
ॐ एतेन योगः प्रत्युक्तः ॥ ॐ ॥ ३ ॥ योगफलं प्रत्यक्षोपलभ्यमिति न मंतव्यं उकाभ्यासेन ह्याल्प एव
फलदृष्टेः ॥ ॐ न विलक्षणत्वादस्य तथात्वं च शब्दात् ॐ ॥ ४ ॥ नैवं श्रुतेस्तदनुसारिस्मृतेश्च तदुक्ता
नुपलब्धेरप्रामाण्यं विलक्षणत्वान्नित्यत्वात्तदनुसारित्वाच्च न हि नित्ये दोषाः कल्प्याः स्वतश्च प्रामाण्यं ।
अन्यथानवस्थितेः । न चक्षुर्न श्रोत्रं न तर्को न स्मृतिर्वेदो ह्येवैनं वेदयंतीति भाल्लवेयश्रुतेश्च । नित्य

ब्रसू २ प्रतिषेधमात्रत्वा आसतः कारणत्वंयुक्तं। असतः कारणत्वायुक्ति विरुद्धं वेदवाक्यमित्येतदत्रप्रतिषि भा १
ध्यते। सर्वशब्दानांब्रह्मणिसमन्वयेपितदधीनत्वादर्थेषु दिक्सादिनांमुख्यत्वेनान्यस्यापिवाच्यत्वेनांगी
कारादसतः प्राप्तिः॥ तथाच श्रुतिप्राप्तमेवास न्नजा निषिध्यते। समयस्यापरि निषेधात्॥ अथायुक्ति
विरोधौ निराक्रियते॥ ॐ अपीतौतद्वत्प्रसंगादसमंजसं॥ ॐ॥ ९॥ असतउत्पत्तौप्रलयेपि सर्ववासि
त्वमेवस्यात्॥ ॐ नतुदृष्टांतभावात्॥ ॐ॥ १०॥ प्रलयेसर्ववासित्वंभावेदृष्टांतभावादेवनयुज्यते। सत
२६ उत्पत्तिः सशेषविनाशश्चहि लोके दृष्टः॥ ॐ स्वपक्षदोषाच्च॥ ॐ॥ ११॥ दृष्टांताभावादेव॥ ॐ तर्का
प्रतिष्ठानादन्यथा नुमेयमितिचेदेवमप्यनि र्मोक्षप्रसंगः॥ ॐ॥ १२॥ एतावानेवतर्कइति
प्रतिष्ठापकप्रमाणाभावात्॥ उक्तादन्यथाप्यनुमेयमितिचेत् न एवं सतिप्रमाणसिद्धेपिमोक्षेन्यथा २६
नुमेयत्वादनिर्मोक्षप्रसंगः॥ अतोयावत्प्रमाणसिद्धंतावदेवांगीकर्तव्यंनातोन्यच्छक्यं॥ यावदेवप्र
माणेनसिद्धंतावदहापयन्॥ स्वीकुर्यान्नैवत्याज्यत्रशंक्यमानमृतेक्वचिद्द्रतिवामने॥ ॐ एतेन
शिष्टापरिग्रहा अपिव्याख्याताः॥ ॐ॥ १३॥ एतेनदृष्टांतभावेनाभावेनच विशिष्टाश्च प्यपरि

त्वंचशब्दादेवप्रतीयते॥वाचाविरूपनित्ययेत्यादेः॥अनादिनिधनानित्येतिचस्मृतिः॥ ॐ दृश्यते तु
ॐ॥५॥ अधिकारिणांफलंभविष्यत्पुराणेच॥ऋग्यजुःसामाथर्वाश्चमूलरामायणंतथा॥भारतं
पंचरात्रंचवेदाइत्येवशब्दिताः॥पुराणानिचयानीहवैष्णवानिविदोविदुः॥स्वतःप्रामाण्यमेतेषांना
त्रकिंचिद्विचार्यते॥यश्चैषूक्तंनदृश्येतपूर्वोक्तमंत्रिकारणे॥नाप्रामाण्यंतुवेदेषांदृश्यतेह्यधिकारतः
इतःप्रामाण्यमन्येषांनस्वतस्तुकथंचन॥अदृश्योक्तौततस्तेषांअप्रामाण्यंनसंशयइतिच॥छ॥२॥
मृदब्रवीदापोब्रुवन्नित्यादिवचनाद्युक्तिविरुद्धोवेदइत्यतोब्रवीत्॥ ॐ अभिमानिव्यपदेशस्तुवि
शेषानुगतिभ्यां ॐ॥६॥ मृदाद्यभिमानिदेवतैवात्रव्यपदिश्यते॥तासांचेतरेभ्योविशिष्टसामर्थ्यो॥अ
नुगतिश्चसर्वत्र॥अतस्तासांसर्वमुक्तंयुज्यते॥ ॐ दृश्यतेच ॐ॥७॥ तासांसामर्थ्यंमहद्भिः॥भवि
ष्यत्पुराणेच॥पृथिव्याद्यभिमानिन्योदेवताःपृथिवीजसः॥आचिंत्यशक्तयस्तासांदृश्यतेमुनिभिश्च
ताः॥ताश्चसर्वगतानित्यंवासुदेवैकसंश्रयाइति॥३॥छ॥असदेवेदमग्रआसीत्॥असतःसदजा
यतेत्यादिनासतःकारणत्वोक्तेर्विरोधइत्यतोवक्ति॥ ॐ असदितिचेन्नप्रतिषेधमात्रत्वात् ॐ॥८॥

व्यपदेशाभेति चेन्न। अव्यक्तत्वपारतंत्र्यादिधर्मेण हि तदुच्यते। तम आसीदिति वाक्यशेषात्। नचान्यत्र
प्रमाणमस्ति। अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्यः। अनाद्यनंतं जगदेतदीदृक्
प्रवर्तते नात्र विचार्यमस्ति। नचान्यथाभूत्क्वापि च कस्य चेदमभून्मुरानापि तथा भविष्यत्। असत्यमप्रतिष्ठं ते
जगदाहुरनीश्वरं। असत्यमाहुर्जगदेतदज्ञाः शक्तिं हरेर्येन विदुः परां हि ये। सत्स्वरूपं जगदेतदीदृक् सृष्ट
स्त्वभूत्सत्यकर्माभिहासा। अथैनमाहुः सत्यकर्मेति सत्यं ह्येवेदं विश्वमसौ सृजते। अथैनमाहुर्नित्यकर्मेति
नित्यं ह्येवासौ कुरुते यश्चिकेत सत्समित्त्वं नमोघं वसु स्पार्हमित्यादिवचनेभ्यश्च। परस्परविरोधे तु वाक्यानां
यत्रयुक्तता तथैवार्थः परिज्ञेयो नावाक्यायुक्तिरिष्यत इति ब्रह्मसंहितायां। विरुद्धवद्भतीयं तेषाममायत्र
वै मिथः। तत्र दृष्टानुसारेण तेषामर्थोन्ववेक्ष्यत इति च। ईशो नीशो जगन्मिथ्या न पूज्यो गुरुरित्यपि। इत्यादि
वद्विरुद्धा निष्प्रमाणान्यथयुक्तयः। प्रमाणैर्बहुभिर्ज्ञेया आभासा इति वैदिकैः। वेदवेदानुसारेषु विरोधेन्या
र्थकल्पना। अन्येषां तु विरुद्धानां विप्रलंभोथवा भ्रम इति च भागवततंत्रे। शास्त्रार्थयुक्तोनुभवः प्रमाणं
तूत्तमं मतं। मध्यमं ह्यागमो ज्ञेयः प्रत्यक्षं त्वधमं स्मृतं। प्रत्यक्षयोरागमयोर्विरोधे निश्चयाय तु। अनुमाद्यान
स्वतंत्राः प्रमाणपदवीं ययुरिति पुरुषोत्तमतंत्रे। ॐ युक्तेः शब्दांतराच्च ॐ॥१८॥ साधनानां साधनत्वेय

ब्रसू दासाधीनमिष्यते। तदासाधनसंपत्तिरैश्वर्यमेवेति। काण्वेदिखादेः साधनांतरेण सृष्टिर्युक्ता। अथ्यः भा०
१ संभूतो हिरण्यगर्भः इत्यस्रष्टाविसादिशब्दांतराच्च। ॐ पटवच्च ॐ।।२०।। साधनांतरेणापरादिसृष्टिर्दृष्टा। ॐ १
यथा प्राणादिः ॐ।।२१।। तच्च साधनजातं तेनानुप्रविष्टमेव। यथा शरीरेंद्रियादिः। प्रकृतिं पुरुषं चैव प्रविश्य
पुरुषोत्तमः। क्षोभयामास भगवान्सृष्ट्यर्थं जगतो विभुरिति च कौर्मे। जीवकर्तृत्वपक्षः श्रुतिप्राप्तो विस्त
रान्निराक्रियते। ॐ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः।।२२।। जीवकर्तृत्वे हिताकरणमहित भेदे
२८ करणं च न स्यात्। ॐ अधिकं तु भेदनिर्देशात् ॐ।।२३।। न हि ब्रह्मणः श्रमचिंतादिदोषप्राप्तिः अधिक
— शक्तित्वात्। श्रोतो मंता द्रष्टा दृष्टा घोष्टा विज्ञाता प्रज्ञाता सर्वेषां भूतानामंतरपुरुषः एष त आत्मा सः
भेद वंति रोऽश्योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येतीत्यादि निर्देशात्। ॐ अश्मादिवच्च तदनुप विरोध
पत्तिः ॐ।।२४।। चेतनत्वेप्यश्मादिवदस्वतंत्रत्वात्स्वतः कर्तृत्वानुपपत्तिर्जीवस्य। यथा दारुमयी योषिन्न २८
रः स्थिरसमाहितः। ईगयत्यंगमंगानि तथा राजन्निमाः प्रजा इति भारते। ॐ उपसंहारदर्शनान्नेति चे
न्न क्षीरवद्धि ॐ।।२५।। जीवेन कार्योपसंहारदर्शनात्तस्य कर्तृत्वमिति चेन्न। यथा गोषु क्षीरं दृश्यमान
मपि प्राणादेव जायते। अन्नं रसादिरूपेण प्राणः परिणयत्यसाविति वचनात्। एवं जीवे दृश्यमानो

पिकार्येपि संहारोऽस्यातंत्र्यासत्वत एव। य आत्मानमंतरो यमयति। नाहं कर्ता न कर्ता हि कर्ता यस्तु स य
दा प्रभुरित्यादेः। ॐ देवादिवदपि लोके॥ ॐ॥२६॥ न च कर्तुरीश्वरं स्याद्दृष्टिविरोधः। देवादिवद्दृश्य
त्वशक्तियोगात्। लोके पिशाचादीनां नादृश्यशक्तिर्दृष्टा किमीश्वरस्य। न युक्तियोगाद्वाक्यानि निराकार्या
ण्यपि क्वचित्। विरोध एव वाक्यानां युक्तयो न तु युक्तय इति ब्रह्मसंहितायां॥ ॐ कृत्स्नप्रसक्तिर्निरवयव
त्वशब्दकोपो वा॥ ॐ॥२७॥ अयं च दोषो जीवकर्तृत्वपक्षे। एकेनांगुष्ठमात्रेण प्रवर्तमानो पिपूर्णप्रवृ
त्तिः स्यात्। न च तद्युज्यते। सामर्थ्यैकदेशादर्शनात्। न चैकदेशेन निरवयवत्वात्। अथ यः स जीवः स नि
त्यो निरवयवो ज्ञाता ज्ञाता सुखी दुःखी शरीरेंद्रियस्थ इति भाल्लवेयश्रुतिः। न चोपाधिकृतोंऽशः स एव
अंश उपहित इति द्वित्वापेक्षत्वात्। न चान्यत्कल्प्यं। यद्धि युक्त्या विरुध्येत तदीशकृतमेव हीति गत्यं
तरोक्तेः॥ ॐ श्रुतेस्तु शब्दमूलत्वात्॥ ॐ॥२८॥ न चेश्वरपक्षेयं विरोधः। योऽसौ विरुद्धो विरुद्धो मनुरमनुर रश
न्वागिंद्रो निंद्रः प्रवृत्तिरप्रवृत्तिः स परः परात्मेति पैंग्यादिश्रुतेरेव शब्दमूलत्वाच्च न युक्तिविरोधः। यदुक्तं क्यो
न तद्युक्तिविरोधं शक्नुयात्क्वचित्। विरोधे वाक्ययोः क्वापि किंचित्साहाय्यकारणमिति पुरुषोत्तमतंत्रे॥ ॐ॥
ॐ आत्मनि चैवं विचित्राश्च हि॥ ॐ॥२९॥ परमात्मनो विचित्राश्च शक्तयः संति नान्येषां। विचित्रशक्तिः पुरु

२८

ब्र.सू. षःपुराणोनचान्येषांशक्यायस्तादृशाःस्युः।एकोवशीसर्वभूतांतरात्मासर्वान्देवानेकएवानुविष्टइतिश्वेताश्व भा.
२ तराश्रुतिः॥ॐ स्वपक्षदोषाच्च॥ॐ॥३०॥ येदोषाइतरत्रापितेगुणाःपरमेमताः।नदोषःपरमेकश्चिद्गुणाए १
वनिरंतराइतिवचनात्।जीवपक्षएवदोषोनपरपक्षे।अथयःसदोषःसोंजनःसजनिःसजीवोयःसनि
र्दोषोनिष्कलःसगुणःपरःपरात्मेतिकौषायणश्रुतिः॥ॐ सर्वोपेताचतद्दर्शनात्॥ॐ॥३१॥ सर्वैर्युक्ताश
क्तिभिर्देवतासोपरेतियांप्राहुरजस्रशक्तिं।नित्यानंदानित्यरूपाजराचयाशाश्वतालेतिचयांवदंतीतिचतुर्वेदशि
२९ खायां।अतोनकेवलंविचित्रशक्तिःकिंतुसर्वशक्तिरेव॥ॐ विकरणत्वान्नेतिचेत्तदुक्तं॥ॐ॥३२॥ नचकरणा
भावादनुपपत्तिरितियुक्तं।अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णः।सवेत्तिवेद्यंनचतस्या
स्तिवेत्तातमाहुरग्र्यंपुरुषंमहांतं।नतस्यकार्यंकरणंचविद्यतेनतत्समश्चाभ्यधिकश्चदृश्यते।परास्यशक्ति
र्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचेत्यादिश्रुतिभ्यः।सर्वोपेताचेतिसामान्यपरिहारेपिविशेषयु
क्त्यर्थंपुनराशंका॥ ॥यत्प्रयोजनार्थंसृष्ट्यादिस्तदूनत्वादपूर्णत्वंस्यात्॥ॐ नप्रयोजनवत्वात्॥ॐ॥३३॥ २९
अथैषएवपरमआनंदइत्यादिनाप्तकामत्वान्नप्रयोजनायसृष्टिः।किंतु॥ॐ लोकवत्तुलीलाकैवल्यं॥ॐ
॥३४॥ यथालोकेमत्तस्यसुखोद्रेकादेवनृत्तगानादिलीलानतुप्रयोजनापेक्षया।एवमेवेश्वरस्यनारायण

संहितायां च । सृष्ट्यादिकं हरिर्नैव प्रयोजनमपेक्ष्य तु । कुरुते केवलानंदाद्यथा मत्तस्य नर्त्तनं । पूर्णानंदस्य त
स्येह प्रयोजनमतिः कुतः । मुक्ता अप्याप्तकामाः स्युः किमु तस्याखिलात्मन इति । देवस्यैष स्वभावोयमाप्तकाम
स्य का स्पृहेति च श्रुतिः । सर्वकर्तृत्वे वैषम्यनैर्घृण्ये तस्येत्यत आह । ॐ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा
हि दर्शयति ॐ ॥३५॥ कर्मापेक्षया फलदातृत्वान्न तस्य वैषम्यनैर्घृण्ये । पुण्येन पुण्यं लोकं नयति पापे
न पापमिति हि श्रुतिः ॥ ॐ न कर्माविभागादिति चेन्नानादित्वात् ॐ ॥३६॥ यदपेक्षया सोपि फलं ददाति न
तत्कर्म । एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो
निनीषत इति श्रुतेः । कर्मणोपि तन्निमित्तत्वादिति चेन्न । तस्यापि पूर्वकर्मकारणमित्यनादित्वात्कर्मणः ॥ भ
विष्यत्पुराणे च । पुण्यपापादिकं विष्णुः कारयेत्पूर्वकर्मणा । अनादित्वात्कर्मणश्च न विरोधः कथंचने
ति ॥ ॐ उपपद्यते चाप्युपलभ्यते च ॐ ॥३७॥ न च कर्मापेक्षत्वेनेश्वरस्यास्वातंत्र्यं । द्रव्यं कर्म च कालश्च
स्वभावो जीव एव च । यदनुग्रहतः संति न संति यदुपेक्षयेत्यादिना कर्मादीनां सत्त्वस्यापि तदधीनत्वात् । न
च पुनर्वैषम्याद्यापातेन दोषः । तादृशवैषम्यादेरुपलभ्यमानत्वात् । स कारयेत्पुण्यमथापि पापं न तावता
दोषवानीशितापि । ईशो यतो गुणदोषादिसत्त्वे स्वयं परो नादिरादिः प्रजानामिति च तु वेदशिखायां । अव

ब्रसू शिष्टैरूपसंहरति ॥ ॐ सर्वधर्मोपपत्तेश्च ॐ ॥ ३८ ॥ गुणाः श्रुताः सुविरुद्धाश्च देवे संसश्रुता अपि नैवा भा०
२ त्र शंका । चिंत्याश्चाचिंत्याश्च तथैव दोषाः श्रुताश्च नाजे हि न तथा प्रतीता इति सर्वगुणोपपत्तिश्रुतेश्च ॥ ३९ ॥ २
इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानंदतीर्थभगवत्पादाचार्यवि० द्वितीय० प्रथमः पादः
श्रीरामचंद्रायनमः ॥ ध ॥ इतरेषां चानुपलब्धेरिति सामान्यतो निराकरणं समयानां कृतं विशेषतो निरा
करोत्यस्मिन्पादे । अचेतनप्रवृत्तिमतं प्रथमतो निराकरोति ॥ ॐ रचनानुपपत्तेश्च नानुमानं ॐ ॥ १ ॥ श्री नी
३० अचेतनस्य स्वतः प्रवृत्त्यनुपपत्तेर्नानुमानपरिकल्पितं प्रधानं जगत्कर्तृ शब्देन प्रमाणाभावं दर्शयति ॥
ॐ प्रवृत्तेश्च ॐ ॥ २ ॥ चेतनस्य स्वतः प्रवृत्तिदर्शनाच्च ॥ ॐ पयोंबुवच्चेत्तत्रापि ॐ ॥ ३ ॥ पयोंबुवदचे
तनस्यापि प्रवृत्तिर्युक्तेति न युक्तं । एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यंदंते श्वेतेभ्यः भा०
न्यायां पर्वतेभ्यः प्रतीच्यो[illegible]यां दिशमनु । एतेन ह वाव[illegible]येमं भवतीत्यादि । तत्रापीश्वरनिमित्तप्रवृत्तिश्रुतेः ३० च
न ॐ व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॐ ॥ ४ ॥ न ह्येतत्क्रियते किंचनारादिति तद्व्यतिरेकेण कस्यापि क
॥१॥ र्मणोऽनवस्थितेरनपेक्षितमेवाचेतनवादिमतं सेश्वरसांख्यमतं निराकरोति । यथा पृथिव्याः एव पर्जन्यानु
गृहीतं जगदित्यतो ब्रवीति ॥ ॐ अन्यत्राभावाच्च न तृणादिवत् ॐ ॥ ५ ॥ यच्च किंचिज्जगत्सर्वं दृश्यते

५ तृणादिकमुत्पद्यते एवं प्रधानादीश्वरानुगृहीत

श्रूयतेपिवा।अंत[र्]बहिश्चतत्सर्वंव्याप्यनारायणःस्थितः।ब्रह्मण्येवेदमाविरासीत्‌ब्रह्मणिस्थितंब्रह्मण्ये
वलयमभ्येतिब्रह्मैवाधस्तात्‌ब्रह्मोपरिष्टाद्ब्रह्मसर्वतोब्रह्मैवेदंसर्वमित्यादिश्रुतिभ्यो।न्यत्रजगतोभावा
र्पणादीनांपर्जन्यवन्मानुग्राहकत्वमात्रमीश्वरस्य।सएवेदंभूयो।निजवीर्यचोदितांस्वजीवमायांप्रकृतिं
सिसृक्षतीं।अनामरूपात्मनिरूपनामनीविधित्समानोनुससारशास्त्रकृदितिभागवते।द्रव्यंकर्मचेत्या
दिच।चशब्देनप्रकृतिसत्त्वादिपददर्शितांगीकृतंलोकायतिकपक्षंनिराकरोति।ॐ अभ्युपगमेप्यर्थभा
वात्‌ॐ॥६॥यस्यधर्माधर्मौनिस्तस्तस्मिन्धीतेकिंप्रयोजनं।अतःस्वव्याहतेरेवोपेक्ष्यः।पुरुषोपसर्ज
त नप्रकृतिकर्तृवादमपाकरोति॥ॐ पुरुषाश्मवदितिचेत्तथापि ॐ॥७॥यथाचेतनसंबंधादचेतनमश्मा
दिकमादाययगच्छतिएवमचेतनापिप्रकृतिःपुरुषसंबंधात्प्रवर्ततइतिचेन्न।नरनेहक्रियतइतितत्रापि
तथात्वेदृष्टांताभावात्‌।ॐ अंगित्वानुपपत्तेश्च ॐ॥८॥शरीरप्रवृत्तौपुरुषस्यांगित्वात्‌ अंगीमंगीस
मादाययथाकार्यंकरोत्यसावसंगित्वव्यवहारोनुपपन्नः।प्रकृत्युपसर्जनपुरुषकर्तृत्ववादमपाकरोति॥
ॐ अन्यथानुमितौचज्ञशक्तिवियोगात्‌ॐ॥९॥शरीरसंबंधात्पुरुषःप्रवर्ततइत्यंगीकारेपिस्यतस्तस्या त
सामर्थ्याच्छरीरसंबंधएवायुक्तः॥ॐ विप्रतिषेधाच्चासमंजसं ॐ॥१०॥सकलश्रुतिस्मृतियुक्ति

ब्र॰ विरुद्धत्वाच्चानीश्वरमतमसमंजसं श्रुतयः स्मृतयश्चैव युक्तयश्चेश्वरं परं वदंति तद्विरुद्धं यो वदे सू॰
२ त्तस्मान्नचाधम इति पाद्मे ॥ ५ ॥ ॐ ॥ परमाण्वारंभवादमपाकरोति ॥ ॐ महद्दीर्घवद्वा ह्रस्वपरिमंडला भा॰ २ २
भ्यां ॐ ॥ ११ ॥ महद्वा दीर्घं वा च यथा कार्यमुत्पद्यते। एवं ह्रस्वत्वात्पारिमांडल्याच्चोत्पद्येत। वाशब्दाद
न्यथैव तयोरपि न स्यात्। विशेषकारणाभावात्। ॐ उभयथापि न कर्मातस्तदभावः ॐ ॥ १२ ॥ ईश्वरेच्छा
३१ याः नित्यत्वे तत्स्वभावेपि परमाणुकर्माभावान्नेदानीमपि तत्स्यात्। अनित्यत्वे तत्कारणाभावात्। अतः प
रमाणुचेष्टाभावात् तत्कार्याभावः। वैदिके स्वरस्य तु वेदे नैव सर्वशक्तित्वोक्तेः। सर्वमुत्पद्यते स्वत एव का प
ले विशेषांगीकृतेश्च। ॐ समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ ॐ ॥ १३ ॥ कार्यकारणादीनां स
मवायसंबंधांगीकारात्तस्य च भिन्नत्वे साम्यात् समवायापेक्षायामनवस्थितेः। न च तत्स्वरूपं। प्रथमसंबं म
धासिद्धेरेव च तदसिद्धिः। स्वनिर्वाहकत्वे समवाय एव न स्यात्। ॐ नित्यमेव च भावात् ॐ ॥ १४ ॥ ३१
नित्यत्वाच्च परमाणूनां समवायस्य च तस्यैव जनितांगीकारान्नित्यमेव कार्यं स्यात्। अन्यथा न कदा
चित्। ॐ रूपादिमत्वाच्च विपर्ययो दर्शनात् ॐ ॥ १५ ॥ रूपादिमत्वाच्च परमाणूनामनित्यत्वं तथा दृष्ट
त्वाल्लोके। ॐ उभयथा च दोषात् ॐ ॥ १६ ॥ नित्यत्वे परमाणूनां तद्वत्सर्वनित्यत्वं स्यात्। विशेषप्रमाण

३४

भावात्। अनित्यत्वे कारणाभावान्न दुःखस्य भावः॥ ॐ॥ अपरिग्रहाच्चात्यंतमनपेक्षा ॐ॥१७॥ श्रुतिस्मृत्य
परिगृहीतत्वाच्चातिशयेनानपेक्षता। आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिकामिति च मोक्षधर्मे॥ ७॥
॥८॥ परमाणुपुंजवादिमतं निराकरोति॥ ॐ समुदाय उभयहेतुकेपि तदप्राप्तिः ॐ॥१८॥ समुदायस्य
एकहेतुकत्वं न युज्यते। उभयहेतुकेप्यन्योन्याश्रयत्वात्तदप्राप्तिः। अन्य[illegible]था सर्वदा समुदायत्वं स्यात्॥ स
ॐ इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात्॥ ॐ॥१९॥ सर्वदा विद्यमानोपि समुदायः परस्प
रापेक्षया व्यवह्रियत इति चेन्न। एकं कार्यमुत्पाद्य तस्य विनिष्टत्वात्। परस्परप्रत्ययस्तदपेक्षया व्यव[illegible]द
हि ति न युज्यते। कारणे सति कार्यं भवत्येवेति तस्य नियमः॥ ॐ उत्तरोत्पादे च पूर्वनिरोधात् ॐ २०॥ कार्योत्प हार
त्तावेव कारणविनाशाच्च न विशेषकार्योत्पत्तिः॥ ॐ असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा॥ ॐ॥२१॥
कारणे विनष्टे कार्यमुत्पद्यते चेत्तत्कार्यमिति प्रतिज्ञाहानिः। तत्काले कारणमस्ति चेद्विनाशकारणाभावाद्यौग
पद्यं सर्वकार्याणां॥ ॐ प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्॥ ॐ॥२२॥ कारणे सति कार्यं भवत्ये
वेति नियमान्निःसंतानः ससंतानश्च विनाशो न युज्यते॥ ॐ उभयथा च दोषात् ॐ॥२३॥ कारणे सति कार्यं
भवत्येवेति नियमे सर्वदा कार्यभावान्न कार्यकारणविशेषः। अनियमे कार्यानुत्पत्तिः॥ ॐ आकाशे चाविशेषा

श्राव

ब्रह्मसू २ तु॥ॐ॥२४॥ दीपादिषु विशेषदर्शनात्क्षणिकत्वेनान्यत्र क्षणिकत्वमनुमीयते चेदाकाशादिष्वविशेषदर्शना भा २
दन्यत्रापि तदनुमीयेत॥ ॐ अनुस्मृतेश्च ॐ॥२५॥ तदेवेदमिति प्रत्यभिज्ञानाच्च प्रत्यभिज्ञायाभ्यां तित्वेवि
शेषदर्शनिस्यापि भ्रांतिहं॥ ६॥ ७॥ शून्यवादमपाकरोति॥ ॐ नासतोऽदृष्टत्वात् ॐ॥२६॥ अदृष्टत्वादसतः
कारणत्वं न युज्यते॥ ॐ उदासीनानामपि चैवं सिद्धिः ॐ॥२७॥ असतः कारणत्वे उदासीनानां हेयोपा[illegible]बु
द्धिवर्जितानां खपुष्पादीनामपि सकाशात्कार्यसिद्धिः। यशश्चेदन्यत्रापि न स्यादविशेषात्॥ ॐ नाभाव उ
३२ पलब्धेः ॐ॥२८॥ न च जगदेव शून्यमिति वाच्यं। दृष्टत्वात्॥ ॐ वैधर्म्याच्च न स्वप्नादिवत् ॐ॥२९॥ न च दृष्ट
स्यापि स्वप्नादिवद्भावः। तस्योत्तरकाले स्वप्नोऽयं नायं सपरिस्याद्यनुभवात्। न चात्र तादृशं प्रमाणमस्ति॥ ६॥ ८॥
विज्ञानवादमपाकरोति॥ ॐ न भावोऽनुपलब्धेः ॐ॥३०॥ न विज्ञानमात्रं जगत्तथानुभवाभावात्॥ ॐ क्ष
णिकत्वाच्च ॐ॥३१॥ ज्ञानं क्षणिकमर्थानां च स्थायित्वमुक्तं। अतश्च नैक्यं॥ ॐ सर्वथानुपपत्तेश्च ॐ॥३२॥ ३२
प्रमाणाभावात्सर्वश्रुतिस्मृतियुक्तिविरुद्धत्वाच्च नैते पक्षा ग्राह्याः॥ ६॥ ९॥ स्याद्वादिमतं दूषयति॥ ॐ नैक
स्मिन्नसंभवात् ॐ॥३३॥ सत्स्यादसत्स्यात्सदसत्स्यात्ततोऽन्य[illegible]त्स्यादित्येकस्मिन्न युज्यते। अदृष्टत्वेनासंभवात्॥
ॐ एवं चात्माकार्त्स्न्यं ॐ॥३४॥ जीवस्य शरीरपरिमितत्वांगीकारे अण्वादिशरीरस्थस्य हस्त्यादिशरीरेऽका

स्या.टू द्देय तन्नै

स्न्यं स्यात्॥ ॐ नच पर्यायादप्यविरोधो विकारादिभ्यः ॐ॥३५॥ तत्तच्छरीरस्थस्य तत्तत्परिमाणत्वमिति नमं
तव्यं। विकारित्वादनित्यत्वप्रसक्तेः॥ ॐ अंत्यावस्थितेश्चोभयनित्यत्वादविशेषात् ॐ॥३६॥ परिमाणाभावेस्य
रूपाभावप्राप्तौ स्वपरिमाणस्थितेस्तदर्थत्वे न शरीरस्थितेरुभयनित्यत्वाद्विशेषेणास्य सर्वशरीरनित्यत्वं स्यात्।
॥६॥१०॥ पाशुपतपक्षमपाकरोति। ॐ पत्युरसामंजस्यात् ॐ॥३७॥ यं कामये तं तमुग्रं कृणोमि तं ब्रह्मा
णं तमृषिं तं सुमेधां। अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हंतवा उ। अस्य देवस्य मीढुषो वया विष्णोरे
शे षस्य प्रभृ... हविर्भिः। विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत्। एको नारायण आसीन्न ब्रह्मा नेशा न
चेशोकरः इत्यादिश्रुतेः। पारतंत्र्येणासमंजसत्वान्न पशुपतिरीश्वरो जगत्कर्त्ता॥ ॐ संबंधानुपपत्तेश्च ॐ॥
३८
अशरीरत्वात्तस्य जगता संबंधो न युज्यते। कर्तृत्वेन मृतपुरुषवत्॥ ॐ अधिष्ठानानुपपत्तेश्च ॐ॥३९॥ भूमी
पृथिव्याद्यधिष्ठाने स्थितो हि कुलालादिः कार्यं करोति। नचास्य तदस्ति॥ ॐ करणवच्चेन्न भोगादिभ्यः॥ ॐ॥
इदमेव जगत्तस्य करणवदधिष्ठानादिरूपं नित्यस्यापि कस्यचिच्छ्रावा युज्यत इति चेन्न। भोगादिप्राप्तेः। उत्पत्तिं
विनाशौ सुखदुःखभोगाश्च प्राप्यं तेत तद्गताः॥ ॐ अंतवत्त्वमसर्वज्ञता वा ॐ॥४१॥ देहवत्त्वे हेतवत्त्वमन्यथा ज्ञाना
भावः शरीरिण एव ज्ञानो सन्ति दृष्टा विष्णोस्तु श्रुत्यैव सर्वविरोधाः परिहृताः यद्दासको भगवांस्तदा स्थिका

ब्र.सू. व्यक्तिः किमात्मकोभगवान्ज्ञानात्मक ऐश्वर्यात्मकः शक्त्यात्मक इति बुध्दिमनोंगप्रसंगवत्तांभगवतोप भा
२ क्षयामहे बुध्दिमां नोयानंगप्रसंगवानिति सद्देहः सुखगंधश्च ज्ञानशौः सप्तराक्रमः ज्ञानज्ञानः सुख
सुखः सविष्णुः परमोक्षर इत्यादिकया॥ ६१॥ ४१॥ श्रीशक्तिपक्षं दूषयति॥ ॐ उत्पत्त्यसंभवात् ॐ॥ ४२॥
न हि पुरुषाननुगृहीतस्त्रीभ्यउत्पत्तिर्दृश्यते॥ ॐ न च कर्तुः करणं ॐ॥ ४३॥ यदि पुरुषोंगीक्रियते तस्यापिकर
३२ णाभावादनुपपत्तिः॥ ॐ विज्ञानादिभावे वा तदप्रतिषेधः ॐ॥ ४४॥ यदि विज्ञानादिकरणं तस्यांगीक्रि
यते तदा तत एव सृष्ट्याद्युपपत्तेरीश्वरवादांतर्भाविः॥ ॐ विप्रतिषेधाच्च ॐ॥ ४५॥ सकलश्रुत्यादिवि
रुध्दत्वाच्चासमंजसं॥ ४५॥ ६१॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानंदतीर्थभ
गवत्पादविरचिते द्वितीयाध्यायस्य द्वितीयः पादः॥ ७॥ ॐ॥ श्रीकृष्णार्पणमस्तु॥ ७॥ श्री॥ श्री॥
श्रीवेंकटेशायनमः॥ जीवपरमात्माधिभूताधिदैवेषु श्रुतीनां परस्परविरोधमपाकरोत्यनेनपादेन॥ ॥ ३३
ॐ न वियदश्रुतेः ॐ॥ १॥ न वियदुत्पद्यते न ह्यनुत्पत्तिः श्रुतेः॥ ॐ अस्ति तु ॐ॥ २॥ अस्त्येवोत्पत्तिश्रुतिः
आत्मन आकाशः संभूत इत्यादि॥ ॐ गौण्यसंभवात् ॐ॥ ३॥ अनादित्वेऽप्ययमाकाशः शून्यो लौकिक इ

स्यादिश्रुतिर्गौणी। अन्यथोत्पत्तिश्रुतिबाहुल्यासंभवात् ॥ ॐ शब्दाच्च ॐ ॥ ३ ॥ अथ ह वाव नित्यानि पुरुषः
प्रकृतिरात्मा काल इति। अथ ह नित्यानि प्राणः श्रद्धाभूतानि भौतिकानीति। यानि ह वा [illegible] उत्पत्ति
मंति तान्यनित्यानि। यानि ह वा अनुत्पत्तिमंति तानि नित्यानि न ह्येतानि कदाचनोत्पद्यंते न विलीयंते पुरु
षः प्रकृतिरात्मा काल इति। अथैतान्युत्पत्तिमंति चानुत्पत्तिमंति च प्राणः श्रद्धाकाश इति भागशो ह्युत्पद्यंत इ
ति भाल्लवेयश्रुतेश्च ॥ ॐ स्याच्चैकस्य ब्रह्मशब्दवत् ॐ ॥ ४ ॥ स्यादेवैकस्योत्पत्तिमत्त्वं च गौणमुख्यापेक्ष
या। यथा ब्रह्मशब्दः। अथ कस्मादुच्यते परं ब्रह्म बृंहति बृंहयति चेति श्रुतेः। परे ब्रह्मण्यपि मुख्योऽपि गौणत्वे
न विरिंच्यादिष्वपि वर्तते। अत एव वा ब्रह्मत्वं च तेषां। एवमत्राप्यनुत्पत्तिमच्छब्दः ॥ ॐ प्रतिज्ञाहानिरव्यति
रेकाच्छब्देभ्यः ॐ ॥ ५ ॥ ब्रह्मणोऽन्यस्य नित्यत्वे इदं सर्वमसृजतेति प्रतिज्ञाहानिः। आकाशस्यापि सर्वस्मा
द्व्यतिरेकात्। आत्मा वा इदमेक एवाग्र आसीदित्यादिश्रुतिभ्यः ॥ ॐ यावद्विकारं तु विभागो लोकवत्
ॐ ॥ ६ ॥ विभक्तत्वाच्च विकारित्वं युक्तं। विकारिण एव हि लोके विभक्ता दृश्यंते। एको विभक्तः परमः
पुरुषो विष्णुरुच्यते प्रकृतिः पुरुषः कालस्त्रयः [illegible] विभागतः। चतुर्थस्तु महान्प्रोक्तः पंचमाहंकृतिर्मता। एते

एतत् सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयं ब्रह्म वा इदमग्रे नैव किंचनासीत् ॥

सू. २
तद्विभागेन जायंते आकाशाद्याः पृथक् पृथक्। यो विभागी विकारी स सो विकारः परो हरिः। अविभा
गात्परानंदो नित्यो नित्यगुणात्मकः। विभागो ह्यल्पशक्तिः स्यान्न तदस्ति जनार्दन इति ब्रह्मसंहितायां॥१॥ भा ३
॥९॥ अथ ह नित्याश्चानित्याश्चेति जो बन्नान्याकाशादीनि तान्यनित्यानि वायुर्वै नित्यो वायुना हि सर्वाणि
चेतनाश्चा भूतानि नीयंते। अथ च चेतनाश्चेति जो बज्ञान्याकाशादीनि तान्यचेतनानि वायुना हि सर्वाणि भूता वायुर्वा
नि विज्ञायंते। कविर्दंगनमस्यापेरधास्रःपुरादेवा अनवद्यासः आसन् निवीयवेमन वेवाधिलाया चेतनो
ग्र ३। वासा नुषसंसूर्येण सा वा एषा देवतानां दिर्ध्येयं पवत इति। यस्य नादिर्न मध्यं नांतो नोदयो नानि
म्लोचश्चेत्यादिश्रुतिभ्यो वायोरनुत्पत्तिरित्यतो ब्रवीति॥ ॐ एतेन मातरिश्वा व्याख्यातः ॐ॥७॥ एते
न मुख्यामुख्यानुत्पत्तिवचनेन विभक्तत्वाच्च वाय्वनुत्पत्तिश्रुतिरपि व्याख्याता। नित्यः परमनित्यश्च तथा
नित्यः नित्यमरस्तथा। चतुर्थं तज्जगत्सर्वं परानित्यं तु पार्थिवं। अनित्यानि तु भूतानि नित्यो वायुरुदाहृतः। परस्तु ३।
नित्यः पुरुषः प्रकृतिः काल एव च। एतच्चतुष्टयं विष्णुः स्वयमेव परात्परः। प्रतियूह्य व्यूह्य चासावतो विभुः
ऽयं च जनार्दनः। धारयत्यनिशं देवो नित्यानंदैककल्पपरतिकौर्मे॥९॥२॥ ॐ असंभवस्तु सतोऽनुपप

ते: ॐ ॥ ८ ॥ असद्वा इदमग्र आसीत्ततो वै सदजायत । असतः सदजायतेत्यादिश्रुतिभ्यः सतोप्यु
त्पत्तिः श्रूयत इति चेन्न । अनुत्पत्तिरेव सतः । तुशब्देनोक्तव्यवस्थामपाकरोति । न ह्यसतः सदुत्पद्यते । अ
दृष्टत्वादनुपपत्तेः । तद्धाएतद्ब्रह्मातुर्ब्रह्मेति बृंहयति चेति । तद्धाएतदसदाहुः न ह्यासादयति कश्च
न तद्धाएतत्परमाहुः परतो हि तद् दृश्यत इति श्रुतेरसच्छब्दो ब्रह्मवाची । देवानां पूर्व्ये युगेऽसतः सदजा
यतेति । ब्रह्म वा असत्सद्भावप्रापः प्राणो वाव महानुसहु ओजो बलमित्याचक्षत इति पैंगिश्रुतिः ।
त्वं देवशक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविरादधेजः । ततो वयं सत्प्रमुखा यदर्थे बभूविमात्मन्क
रवाम किं त इति भागवते । अजायमानो बहुधा विजायत इति । प्रत्यक्षत्वं हरेर्जन्म न विकारः कथं च
न । पुरुषः प्रकृतिः कालो महदादिषु क्रमात् । विकार एव जननं पुरुषे तद्विशेषणं । परतंत्रविशेषे
हि विकार इति कीर्तित इति पाद्मे । अविकारोपि भगवान्सर्वशक्तित्वहेतुतः । विकारहेतुकं सर्वं कुरु
ते निर्विकारवान् । शक्तिशक्तिमतोश्चापि न विभेदः कथं च न । अविभिन्नापि स्वेच्छादिभेदैरपि विभाव्य
त इति भागवततंत्रे ॥ १७ ॥ ॐ तेजोतस्तथा ह्याह ॐ ॥ १० ॥ वायोरग्निरित्यादिर्नान्यत उत्पत्तिर्ग्नेः

ब्र॰सू॰ अतएव परात्तदपि जायते। तत्तेजोऽसृजतेति स्यात्। कारणत्वेनेत्युक्तेऽप्यमुख्यतया व्यपामपि शङ्कोक्त भा॰
२ त्वात्पुनरुक्तिरुभयकारणत्वनिरूपणार्थम्॥ ॐ आपः ॐ॥१०॥ ब्रह्म वा इदमग्र आसीत्तदपोऽसृजत त ३
दिदं सर्वमिति श्रुतेराप इत्युक्तेऽपि ब्रह्मण एवाबादिसृष्टिः। एतस्माज्जायते प्राणो मनः सर्वेन्द्रिया
३५ णि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीत्यादि च। कर्तासि सर्वस्य वै विष्णुरेक एव न संशयः।
इत्येषां च सत्ताख्यायत एव तदाज्ञयेति भविष्यत्पुराणे। वामने च। तत्र तत्र स्थितो विष्णुस्तत्तच्छक्तीः
प्रबोधयन्। एक एव महाशक्तिः कुरुते सर्वमञ्जसेति। घर्मात्स्वेदादिदृष्टेः पुनः प्रतिषेधः॥ ॐ॥
ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजन्तेत्यन्नसृष्टिः श्रूयते। आपः पृथिवीति
क्वचित्पृथिवीसृष्टिः। अतो विरुद्धत्वादप्रामाण्यमित्यतो वक्ति॥ ॐ पृथिव्यधिकाररूपशब्दान्तरादिभ्यः ३५
ॐ॥११॥ पृथिवी तत्रान्नशब्देनोच्यते। भूताधिकारत्वात्। कार्ष्ण्यप्रचुरा च पृथिवी। नान्नस्य तथा विशेषः।
आपश्च पृथिवी चान्नं पृथिवी वा अन्नं ता आपोऽन्नमसृजन्त पृथिवी वा अन्नमित्यादिशब्दान्तराच्च। आदिश
ब्दाद्युक्तिः। अपौरुषेयत्वेनादोषस्य वाक्यस्य नाप्रामाण्यमित्यादि। कौर्मे च। विरोधो वाक्ययोर्यत्र ना

प्रामाण्यं तदेष्यते। यथा विरुध्यतानस्यात्तथार्थः कल्प्ययोरिति। रक्तोग्निरुदकं शुक्लं कृष्णे वपृथिवीस्व
तः। नास्ति पद्माप्तिसंबधात् पीतासेसाभिधीयते। क्षत्ररक्तोप्तिसंबधाद्रक्तोदकं बहुत्वतः। शुक्लत्वमेतेव
मेव वर्णांतरगतिर्भवेत्। विष्णुवीर्याप्तियोगाच्च पीतत्वं भुवरुष्यते। स्वर्णवीर्यो हि भगवाननादिः
परमेश्वर इति व्योमसंहितायां॥ ७॥ ६॥ प्रापानांग्रंथिरसिरुद्रोप्राविशांतकः तेनाप्नेनाप्यायस्वेत्यादि
नान्यः संहृतीप्रतीयत इत्यतोब्रूते॥ ॐ तदभिध्याना देवतु तल्लिंगात्सः ॐ॥ १२॥ तस्याभिध्यानाद्धेज
नात्तत्वभावाद्भूयतैश्वों विश्वमायोनिवृत्तिरितिबंधलयस्य तदभिध्याननिमित्तत्व लिंगात्तत्कर्तृत्वं प्रती
यते। किमु साद्देजगत इत्येतस्मादेव संहारकर्ता विष्णुरिति प्रतीयते। किमु यमप्येति भुवनं सांपराये स
नो हरि घृतिमिहायुषेत्तु देवः। यइदं सर्वं विलापयतिसहरिः परः परमात्मेत्यादिश्रुतिभ्यश्चसेवशब्दः।
स्रष्टपातीच संहर्ता स एको हरिरीश्वरः। स्रष्टृत्वादिकमन्येषां दारुयोषावदुच्यते। एकदेश क्रियाचा
त्रनतु सर्वात्मिनेरितं। सृष्ट्यादिकं समस्तं तु विष्णोरेव परात्स्वदेवादिति च स्कांदे। निमित्तमात्रमीशास्य वि
श्वसर्गनिरोधयोः हिरण्यगर्भः शर्वश्च कालाख्यानूपिणस्तवेति भागवते। स ब्रह्मणा विसृजति स रुद्रे
ण विलापयति सोनुहंति लय एक एव हरिः परः परानंद इति महोपनिषदि॥ ७॥ ६॥ ९२ ९३

अ॰ २ अत एव हीदं क्रमादुत्पद्यते क्रमाद्विलीयते नासावुदेति नास्तमेतीति भाल्लवेयश्रुतौ। क्रमात्तु यः प्र पा॰ ३
तीयते। अक्षरात्परमादेव सर्वमुत्पद्यते क्रमात्। व्युत्क्रमाद्विलयश्चैव तस्मिन्नेव परात्मनीति च तुर्वेद॥
शिखायां व्युत्क्रमाल्लयः प्रतीयते अत आह॥ ॐ विपर्ययेण तु क्रमोऽत उपपद्यते च ॐ॥१३॥ क्रमव
चनमपि विपरीतक्रमापेक्षया। कर्तृप्राणादिकस्यास्य लं नाभ्यादिकस्य च। यः क्रमाद्व्युत्क्रमाच्चैव सम
हरिः पर उच्यते इत्यत एव भाल्लवेयश्रुतिवचनात्। अनुरूपक्रमेः सृष्टौ प्रतिरूपो लये क्रमः। इति क्रमे
३६ णाभगवान् सृष्टिसंहारकृद्धरिरिति च पाद्मे। पूर्वेषां सामर्थ्याधिक्याद्युपपद्यते च। वामने च पूर्वपूर्वं यतो
विष्णोः संनिधानं क्रमाधिकं। सामर्थ्याधिक्यमेतेषां पश्चादेव लयस्तथा। व्याप्तिश्चाप्यधिका तेषामत ए
व न संशय इति॥ ५॥ ८॥ ॐ अंतरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात् ॐ॥१४॥ प्रा
णान्मनो मनसश्च विज्ञानं। यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनीति लिंगाद्विज्ञानमनसी अंतरा ३६ अं
विपरीतक्रम इति चेन्न। विशेषप्रमाणाभावात्॥ ॐ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भा
वभावित्वात् ॐ॥१५॥ मनसश्च विज्ञानमिति व्यपदेशश्चराचरेष्वालोचनाद्विज्ञानं भवतीति भागा
पेक्षया स्यान्न विज्ञानतत्त्वापेक्षया श्रुतेः परमात्मापि निलीयते। अश्रुतत्वाद्दुल लयस्य निलीनशाद्वि

नापिहितत्त्वमुच्यते। तुच्छेनाभ्वपिहितं यदासीदिति। स्कान्दे च। परादव्यक्तमुत्पन्नमव्यक्ताच्च महांस्तथा
विज्ञानतत्त्वं महतः समुत्पन्नं चतुर्मुखात्। विज्ञानतत्त्वाच्च मनो मनस्तत्त्वाच्च खादिकं। एवं बाह्या परा सृष्टि
रंतस्त्वस्य व्यपेक्षया। विपरीतक्रमो ह्यस्योपायस्मादंते हरे दृशीरिति॥ ६॥ १५॥ ॐ नात्माश्रुतेर्नित्यत्वाच्च
ताभ्यः ॐ॥ १६॥ स इदं सर्वं विलाप्यांतस्तमसि विलीनस्तं हि ... आप्य व्युत्तिष्ठते स इदं सर्वं विसृजति विलाप
यति विस्थापयति प्रस्थापयत्याच्छादयति प्रकाशयति विमोचयत्येक एवेति भाल्लवेयश्रुतेः। स एतस्मिंस्त
मसि विलीनः प्रकृतिं पुरुषं कालं चानुपश्यति। नैनं पश्यति कश्चनेति पैंगिश्रुतेः। नित्यो नित्यानां चेतन
श्चेतनानां स नित्यो निर्गुणो विभुः परमः परात्मा॥ नित्यो विभुः कारणो लोकसाक्षी परो गुणैः सर्वदृक् शा
श्वतश्चेत्यादिश्रुतिभ्यो नित्यत्वाच्च॥ १७॥ १०॥ नित्यो नित्यानामिति जीवस्यापि नित्यत्वमुक्तं। सर्वे एते चि
दात्मानो व्युच्चरंतीत्युत्पत्तिरुच्यते। अतो विरोध इत्यत आह॥ ॐ ज्ञोत एव ॐ॥ १८॥ जीवोप्यत एव
परमेश्वरादुत्पद्यते शब्दादेवात। ते वा एते चिदात्मानो विनष्टाः परं ज्योतिर्निविशंति अविनष्टा एवोत्पद्यं
तेन विनश्यंति कदाचनेति काषायणश्रुतिः॥ ॐ युक्तेश्च ॐ॥ १९॥ नित्यस्यापि हि जीवस्योपा

ब्रह्म ध्यपेक्षयोत्पत्तिर्युज्यते। उत्पद्यंते चिदात्मानो नित्यानित्याः परात्मनः। उपाध्यपेक्षया तेषामुत्पत्तिरिति गीय भा० ३
२ त इति व्योमसंहितायां॥ १८॥ ११ व्याप्ता ह्यात्मानश्चेतना निर्गुणाश्च सबलात्मानः सर्वरूपा अनंता इति काण्व
यणश्रुतौ व्याप्तत्वं प्रतीयते। अणुर्ह्येष आत्मा यं वा एते सिनीतः पुण्यं चापुण्यं चेति गोपवनश्रुतावणु
त्वमित्यतो विरोध इत्यतो ब्रवीति॥ ॐ उत्क्रांतिगत्यागतीनां ॐ॥ १९॥ तेनोत्क्रामाद्यपुरे च। सोऽस्माच्छरी
रादुत्क्रम्यामुं लोकमभिगच्छत्यमुष्मादिमं लोकमागच्छति। स गर्भोभिवर्तते स प्रसूयते स कर्म कुरुत इति पौ
३ ष्यायणश्रुतेस्तत्रस्था तं प्रतीतेः। एकः प्रसूयते जंतुरेक एव प्रमीयते। एकोनभुंक्ते सुकृतमेक एव
च दुष्कृतमित्यादेश्च स्वयमेवेत्यतो वक्ति॥ ॐ स्वात्मना चोत्तरयोः ॐ॥ २०॥ स एतेनैव स्वात्मना ४
परेणोजायते परेणाकर्म कुरुते परेणानीयते परेणानीयते तं वा एतमभिवदंति स्वात्मेति। एष ह्येवा
यो नंदमादत्त एष ह्येनं जीवमभिजीवयत्येष उत्क्रमयत्येष आगमयतीत्युत्तर[illegible]र्वाक्ययोः परमात्मनै ७
वोक्तत्वादयः॥ ॐ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॐ॥ २१॥ व्याप्ता ह्यात्मानश्चेतना निर्गुणा
श्चेति व्याप्तिश्रुतेर्नाणुर्जीव इति चेन्न स आत्मेदं सृजति स ह्यधिदं विशति अंतर्बहिश्च बहुधेदम

५ परेणैवेमं गर्भमनुप्रविशति

नुप्रविश्यात्मनो भिनयति स आत्मा स आत्मा नः सर्वेशः स विष्णुः स परः परो वरीयानिति परत्वाधि मा
कारत्वात्। एकशब्दैर्द्विशब्दैश्च बहुशब्दैश्च केशवः। एक एवोच्यते वेदैस्तावता नास्य भिन्नतेति भविष्य
त्पुराणे च। तदयं प्राणेष्वधितिष्ठति तदुक्तमृषिणा तेन यातमित्यादि च॥ ॐ स्वशब्दोन्मानाभ्यां च ॐ॥
२२॥ एषोऽणुरात्मा त्युक्तो मानशक्तेस्तथाप्यसौ प्रमितिं याति वेदैः॥ पूर्णोऽचिंत्यः सर्ववेदैकयोनिः सर्वाधी
शः सर्ववित्सर्वकर्तेति वाक्यशेषे आत्मशब्दोन्मानाभ्यां च। आत्मा मेयः परं ब्रह्म परानंदादिकाः सिधाः
वदंति विष्णुमेवैकं नान्यत्रासां गतिः क्वचिदिति च कौर्मे॥ ॐ अविरोधश्चंदनवत् ॐ २३॥ अणोरपि जी
वस्य सर्वशरीरव्याप्तिर्युज्यते। यथा हरिचंदनविप्रुष एकदेशपतितायाः सर्वशरीरव्याप्तिः। अणुमात्रो
ऽप्ययं जीवः स्वदेहं व्याप्य तिष्ठति। यथा व्याप्य शरीराणि हरिचंदनविप्रुष इति ब्रह्मांडपुराणे॥ ॐ
अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॐ॥ २४॥ सम्यगसम्यगवस्थानविशेषाद्युज्यते चंद
नस्येति चेन्न हृदि ह्येष आत्मेति जीवस्यापि तथाभ्युपगमात्॥ ॐ गुणाद्वा लोकवत् ॐ॥ २५॥ यथालो
कस्य प्रकाशगुणेन व्याप्तिर्ज्योतीरूपेणाव्याप्तिरेवं चिद्गुणेन व्याप्तिर्जीवरूपेणाव्याप्तिरिति वा स्कांदे च।

ब्रह्म असंम्यक्संम्यगितिचह्यवस्थाभेदतः सुराः। व्याप्या व्याप्तियुतास्त्वन्ये चिद्रूपा नैव नान्यथा। चिद्रूपस्य भा॰
२ स्वरूपत्वात्तेव्याप्तिश्चेतियुज्यते। शक्तियोगात्सुराणां च विविधा च व्यवस्थितिरिति॥ ५५॥ १२॥ स नियोः ३
निरवयवो पुंण्ययुक्पापयुक्स इमंलोकमेमुंचावर्तते। स एकधा न स सधा न दशधेति गौपवनश्रु
३८ तावेकस्याबहुत्वंप्रतीयते। स पंचधा स सप्तधा दशधा भवति। शतधास्त्वकसधा च गच्छति स विमुच्यत इति
पाराशर्यायणश्रुतौ बहुरूपत्वंप्रतीयते। अतो विरोधं परिहरति॥ ॐ व्यतिरेको गंधवत्तथा च दर्शयति
ॐ॥ २६॥ यथा पुष्पाद्गंधः पृथग्गच्छति एवमंशिनो जीवा ह्यंशाः पृथग्गच्छंति। अथैक एव सन्गंधव
द्व्यतिरिच्यते अथैको भवत्यथ बह्वी भवति। तं यथा यथेश्वरः कुरुते तथा तथा भवति सोऽचिंत्यः परमो
गरीयानिति शांडिल्यश्रुतिः। अचिंत्यये शशक्त्यैव ह्येको वयव वर्जितः। आत्मानं बहुधा कृत्वा क्रीडते ३८
योगसंपदेतिच पाद्मे॥ ५५॥ १३॥ तत्त्वमस्यहं ब्रह्मास्मीत्यादिषु जीवस्य परेणाभेदः प्रतीयते। नियो-
नियानां चेतनश्चेतनानां द्वा सुपर्णेत्यादिषु भेदः अत उच्यते॥ ॐ पृथगुपदेशात् ॐ॥ २७॥ भिन्नोऽचिंत्यः
परमो जीवसंघात्पूर्णः परो जीवसंघो ह्यपूर्णः। यतस्त्वसौ नित्यमुक्तोप्ययं च बंधान्मोक्षं तत एवाभिवांछे

दितिसोपपत्तिककौशिकश्रुतेर्भिन्न एव जीवः॥ ॐ तद्गुणसारत्वात्तु व्यपदेशः प्राज्ञवत् ॐ॥२९॥ ज्ञाना
नंदादिब्रह्मगुणा एवास्य यतः सारः स्वरूपमतोऽभेदव्यपदेशः। यथा सर्वगुणासक्तत्वात्सर्वसक्तत्वं ब्रह्मण
उच्यते सर्वं खल्विदं ब्रह्मेति। भविष्यसर्वाणि च। भिन्ना जीवाः परो भिन्नस्तथापि ज्ञानरूपतः। प्रोच्यन्ते ब्रह्मरू
पेण वेदवादेषु सर्वश इति॥ ७॥१७॥ जीवस्योत्पत्तिरुक्ता। अनन्तस्य सोऽनादिना पुण्येन पापेन चानुबन्धः
३९ परेण निर्मुक्तश्चानन्त्याय कल्प्यत इति अनादिकर्मसंबन्धश्चानन्त्यासिद्धिश्च न युज्यत इत्यत आह॥ ॐ यावदा वा
त्मभावित्वाच्च न दोषस्तद्दर्शनात् ॐ॥३०॥ यावत्परमात्मा तिष्ठति सर्वो घनं तं तत्त्वेन। एवं जीवोऽपि। नित्यः परो
मा नित्यो जीवो नित्यास्तस्य धातवो उत्पद्यन्ते म्रियन्ते च मुच्यन्ते चेति चाग्निवेश्यश्रुतिः। आत्मा नित्यः सुखदुः
खे हि नित्ये जीवो नित्यो धातुरस्य तु नित्यः इति च भारते॥ ७॥१५॥ विज्ञानात्मा सह देवैश्च सर्वैः स आनं
दः स बलः स ओजः स परेणामुं लोकं नीयते स विमुच्यत इति जीवस्य ज्ञानानन्दादिरूपत्वमुच्यते। स दुः
खाद्विमुक्तश्चानन्दी भवति। सोऽज्ञानाद्विमुक्तो ज्ञानी भवति सोऽबलाद्विमुक्तो बली भवति स नित्यो नि
रातंको भवतीष्यत इति पैंगिश्रुतौ। आ[illegible]नन्दादिरूपत्वं प्रतीयते अत आह॥ ॐ पुंस्त्वादिवत्त्वस्य सतोऽभि

ब्र व्यक्तियोगात् ॐ॥३०॥ यथाबालस्यसदेवपुंस्त्वं यौवनेभिव्यज्यते। एवंसतामेवानंदादीनां व्यक्त्यपे स्म
२ क्षयातदुक्तिः। बलमानंद ॐ जश्चसहो ज्ञानमानाकुलं। स्वरूपाण्येवजीवस्यव्यज्यंतेपरमाद्धिभोरि २
तिगौपवनश्रुतिः॥ ॐ नित्योपलब्ध्यनुपलब्धिप्रसंगोन्यतरनियमोवान्यथा ॐ॥३१॥ व्यक्त्यनं
गीकारे देवानां नित्योपलब्धिरानंदादीनामसुराणां नित्यानुपलब्धिर्मनुष्याणां नित्योपलब्ध्यनुप
३९ लब्धीचप्रसज्येते। नित्यानंदो नित्यज्ञानो नित्यबलो परमात्मानैवमसुराःएवमनेवंचमनुष्याइति॥
आग्निवेश्यश्रुतिः। भविष्यत्सर्वापिच। नित्यानंदज्ञानबलाःदेवानैवंतुदानवाः। दुःखोपलब्धिमात्रा
स्तेमानुषास्तूभयात्मकाः। तेषांयदन्यथादृश्यंतदुपाधिकृतंमतं। विज्ञानेनात्मयोग्येन निजेरूपेव्यव ३९
स्थिति॥ सम्यग्ज्ञानंतुदेवानांमनुष्याणांविमिश्रितं। विपरीतंतुदैत्यानांज्ञानस्यैवंव्यवस्थितिरि
ति॥ छ॥१६॥ ईश्वरस्यैवकर्तृत्वमुक्तं यत्कर्मकुरुतेतदभिसंपद्यतइतिजीवस्याप्युच्यतेअत पु
आह॥ ॐ कर्ताशास्त्रार्थवत्वात् ॐ॥३२॥ जीवस्य कर्तृत्वाभावेशास्त्रस्याप्रयोजकत्वप्रसंगेजीवो
पिकर्ता॥ ॐ विहारोपदेशात् ॐ॥३३॥ स्त्रीभिर्वायानैर्वाज्ञातिभिर्वाइत्यादिनामोक्षेपि

ॐ उपादानात् ॐ ॥३४॥ साधनाद्युपादानप्रतीतेश्च ॥ ॐ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः
ॐ ॥३५॥ आत्मानमेव लोकमुपासीतेति क्रियायां व्यपदेशाच्च । अन्यथात्मैव लोकमिति निर्देशः स
स्यात् । तर्हि कथमीश्वरस्यैव कर्तृत्वमुक्तमित्यतो वक्ति ॥ ॐ उपलब्धिवदनियमः ॐ ॥३६॥ यथा व
ज्ञानइदं ज्ञास्यामीत्यनियमः प्रतीयते एवं कर्मण्यपि जीवस्य । य आत्मानमंतरो यमयतीति च श्रु
तिः । कुतः ॥ ॐ शक्तिविपर्ययात् ॐ ॥३७॥ अल्पशक्तित्वाज्जीवस्य ॥ ॐ समाध्यभावाच्च ॐ ॥ ३८।
समाधानाभावाच्चास्वातंत्र्यं प्रतीयते अतः ॥ ॐ यथा च तक्षोभयथा ॐ ॥३९॥ यथा तक्ष्णः
कारयितृनियंतृत्वं कर्तृत्वं च विद्यते । एवं जीवस्यापि ॥ ॐ परात्तु तच्छ्रुतेः ॐ ॥४०॥ सा च कर्तृत्व
शक्तिः परादेव । कर्तृत्वं करणत्वं च स्वभावश्चेतना धृतिः । यत्प्रसादादिमे संति न संति यदुपेक्षये
ति पैंगिश्रुतिः ॥ ॐ कृतप्रयत्नापेक्षस्तु विहितप्रतिषेधावैयर्थ्यादिभ्यः ॐ ॥४१॥ ततोऽप्रयोजक
त्वं शास्त्रस्य नापद्यते । कृतप्रयत्नापेक्षत्वात्तस्येरकत्वस्य । आदिशब्देन वैषम्यादि । पूर्वकर्म प्रयत्नं च
संस्कारं चाप्यपेक्ष्य तु । ईश्वरः कारयेत्सर्वं तच्चेश्वरकृतं स्वयं । अनादित्वाद्दोषश्च पूर्णशक्तित्व

40

ब्रह्म तो हरेरिति भविष्यत्पर्वणि । एतदेवं न चाप्येवं एतदस्ति च नास्ति चेति च मोक्षधर्मे ॥ ४९ ॥ १७ ॥ अंशा भा

२ एव ह्यमी जीवा अंशी हि परमेश्वरः । स्वयमंशी हरिः सर्वकारणस्य च लोहरि[illegible]ति गोपवनश्रुतावंशत्वं जीव २

भा स्यापलभ्यते । नैवांशांशिसंबंधो नापेक्ष्यो जीवः परस्य । तथापि तु यथायोग्यं फलदः प्रभुरेकराट् । न नि

यम्यः सकस्यापि स सर्वस्य नियामक इति भाल्लवेयश्रुतौ । अतो ब्रवीति ॥ ॐ अंशो नानाव्यपदेशादन्य

४० थाचापि दाशकितवादित्वमधीयत एके ॥ ॐ ॥ ४३ ॥ मां रक्षतु विष्णुर्नित्यं पुत्रोहं परमात्मनः । अवः परे

णा पितरं यो अस्यानुवेद पर एनावरेणा य स्तद्वेद स पितुष्पितासत् । यस्ता विजानात्स पितुष्पितासत्

द्वा सुपर्णा सयुजा सखाय इत्यादिना नानाव्यपदेशादंशो जीवः । तथा च पौत्रायणियश्रुतिः । अंशो ह्येष प

रस्य योयं पुमान्नुत्पद्यते म्रियते च नाना ह्येनं व्यपदिशंति पितेति पुत्रेति भ्रातेति सखेति चेति । अन्यः परोन्यो

जीवो नासौ वश्यः कुतश्चन । नायं तस्यापि कश्चनेत्यन्यथा च काषायणश्रुतिः । ब्रह्मदाशा ब्रह्मकितवा ब्रह्मैवे ४०

मे दाशा इत्यभेदेनाप्येके धीयते तथा चाग्निवेश्यश्रुतिः । अंशो ह्येष परस्य भिन्नं ह्येनमधीयिरे । अभिन्नं ह्येन

मधीयिर इति । वाराहे च । पुत्रभ्रातृसखित्वेन स्वामित्वेन पतो हरिः । बहुधा गीयते वेदे जीवांशस्तस्य

ते न तु । यतो भेदेन तस्यायमभेदेन च गीयते । अतश्चांशत्वमुद्दिष्टं भेदाभेदौ न मुख्यत इति ॥ ॥

ॐ मंत्रवर्णानु ॐ ४४ ॥ पादोस्य विश्वा भूतानीति ॥ ॐ अपि स्मर्यते ॐ ॥ ४६ ॥ ममैवांशो जीवलोके
जीवभूतः सनातन इति । अनंशत्वश्रुतेर्गतिं चाह ॥ ॐ प्रकाशादिवन्नैवं परः ॐ ॥ ४५ ॥ अंशत्वेपि नम
त्स्यादिरूपी पर एवंविधः । यथा तेजोंशस्य कालाग्नेः खद्योतस्य च नैकप्रकारता । यथा जलांशस्यामृतस
मुद्रस्य मूत्रादेश्च । यथा च पृथिव्यंशस्य मेरोर्विष्टादेश्च । अभिमानिदेवतापेक्षयैतत् । ॐ स्मरंति च ॐ
४१ एते स्वांशकलाः पुंसः कृष्णस्तु भगवान्स्वयं । अतः परं यदव्यक्तमव्यूढगुणबृंहितं । अदृष्टाश्रुतवस्तुत्वा
स जीवो यः पुनर्भवः । स्वांशश्चाथो विभिन्नांश इति द्वेधांश इष्यते । अंशिनो यत्तु सामर्थ्यं यत्स्वरूपं य ता
था स्थितिः । तदेव नाणुमात्रोपि भेदः स्वांशांशिनोः क्वचित् । विभिन्नांशोल्पशक्तिः स्यात्किंचित्सादृश्य
मात्रयुगित्यादि वाराहे । न तत्समोस्त्यभ्यधिकः कुतोन्य इति च । ॐ अनुज्ञापरिहारौ देहसंबंधाज्ज्योति
रादिवत् ॐ ४७ ॥ परानुज्ञया प्रवृत्तिः परतो बंधनिवृत्तिश्च जीवस्य प्रतीयते अंशत्वेपि देहसंबंधात्
यथात्मानमंतरो यमयति । तमेवं विद्वानमृत इह भवतीत्यादिना । ननु परमस्य । वासुदेवः संकर्ष
णः प्रद्युम्नोनिरुद्धोहं मत्स्यः कूर्मो वराहो नारसिंहो वामनो रामो रामः कृष्णो बुधः कल्किरहं शतधा

सू. २ हं सहस्रधा हमभितो हमनंतो हं नैव तेजायं तेन क्रियं तेनैषामनुज्ञानबंधोनमुक्तिः सर्वएवह्येतेपू भा. २
र्णाअजराअमृताः परमाः परमानंदा इति चतुर्वेदशिखायां । युक्तं तेच ज्योतिरादिवत् । यथा दीपो वि
ग्रहतस्तत्प्रकाशश्चैकप्रकारः शुक्लं कृष्णं कनीनिके तेन दृष्टस्याप्यक्ष्णो देहसंबंधान्नतादृशी शक्तिः
तदनुग्राह्यत्वं तेनैवारतिपरिहारश्च । यथा बाह्यामृतजलस्यामृतसमुद्रस्य चैकत्वं । तद्दृष्टस्यापि क्ष्मे
१ ष्मणः तदनुग्राह्यत्वं तेनैव विरोधिनिवृत्तिश्च । मोक्षधर्मे च । यत्किंचिदिह लोकेस्मिन्देहबद्धं विशांपते ।
सर्वं पंचभिराविष्टं भूतैरीश्वरबुद्धिजैः । ईश्वरो हि महद्भूतं प्रभुर्नारायणो विराट् । भूतांतरात्मा विज्ञे
यः सगुणो निर्गुणोपि च । भूतप्रलयमव्यक्तं शुश्रूषुर्नृपसत्तमेति वाराहे च । अंशोश्च देहयोग्यत्वाज्जी
वा बंधादिसंयुताः । अनुग्राह्याश्चेश्वरेण नतु मच्छादिको हरिः । अदेहबंधयोग्यत्वात् यथा सूर्यप्रभा
क्षिणी । यथामृतसमुद्रस्य स्थले आदेश्च द्विरूपता । अनुग्राह्यत्वमन्यस्य तेनैवारतिरोधनमिति । अं
असंततेश्चाव्यतिकरः ॐ ॥ ४८ ॥ अपूर्णशक्तित्वाज्जीवस्य नमच्छादिसाम्यं तथा च चतुर्वेदशिखा
यां । तस्यैव परमस्यैते रूपाणि कृष्णो रामः कपिल इति । तस्यैवाए तस्य पंच रूपाणि दश रूपाः

१ तस्य ति

पिशातरूपाणि सहस्वरूपाण्यमितरूपाणि तानि ह वा एतानि सर्वाणि पूर्णानि सर्वाण्यनंतानि सर्वाणि
संमितानि अथावराः सर्व एवापूर्णाः सर्व एव बध्यंते मुच्यंते च केचनेति॥ ॐ आभास एव च।
पं ॐ॥४९॥ रूपं रूपं प्रतिरूपो बभूवेति प्रतिबिंबलाच्छनसाम्यं। वाराहे च। द्विरूपावंशकौ तस्य पर
मस्य हरेर्विभोः। प्रतिबिंबांशकश्चैव स्वरूपांशक एव च। प्रतिबिंबांशका जीवाः प्रादुर्भावाः परे स्मृ
ताः। प्रतिबिंबेष्वल्पसाम्यं स्वरूपाणीतराणि हीति। सोपाधिरनुपाधिश्च प्रतिबिंबो द्विधेष्यते। जी
वईशस्यानुपाधिरिंद्रचापो यथा रवेरिति पैंगिश्रुतिः। यथैषा पुरुषे छाया एतस्मिन्नेतदाततमिति
चश्रुतिः। प्रतिबिंबानां मिथो वैचित्र्ये कारणमाह॥ ॐ अदृष्टानियमात् ॐ॥५०॥ अनादिविद्या
कर्मादि वैचित्र्याद्वैचित्र्यं॥ ॐ अभिसंध्यादिष्वपि चैवं ॐ॥५१॥ इच्छाद्वेषसुखदुःखादि वैचित्र्यं
चादृष्टादेव चशब्देन प्रतिक्षणवैचित्र्यं च॥ ॐ प्रदेशादिति चेन्नांतर्भावात् ॐ॥५२॥ न स्वर्गभूम्यादि नरक
प्रदेशवैचित्र्याद्वैचित्र्यं। तत्प्राप्तेरप्यदृष्टापेक्षत्वात्। एकदेशस्थितानामेव वैचित्र्यदर्शनाच्च॥५३॥
इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानंदतीर्थभगवत्पादविरचिते द्वितीयाध्यायस्य तृतीयः पादः॥

५२

सू॰ श्रीवेङ्कटेशाय नमः ॥ युक्तिसहितश्रुतिविरोधं श्रुतीनामपाकरोत्यनेन पादेन। प्राणा एवेदमग्र आसुस्ते भा॰
२ भ्यो भूतानि जज्ञिरे भूतेभ्योऽण्डमण्डस्यान्तस्त्विमे लोकाः अथ प्राणा एवानादयः प्राणानित्यादि काशायन ४
तु श्रुतौ प्राणानामुत्पत्तिः श्रूयते। नोपादानं हीन्द्रियाणामतोऽनुत्पत्तिरिष्यते। उपादानकृता सृष्टिः सर्वलोकेषु
वृति दृश्यते भविष्यत्सर्वदापि। एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च अत उच्यते ॥ ॐ तथा प्राणाः ॐ ॥ १
४२ यथाकाशादयः परमात्मन उत्पद्यन्ते तथा प्राणा अपि ॥ ॐ गौण्यसंभवात् ॐ ॥ २ ॥ अनादित्वश्रुतिर्गौणा
नादित्वापेक्षया। मुख्यासंभवात्। नित्यान्येतानि सौक्ष्म्येण हीन्द्रियाणि तु सर्वशः। तेषां स्थूले तूपचयः सृष्टिका
ले विधीयते। परेण साम्यसंप्राप्तेः कस्य स्यान्मुख्यनित्यतेति हि भविष्यद्वचः ॥ ॐ प्रतिज्ञानुपरोधाच्च
स ॐ ॥ ३ ॥ इदं सर्वमसृजतेति ॥ ८ ॥ १ ॥ द्विधा ह्येवेन्द्रियाणि नित्यानि चानित्यानि च तत्र नित्यं मनो नादिवा ४२
अहमनाः पुमांस्तिष्ठति अनित्यान्यन्यानीति गौणपवनश्रुतौ मनसोऽनुत्पत्तिः सयुक्तिका श्रूयते। अत आह।
तत्प्राक्श्रुतेश्च ॐ ॥ ४ ॥ मनः सर्वेन्द्रियाणि चेति पूर्वोक्तिह्रासानुवृत्तिर्मनसो युज्यते पूर्वं मनः समु
त्पन्नं ततोऽन्येषां समुद्भवः। तदनुत्पत्तिवचनमप्युपचयकारणादिति वायुप्रोक्तवचनं च शब्देन संगृ

हीतं ॥ ५॥२॥ नित्यया नित्यया स्तौमि परमात्मानमच्युतमिति । वाग्वावनित्या न ह्येषोमद्यते अस्या हि श्रु
तिरवतिष्ठत इति सयुक्तिकं पौष्यायणश्रुतौ वाचो नुमत्तिरुच्यत इत्याह ब्रवीति ॥ ॐ तत्पूर्वकत्वाद्वाचः
ॐ ॥ ५ ॥ तस्मान्मनएव पूर्वरूपं वागुत्तररूपमिति मनःपूर्वकत्वाद्वाचोनानुमत्तिः । वागिंद्रियस्य
नित्यत्वं श्रुतिसंनिधियोग्यता उमत्तिर्मनसो यस्मादनित्यत्वं कुतश्चनेति वायुप्रोक्ते ॥ ५॥३॥ ॐ ॥
सप्त प्राणाः प्रभवंति तस्मादिति श्रुतिः । सप्तैव मारुता बाह्ये प्राणाः सप्त तथात्मनि अधिदैवे तथा
ध्यात्मे संख्यासाम्यं विदो विदुरिति च स्कांदे । द्वादश वा एते प्राणाः द्वादश मासाः द्वादशादित्या द्वादश
राशयो द्वादश यज्ञा इति कौंडिन्यश्रुतौ द्वादश प्राणा दृश्यंते । अतो वक्ति ॥ ॐ सप्तगतेर्विशेषितत्वा
च्च ॐ ॥ ६ ॥ ज्ञानेंद्रियापेक्षया सप्तत्वं । गुहाशयां निहिताः सप्त सप्तेति विशेषणात् । सप्त प्राणास्त्वव
गतेः पंच प्राणाश्च कर्मणि । एवं प्राणद्वादशकं शरीरे नित्यसंस्थितमिति स्वविषयसर्ववेवचनं च शब्दात् ॥
ॐ हस्तादयस्तु स्थिते तो नैवं ॐ ॥ ७ ॥ हस्तादीनां कर्मविषयत्वान्न सह पाठः संसारस्थितिहेतुत्वा
स्थितं कर्म विदो विदुः । तस्मादुग्रदतिहि तुवाद्दानं गतिरिहोच्यत इति वायुप्रोक्तेः ॥ ५॥४॥ दिवीव चक्षु

सू २ राततमितिव्याप्तिः प्रतीयते। दूरश्रवणदर्शनादियुक्तिश्च। अणुश्रुतिः पश्य ह्यणुत्तिः [illegible]णोतिप्राणावाप्‌ भा·
णवः प्राणोर्हतं भवतीतिकौषि(?)न्यश्रुतिः अतोवक्ति।। ॐ अणवश्च ॐ।। ८ ।। न यथा ह्यणुनश्चश्वस :
प्रकाशो व्याततएवमेवास्यपुरुषस्यप्रकाशो व्याततोणुर्ह्येवैषपुरुषोभवतीतिशांडिल्यश्रुतिः। नैष
प्राणउदेतिनास्तमेत्येकलएवमध्येस्यातायेनमाहुर्मध्यमइतिमुख्यप्राणस्यानुत्पत्तिः श्रूयते। यस्मा ती
६३ त्तिर्यत्परित्यागउत्पत्तिमरणं तथा तस्योत्पत्तिर्मृतिश्चैवकथं प्राणस्ययुज्यतइतियुक्तिं वायुप्रोक्ते। अ
स्मात् एषप्राणोजायतइतिचअतआह।। ॐ श्रेष्ठश्च ॐ।। ९ ।। सोऽश्रेणतुवाएषोवेतिष्ठतेस्थूलतेन
इतिसूक्ष्मश्चाथोस्थूलश्चप्रस्तुतिनः सूक्ष्मोन्यतः स्थूलोयेनमाहुः सादिरनादिरितिसोपवेनश्रु टी
तेः।। ॐ नवायुक्रियेपृथगुपदेशात् ॐ।। १० ।। चेष्टायांबाह्यवायौचमुख्यप्राणेचगीयते। प्राणशब्द ६३
स्त्रिषुह्येषुमुख्योमुख्यःप्रकीर्तितइतिवायुक्रिययोरपिव्यपदेशादुत्पत्तिश्रुतिस्तयोर्नस्यात्। सप्राण
मसृजतखंवायुर्ज्योतिरापस्तपोमंत्राः कर्मेतिपृथगुपदेशात्‌ भूतानिचेष्टामंत्राश्चमुख्यप्राणा
दिदंजगत्। मुख्यप्राणः परस्माच्चनपरः कारणान्वितइतिवायुप्रोक्ते।। ६।। टी।। ६।। प्राणादि

दमाविरासीत्प्राणोधन्तेप्राणोभयमभ्येतिनप्राणाःकिंचिदाश्रितइति आग्निवेश्यश्रुतौ।यदाश्रया
दस्यचेष्टासोन्यंकथमुपाश्रयेत्।यथाप्रावास्तथाराजासर्वस्यैकाश्रयोप्यवृत्तिर्निर्भरते।प्राणस्यै
तद्वशेसर्वंप्राणःपरवशेस्थितः।नपरःकिंचिदाश्रितएववर्ततेपरमोयतइतिपैंगिश्रुतिःअतआ
ह॥ॐ चक्षुरादिवत्तुतत्सहशिष्ट्यादिभ्यःॐ॥१॥ चक्षुरादिवन्मुख्यप्राणोपिपरमात्मवशएव।
सर्वंहितत्परमेवतिष्ठतेप्राणश्चप्राणाश्चप्राणिनश्चसहैकएवैतान्नयतिउन्नयतिवशीकरोती
तिगौपवनश्रुतौ।चक्षुरादिभिःसहतुतद्वशेनैवशासनात्।सर्वकर्तापिसन्प्राणःपरमाधारवतः
स्थितः।कथमेवान्यथासस्याद्यतोनैवेश्वरद्वयं।अवांतरेश्वरत्वेनतस्येश्वरवचोभवेत्।अतोम
ध्यमतामाहुस्तस्यवेदेषुवैदिनः।अनन्येश्वरताप्राणेतदन्येश्वरवर्जनात्।यतोविशेषवाक्येन
ह्रियतेसमतावचः।नान्योतोस्तिद्रष्टानान्यदतोस्तिद्रष्टृइत्यादिवचनमुच्चयश्चादिशब्दोक्तः॥ॐ
अकरणत्वाच्चनदोषस्तथाहिदर्शयतिॐ॥२॥ इतरेषांप्राणानांकरणत्वान्मुख्यस्याकरणत्वात्तस्यान्ये
भ्यउत्तमत्वंयुज्यते मांउव्यश्रुतिश्च।तानिहवाएतानिसर्वाणिकरणानिअथप्राणएवाकरणस्तस्मान्मु

सू २ स्यस्तस्मान्मुख्य इत्याचक्षत इति॥ ८५७॥ ८५॥ स वै वाए ते मुख्यदासाः प्राणोपानो व्यान उदानः समान इ भा
ति। अथ प्राणो वाव संप्राडिति कौडिन्यश्रुतिः। प्राणापानादयः सर्वे मुख्यदासा यतो निशं। अतस्त द्वा
इयानि संख्यानि कर्माणि कुर्वत इति युक्तिर्वायुप्रोक्ते। मुख्यस्यैव स्वरूपाणि प्राणाद्याः पंच वायवः। स एव
प्राणिनां देहे पंचधा वर्तते निशमिति गौपवनश्रुतिः। अतो वक्ति॥ ७ पंचवृत्तिर्मनोवद्व्यपदिश्यते ७॥ ४
अथ पंचवृत्तैस्तत्र वर्तते प्राणो वाव पंचवृत्तिः। प्राणोपानो व्यानोदानः समान इति तेभ्यो वाए तेभ्यः पं
चदासाः प्रजायंते। प्राणाद्वाव प्राणोऽपानादपानो व्यानाद्व्यान उदानादुदानः समानादेव समनो य
था ह वै मनः पंचधा व्यपदिश्यते। मनो बुद्धिरहंकारश्चित्तं चेतनेति तेभ्यो वाए तेभ्यः पंच दासाः प्रजायं
ते। मनसो वाव मनो बुद्धेर्बुद्धिरहंकारादहंकारश्चित्ताच्चित्तं चेतनाया एव चेतने वमितीति॥ ८५८॥ ८५
प्राण एवाधस्तात्प्राण उपरिष्टात्प्राणो मध्यतः प्राणः सर्वतः प्राण एवेदं सर्वमिति प्राणस्य व्याप्तिः प्रती
यते। यतः सर्वं जगद्व्याप्य तिष्ठति प्राण एव तु। अतो धृतं जगत्सर्वमन्यथा केन धार्यत इति युक्तिर्वायुप्रो
क्ते। अणुनैव सृजते अणुनैव क्षाययते अ[illegible]णोऽव्ययमभ्युपैति। प्राणो वा अणुः प्राणो ह्येवं स्वव तीति
च सौत्रायणश्रुतिः। अत आह॥ ७ अणुश्च ७॥ ९८॥ स वा एष प्राणोऽणुर्महान्नामाजं न वीइणुर्महान्मा

णो वा ईशितव्येश ईशो ह्यसौ सर्वस्येशितव्यश्च परस्येति कौथुम्यश्रुतिः करणत्वं प्राणानामुक्तं । जीवस्य क
रणान्याहुः प्राणानेतांस्तु सर्वशः । यस्मात्तद्दश गाण एते दृश्यंते सर्वदेहिष्विति सौत्रायणश्रुतौ स्मृतिकं
जीवकरणत्वं प्रतीयते । ब्रह्मणो वा एतानि करणानि चक्षुः श्रोत्रं मनो वागिति तद्ध्येतैः कारयतीति का
णायनश्रुतौ अत आह । ॐ ज्योतिराद्यधिष्ठानं तु तदामननात् ॐ ॥१५॥ यज्ज्योतिराद्यधिष्ठानं ब्रह्म त
देवैतैः करणैः प्रवर्तयति यः प्राणे तिष्ठन्नित्यादि तदामननात् । कथं जीवकरणत्वश्रुतिरित्यतो वक्ति ॐ
प्राणवता शब्दात् ॐ ॥१६॥ जीवेनैव स्वकरणैः कारयति परमात्मा ऽतो न विरोधः । एष ह्येवैनानात्मनाकार
यति चक्षुषा दर्शयति श्रोत्रेण श्रावयति मनसा मनयति बुध्या बोधयति तस्मादेता वाहुः सूतिरस्मृतिरिति
भाल्लवेयश्रुतेः । करणैः कारणं ब्रह्म पुरुषापेक्षयाखिलं । श्रोत्रादिभिः कारयति करणानीत्यतो विदुः न
जीवापेक्षया मुख्यं कारयेत्स परमेश्वरः । केवलात्मैक्यात्तस्मान्मुख्यत्वं तस्य निश्चितमिति ब्राह्मे ॐ
तस्य च नित्यत्वात् ॐ ॥१७॥ अनादिनित्यत्वाज्जीवकरणसंबंधस्य युज्यते तत्करणत्वश्रुतिः अथावियो
गीनि करणैर्वा विनैर्युज्यते देहैर्नैव वियुज्यते इत्येतद्भावकरणानां करणत्वं यद्भावान्न वियुज्यत इति गौप

करणानि पि

सू॰ वनश्रुतिः। चशब्दः करणसंबंधग्राही॥ ॐ॥१०॥ ॐ॥ अथेंद्रियाणि प्राणा वा इंद्रियाणि प्राणा हीदं द्रवंती भा॰
२ तिसयुक्ति कपौत्रायणश्रुतिः। सामान्येन प्राणानामिंद्रियत्वं वक्ति। द्वादशैवेंद्रियाण्याहुर्मनोबुद्धीति द्वाद
श इति च काषायणश्रुतिः। अतः केस्येंद्रियत्वं निवार्यत इत्यतो वक्ति॥ ॐ त इंद्रियाणि तद्व्यपदेशाद
न्यत्र श्रेष्ठात् ॐ॥१८॥ मुख्यप्राणमृते त एवेंद्रियाणि द्वादशैवेंद्रियाणीत्याहुर्मुख्यप्राणस्त्वनिंद्रियं। द्रवतां
८५ हींद्रियाणां नियंता प्राण एकराडिति पौत्रायणश्रुतिः। श्रोत्रादीनि तु पंचैव तथा वागादिपंचकं। मनो
बुद्धिसहायानि द्वादशैवेंद्रियाणि तु। विषयद्रवणात्तेषामिंद्रियत्वमुदाहृतं। तेषां नियामकः प्राणः इ
च्छित एवाखिलप्रभुरिति ब्रह्मसंहितायां॥ ॐ भेदश्रुतेः ॐ॥१९॥ इच्छित एव हीदं मुख्यप्राणः करोति का
रयति बलति बालयति धत्ते धारयति प्रभुं वा एनमाहुरथेंद्रियाणि नेच्छितानि न कुर्वंति न कारयंति न ब ८५
लंति न बालयंति न धत्ते न धारयति तानि ह वा एतान्यबलानि तस्मादाहुरिंद्रियाणि करणानीति पौत्रा
यणश्रुतिः॥ ॐ वैलक्षण्याच्च ॐ॥२०॥ पुरुषापेक्षया प्रवृत्तिरिंद्रियाणां दृश्यते। न मुख्यप्राणस्य
प्राणा गमय एवैतस्मिन् सुप्ते जाग्रतीति श्रुतेः॥ ॐ॥११॥ ॐ॥ विरिंचो वा इदं विरेचयति विदधाति ब्रह्मा वा वि वि

६ रिंचः एतस्माद्धीमे रूपा नामानीति गौपवन श्रुतेः। यस्माद्विरेचयेत्सर्वं विरिंचस्तेन भण्यते। एको हि
कर्ता जगतो ब्रह्मैव च चतुर्मुख इति च युक्ति ब्राह्मे। अथ कस्मादुच्यते परम इति। परमाद्ध्येतेनामरू
पे व्याक्रियेते तस्मादेनमाहुः परम इति। अथ कस्मादुच्यते ब्रह्मेति बृहतो ह्येष वाचेति आग्निवेश्य
श्रुतिः। अत आह॥ ॐ संज्ञामूर्तिकॢप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॐ॥२१॥ नामरूपकॢप्तिः परादे
वेः सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्त इति श्रुतेः। त्रिवृत्कुर्वत इति हेतुगर्भः
त्रिवृत्करणापेक्षया नामरूपयोः सर्वनाम्नां च रूपाणां व्यवहारेषु केशवः। एक एव यतः स्रष्टा ब्र
ह्माद्यास्तदनंतरा इति च पाद्मे। त्रिवृत्क्रियाय तो विष्णो रूपं च तदपेक्षया रूपापेक्षं तथा नाम व्यवहा
रस्तदात्मकः। अतो नाम्नश्च रूपस्य व्यवहारस्य चैकराट्। हरिरेव यतः कर्ता पिता तो भगवान्प्रभु
रिति च ब्रह्मांडे॥४॥१२॥५०॥ अन्नाद्धीदमुत्पद्यते आपो वाव मांसमज्जास्थि च भवंत्यापः शरीरमाप एवेदं
सर्वमिति कौंडिन्य श्रुतिः। अन्नमयं तु यतो मांसमतस्त्वस्थि च मांसत इति भारते। पृथिवीं शरीरमप्येति आका
शमात्मेति च अतो ब्रवीति॥ ॐ मांसादि भौमं यथाशब्दमितरयोश्च ॐ॥२२॥ यत्कठिनं सा पृथिवीय

सू॰ २ द्रवं तदापो य दुष्टं तत्तेजः इति। श्रुते मांसाद्येव भौमं न सर्वं शरीरं अप्तेजसोश्च कार्यं यथा शब्दमङ्गीक भा॰
र्तव्यं। यद्वा वा अर्थो विमिश्रं मिश्रात्वे तद्भवति मिश्राणि हि भूतानि तस्माद्देवमाचक्षते भूतानीति हि काषा
यणश्रुतिः। पंचभूतात्मकं सर्वं तदप्येक विवक्षया। एकभूतात्मकत्वेन व्यवहारस्तु वैदिके। भौममपि
येव काठिन्याच्छौक्ल्यादौदकमिदमपि। तेजिष्ठत्वात्तैजसं च यथास्त्रां वचनं श्रुतावि ति वायुप्रोक्ते। क ४
८६ थं तर्हि विशेषवचनमित्यत आह। ॐ वैशेष्यात्तु तद्वादस्तद्वादः ॐ॥ २३॥ भूतानां विशेषसंग्र
यो गादेव विशेषव्यवहारः। पार्थिवानां शरीराणामर्धेन पृथिवी स्मृता। इतरेर्धे त्रिभागिन्य आप
स्तेजस्तु भागतः। इति सामान्यतो ज्ञेयं भेदश्च प्रतिपूरुषं। स्वर्गस्थानां शरीराणामर्धं तेज उदाहृतमिति
ब्रह्मसंहितायां। सर्वाध्यायार्थविधारणार्थाध्यायान्ते द्विरुक्तिः। गारुडे च। अध्यायान्ते द्विरुक्तिः स्यात् ८६
वेदे वा वैदिकेपि वा विचारो यत्र सङ्घेन पूर्वोक्तस्यावधारणे। अनुक्तानां प्रमाणानां स्वीकारश्च कृतो भवे
श्रीं त्। विनिर्घचेतरान्मार्गान् संपूर्णफलता तथेति। ४।१।३।८८। इति श्रीमद्द्वैपायनकृत ब्रह्मसूत्रा
र्थे श्रीमदानन्दतीर्थभगवत्पाद विरचिते द्वितीयाध्यायस्य चतुर्थः पादः॥ ॥ श्री कृष्णार्पणमस्तु॥

श्रीवेंकटेशाय नमः ॥ ॐ ॥ साधनविचारोयमध्यायः वैराग्यार्थं गत्यादिनिरूपणा प्रथमपादे । भूतबंधो हि बं
सु धः । भूतबंधस्तु संसारो मुक्तिस्तेभ्यो विमोचनमिति वाराहे । तच्च मरणेऽपि नेति । भूतानां विनिवृत्तिस्तु मरणं समुदा १२५
हृतं । भूतानां संप्रयोगश्च जनिरित्येव पंडितैः इति भारते । अतः किं साधनैरित्यत आह । ॐ तदंतरप्रतिपत्तौ रं
हति संपरिष्वक्तः प्रश्ननिरूपणाभ्यां ॐ ॥ १ ॥ शरीरांतरप्रतिपत्तौ भूतसंपरिष्वक्त एव गच्छति । विषय यथा
पंचम्यामाहुतावापः पुरुषवचसो भवंतीति इति तु पंचम्यामाहुतावापः पुरुषवचसो भवंतीति प्रश्नपरिहाराभ्यां ॥छ१॥
ॐ त्र्यात्मकत्वात्तु भूयस्त्वात् ॐ ॥ २ ॥ अपशब्दस्तु त्र्यात्मकत्वाद्युज्यते भूयस्त्वाच्चापां । तापापनोदो भूयस्त्वमंभ
सो वृत्त यस्त्विमा इति च भागवते ॥छ॥२॥छ॥ ॐ प्राणगतेश्च ॐ ॥ ३ ॥ यत्र वा वभूतानि तत्र करणानि । नित्यानि ह
वा एतानि भूतानि च करणानि च नैतानि कदाचिद्वियुज्यंते न [illegible] विलीयंते इति भाल्लवेयश्रुतेः । प्राणगतेर्भूतान्य
पि यांतीति सिद्धं ॥छ॥३॥छ॥ ॐ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॐ ॥ ४ ॥ यत्रास्य पुरुषस्य मृत
स्याग्निं वागप्येति वातं प्राण इत्यादिश्रुतेर्न प्राणानां जीवेन सह गतिरिति चेन्न भागतोग्न्यादिप्राप्तेः पुरुषस्य
मृतौ ब्रह्मन्नू प्राणा भागत एव तत् । आधिदैवं प्राप्नुवंति भागतोऽनुव्रजंति तं । पुनः शरीरसंप्राप्तौ तमेवानुविशंति

सू॰ चेतिव्रीहो ब्रह्मांडे चामृतिकाले जहसेनं प्राणा भूतानि पंच च ॥ भागतो भागतस्त्वेनमनुगच्छंति सर्वश इति भा॰
३ ॥३।१।४॥ ॐ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॐ ॥५॥ तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्व १
तीति प्रथमाग्नौ श्रूयते न भूतानि जुह्वतीति अतो नेति चेन्न। ता एव प्रस्तुता आपः श्रद्धारूपेण हूयंत इति तु
३ पंचम्यामाहुतावापः पुरुषवचसो भवंतीत्युपसंहारोपपत्तेः॥३।१।५॥ ॐ अश्रुतत्वादिति चेन्नेष्टादिका
७ रिणां प्रतीतेः ॐ ॥६॥ अग्न्यादिगतिः प्रसक्ता श्रूयते अतः प्रत्यक्षाश्रवणान्न युक्तमिति चेन्न। अथैनं तः
यजमानं किं न जहाति भूतान्येव भूतैरेव गच्छति भूतैर्भुंक्ते भूतैरूह्यते भूतैश्चरति भूतैर्विचरती
ति कौटरव्यश्रुतौ प्रतीतेः॥३।१।६॥ अपाम सोमममृता अभूमेत्यादिश्रुतिविरोध इत्यतो वक्ति॥ ॐ भा
क्तं वानात्मवित्वात्तथा हि दर्शयति ॐ ॥७॥ भागवतं त्वहममृतत्वं नान्यः पंथा अयनाय विद्यत इति श्रुतेः। आ ७
त्मविद एव हि मुख्यं। वाशब्दात्सारंपर्येणात्मविदपेक्षया वा। तथा हि श्रुतिः। स एनमविदितो न भुनक्ति य
था वेदो वाननूक्तोन्यद्वा कर्मकृतं यदिह वाप्यनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यांततः क्षीयत एव।
आत्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयते। अस्माद्ध्येवात्मनो यद्य

58

कामयते तत्त्वहृज्जते ॥ अमृता वाव सोमपा भवति यावदिंद्रो यावन्मनुर्यावद्वादित्यः कर्मणा ज्ञानमातनोभ
ति ज्ञानेनामृतीभवति अथामृतानि कर्माणि यत एनममृतत्वं नयंतीति च ॥ छ ॥ ७ ॥ छ ॥ तस्य कर्मणो भोगेन
क्षयान्मुक्तिरित्यत आह ॥ ॐ कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां ॐ ॥ ८ ॥ ततः शेषेण स लोकमायाति पु
नः कर्म कुरुते पुनर्गच्छति पुनरागच्छतीति श्रुतेः ॥ भुक्तशेषानुशयवानिमां प्राप्य भुवं पुनः ॥ कर्म कृत्वा पुनर्ग
च्छेत्पुनरायाति निस्त्रशः ॥ आचतुर्दशमाद्वर्षात्कर्माणि नियमेन तु दशावराणां देहानां कारणानि करोत्ययं ॥
अतः कर्मक्षयान्मुक्तिः कुत एव भविष्यतीत्यादि स्मृतेश्च शेषवानेवायाति ॥ छ ॥ ८ ॥ छ ॥ यथेतमनेवं ग
च्छति यथेतमागच्छति स भुंक्ते स कर्म कुरुते स परिवर्तत इति गतिप्रकारेणागतिः श्रूयते अतो ब्रूते ॥ ॐ
यथेतमनेवं च ॐ ॥ ९ ॥ धूमादभ्रमभ्रादाकाशमाकाशाच्चंद्रलोकं ॥ यथेतमाकाशमाकाशाद्वायुं वा
युर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षतीति काषायणश्रुतेर्य
थागतमन्यथा च ॥ छ ॥ ९ ॥ छ ॥ ॐ चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः ॐ ॥ १० ॥ तद्य इ
ह रमणीयचरणा रमणीयां योनिमापद्यंते कपूयचरणाः कपूयामिति श्रुतेश्चरणात्कर्मणैव गमना

सू० गमनं न यज्ञादिकृतः। आचार इति संप्रोक्तः कर्माङ्गत्वेन शुद्धिदः। अशुद्धिदस्त्वनाचारः चरणं तूभयं भा०
३ मतमिति स्मृतेरिति चेन्न। यज्ञाद्युपलक्षणार्थं चरणादि श्रुतिरिति कार्ष्णाजिनिर्मन्यते॥ ॐ आनर्थ १
क्यमिति चेन्न तदपेक्षत्वात्॥ ॐ॥११॥ नहि रमणीयाः कपूया इत्येवस्याच्चरणशब्दस्यानर्थक्यमिति
चेन्न। चरणापेक्षत्वाद्रमणीयत्वादेस्तद्ज्ञापनार्थत्वेनोपपन्नेः॥ ॐ सुकृतदुष्कृते एवेति तु बादरिः
८ ॐ॥१२॥ धर्मं चरत माधर्ममित्यादिप्रयोगात्सुकृतदुष्कृते एव चरणशब्दोक्ते इति बादरिर्मन्यते॥
तुशब्दो स्वसिद्धांतोपि स एवेति सूचयति। तुशब्दस्तु विशेषस्यात्वसिद्धांते वधारण इति च नाममम
होदध्यो॥ ॐ॥१०॥ ॐ॥ पुंण्यकृतामेव गमनागमने नेतरेषामित्यत आह॥ ॐ अनिष्टादिकारिणामपि
च श्रुतं ॐ॥१३॥ न च इह शुभकृतो ये चाशुभकृतस्ते शुभमनुभूयावर्तन्ते पुनः कर्म कुर्वन्ति पुनर्गच्छ ८
न्तीति भाल्लवेयश्रुतौ॥ ॐ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्॥ ॐ॥१४॥ सं
यमनमनुभूय केषांचिदारोहः केषांचिदवरोहः तुशब्दोवधारणे। सर्वे वा एते अशुभकृतः संयम
ने प्रपतन्ति। तत्र ये [illegible] द्विषः गुरुद्विषः श्रुतिद्विषस्तद्वमंतारः शठा मूर्खा इति ते वै ततो वरुद्ध

तमसिप्रपतंति नैवैतउत्तिष्ठंते ऽपि कर्हिचित्। वव्रंवाएतदिसाहुरथयेन्ये ब्रह्मद्विषः स्तेनाः सुरापाइ
तितेवैनदनुभूयेमंलोकमनुव्रजंतीति कौठरव्यश्रुतिः॥ ॐ स्मरंति च ॐ॥१५॥ गच्छंति पापिनः
सर्वेनरकंनात्र संशयः। तत्र भुक्त्वा पतंते सर्वे ये द्विषंति जनार्दनं। महातमसि मग्नानां न तेषामुत्थितिः
उ क्वचित्। इतरेषां तु पापानां [illegible]स्थानं विद्यते क्वचित्। सुखस्यानंतरं दुःखं दुःखस्यानंतरं सुखं। इति सर्वत्र नि
यमः पंचकष्टे तु तस्य द्दैसादि॥ छ॥१४॥ छ॥ ॐ अपि सप्त ॐ॥ रौरवोथ महांश्चैव वह्निर्वैतरणी त
था। कुंभीपाक इति प्रोक्तान्यनित्यनरकाणि तु। तामिस्रश्चांधतामिस्रो द्वौ नित्यौ संप्रकीर्तितौ। इति सप्त प्र
धानानि बलीयस्तूत्तरोत्तरं। एतानि क्रमशो गत्वैवारोहावरोहणम्। इति च भारते॥ छ॥१२॥ छ॥ ईश्वर
स्य नरकायुक्तेः। सर्वं [illegible]सृजति सर्वं विलापयति सर्वं रमयति सर्वं नरमयति सर्वं प्रवर्तयत्यंतरस्मिन्निविष्ट
इति कौषारवश्रुति विरोध इत्यतो वक्ति॥ ॐ तत्रापि च तद्व्यापारादविरोधः ॐ॥१६॥ चशब्दाद दुःखानु
भावेन। स स्वर्गे स भूमौ स नरके सोंधे तमसि प्रवृत्तिरूदे क एवानुविष्टो नासौ दुःखभुगीश्वरः प्रभु
त्वात्सर्वं पश्यति सर्वं कारयति नासौ दुःखभुग्य एवं वेदेति पौत्रायणश्रुतेरविरोधः। नरकेपि वसन्नीशो

ब्रह्म॰ नासौ दुःखभुगुच्यते। नीचोच्यतैव दुःखादेर्भोगाद् यद्विधीयते। नासौ नीचोच्चतां याति पश्यस्वेवंप्रभुत्व भा॰
२ तइति भागवततंत्रे॥ ६८॥ १३॥ ६८॥ अथैतयोः पथोर्नैकतरेणापि चेत् तानीमानि क्षुद्राणि असकृ १ न
९१ दावर्तीनि भूतानि भवंति जायस्व म्रियस्वेत्येतत् तृतीयं स्थानमिति गतिस्थानं त्र्यं भूतानां प्रतीय
त इत्येतदाह॥ ॐ विद्याकर्मणोरिति तु प्रकृतत्वात् ॐ॥ ७॥ विद्याकर्मापेक्षया चैतद्वचनं। तयोरपि
प्रकृतत्वात्। विद्यापथः कर्मपथो द्वौ पंथानौ प्रकीर्तितौ। तदूर्जितस्त्रिधा याति तिर्यक्त्वा नरकं तमः इति
च भारते॥ ६८॥ १४॥ ६८॥ यत्र दुःखं सुखं तत्र सर्वत्रापि प्रतीयते। अपि नीचगतौ किंचित् किमु मानुषदेहिनः इ
ति वचनान्महातमस्यपि सुखप्राप्तेरित्येतदाह॥ ॐ न तृतीये तथोपलब्धेः ॐ॥ १८॥ अथाविद्यां क न
मविगाच्छति त्रिधाह वावागतिस्तिर्यग्यातनां तमः इति दुःखा वा सुखानुवृत्तौ। न तमः सुखानुवृत्तौ केवलं ९१
ह्येवात्र दुःखं भवतीति श्रुतेर्न तृतीयावागतौ सुखं॥ ॐ स्मर्यतेऽपि च लोके ॐ॥ १९॥ तिर्यक्षु नरके चै
व सुखलेशो विधीयते। नांधे तमसि मग्नानां सुखलेशोऽपि कथ्यते इति भविष्यत्पर्वणि। लोकसिद्धं चै
तत्। यथा शास्त्रं लोकसिद्धिरपि स्मार्तैव स्यात्। अति प्रिये यथा राजा न दुःखं सहते क्वचित्। अस्त्र प्रियेसु

खमपि तथैव परमेश्वर इति ब्राह्मे ॐ दर्शनाच्च ॐ ॥२०॥ नारायणप्रसादेन समिध्य ज्ञानचक्षुषा ॥ अ
संतदुःखसंक्लीनान्निःशेषसुखवर्जितान् । निःस्वमेव तथाभूतान्निमिषांश्च गणान्बहून् । निरस्ता
शेषदुःखांश्च नित्यानंदैकभागिनः । अपश्यत् त्रिविधान्ब्रह्मा साक्षादेव चतुर्मुख इति दर्शनवच क्रि
नाच्च पाद्मे ॥ ॐ तृतीयशब्दावरोधः संशोकजस्य ॐ ॥२१॥ तृतीयेपि तृतीयतमसः श्रवणादेव स्म
शब्दानुसारेण संशोकज मोहप्राप्तिः ॥ ॐ स्मरणाच्च ॐ ॥२२॥ महातमस्त्रिधा प्रोक्तमूर्ध्वं
मध्यं तथाधरं । श्रवणेनैव मूर्छादिरधरस्य यतो भवेत् तस्मान्न विस्तरेणोक्तं कथ्यते राजसत्तमेति कौ त
र्मे ॥ ८ ॥ १५ ॥ ८ ॥ धूमो भूत्वाभ्रं भवतीत्यन्यभावः श्रूयते स कथमित्यतो ब्रवीति ॥ ॐ तत्स्वाभा
व्यापत्तिरुपपत्तेः ॐ ॥२३॥ धूमादिषु प्रविश्य तद्वन्नौगतिः स्थितौ स्थितिरित्यादिरेव तत्स्वभावापत्तिः । न
ह्यन्यस्यान्यभावो युज्यते न च तत्सदृक्प्राप्तिः । गारुडे च । धूमादिभावप्राप्तिश्च तद्वन्नौगतिरेव तु । स्थितिः
स्थितौ प्रवेशश्च लघुत्वादिस्तथैव च । न ह्यन्यस्यान्यथाभावो न च तत्सदृगिष्यते । विद्यागम्यं पदं यस्मान्न स्य
तत्प्राप्यं हि कर्मणा । एकदेशस्वभावेन वागभेदोपि युज्यते । यथा जीवः परं ब्रह्म ब्रह्मेदं जगदि

ब्र० सपीति।।छ।।१६।।छ।। बलुस्थानगमनोक्तेर्भ्रांतमप्येवं स्यादित्यत आह।। ॐ नातिचिरेण विशे स्था

३ षात्।। ॐ।।२३।। तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्निति विशेषान्नाति ९

चिरेण।। स्वर्गाल्लोकाद्दवाक्ष्माप्तो वत्सरादूर्ध्वमेव तु। मातुःशरीरमाप्नोति पर्यटन्यत्र चेति नारदी तत्र

ये।।छ।।१७।।छ।। तत्र इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा जायंत इति श्रवणादनर्थकत्व

५० वं यज्ञादेरित्यतो वक्ति।। ॐ अन्याधिष्ठितेषु पूर्ववदभिलापात्।। ॐ।।२४।। अन्याधिष्ठितेषु व्री

ह्यादिशरीरेषु प्रवेशो न तु भोगोऽस्य। धूमो भूत्वाभ्रं भवतीत्यादिपूर्वोक्तिवत्। सोऽवागतः स्थावरान्प्रवि स्था

भोगेनैव व्रजन् स्थूलं शरीरमेति। स्थूलाद्य शरीराद्भोगाननुभुंजन् इत्यत्र [illegible] वारभ्भुतो।। ५०

स्वर्गादवागतो देही व्रीह्यादीतरदेहगः। अभुंजंस्तु क्रमेणैव देहमाप्नोति कालत इति वाराहे।।

ॐ अशुद्धमिति चेन्न शब्दात्।। ॐ।।२५।। हिंसारूपत्वात् पापस्यापि संभवाद्दुःखं च भवेदिति चेन्न

शब्दविहितत्वात्। हिंसा त्ववैदिकी या तु तयानर्थो ध्रुवं भवेत्। वेदोक्तया हिंसया तु नैवानर्थः कथंच

नेति वाराहे।।छ।।१८।।छ।। स्वर्गादवागतश्चापि मातुरेवोदरं व्रजेदिति वचनाद्यएव ग्रहीभव

तियोवारेतः सिंचति तमेवानुविशतीतिचश्रुतिः अथ सिद्धांतमाह॥ ॐ रेतः सिग्योगोथ॥२६॥
मेव ततोरेतःसिंचमेवानुप्रविशति। अथ मातरमथप्रसूयते सकर्मकृत इति कौतरव्यश्रुतेः
पितरंप्रथमतोविशतिमातृप्राप्तेः। पश्चाद्दपिश्रायहोतु। देहं गर्भस्थितं प्राप्य प्रविशेत्स्वर्ग
तोगतं इतिवचनात्पश्चाद्देवप्रविशतीसतमाह॥ ॐ योनेः शरीरं॥ ॐ॥२६॥ पितृशरीरा
न्मातृयोनिमनुप्रविश्य तत एव शरीरं प्राप्नोति। दिवस्थास्नुगच्छति। स्थास्नुभ्यः पितरं पितुर्मा
तरं मातुः शरीरं शरीरेण जायत इति संमितमथासंमितं स्थास्नुभ्यो जायते पितुर्मातुरंतरेवा
गर्भे वा बहिर्वेतिपोष्यायणश्रुतेः। स्थावरापि दिवः प्राप्तः स्थावरेभ्यश्च पूरुषं पुरुषात्स्त्रि
51 यमापन्नस्ततो देहं यथाक्रमं। देहेन जायते जंतुरिति सामान्यतो जनिः। विशेषजननं चापि
प्रोच्यमानं निबोध मे। स्थास्नुष्वथापि पुरुषे प्रमदायामथापि वा। गर्भे वा बहिरेवाथ क्वचि
त्स्थानांतरेषु चेति च ब्राह्मे॥ इति श्री॰ द्वै॰ ब्रह्मसूत्रभाष्ये श्रीम॰ तृतीयाध्या॰ प्रथमपादः ॥ छ॥

अ॰ ३ श्रीकेशवायनमः ॥ ॥ भक्तिरस्मिन्पाद उच्यते॥ भक्त्यर्थं भगवन्महिमोक्तिः॥ ॐ संध्ये सृष्टिराह हि अ॰
२ ॐ॥ १ ॥ न स्वप्नोचितं विना प्रतीयते। न तत्र रथा न रथयोगा न पंथानो भवंत्यथ रथान्रथयोगान्पथः २
सृजत इत्यादिश्रुतेः॥ ॐ निर्मातारं चैके पुत्रादयश्च ॐ॥ २ ॥ य एष सुप्तेषु जागर्ति कामं कामं पु
रुषो निर्मिमाण इति च। एतस्माद्ध्येव पुत्रो जायते एतस्माद्भ्राता [illegible] एतस्माद्भार्या यदेनं पुरुषमेषः
५१ स्वप्नेनाभिहंतीति गोपवनश्रुतिश्च॥ केन साधनेन। ॐ मायामात्रं तु का[illegible]र्त्स्न्येनानभिव्यक्तस्व
रूपत्वात् ॐ॥ ३ ॥ अनादिमनोगतांश्च संस्कारान्स्वेच्छामात्रेण प्रदर्शयति। नान्येन साधनेन। संप्र
गनभिव्यक्तत्वात्। ब्रह्मांडे च। मनोगतांश्च संस्कारान्स्वेच्छया परमेश्वरः। प्रदर्शयति जीवाय सस्व
प्न इति गीयते। यदन्यथात्वं जाग्रत्वं साक्षात्तिस्तत्र तत्कृता। अ[illegible]नभिव्यक्तरूपत्वाच्चान्यसाधनजं भ ५१
वेदिति॥ ॐ सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॐ॥ ४ ॥ साधनांतरेभावेपिक्षावाभावसूच
कत्वेनेश्वरो दर्शयति। यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननि
दर्शन इति श्रुतेः। हिशब्दाद्दर्शनाच्च। यदापि ब्राह्मणो ब्रूयाद्देवता वृषभोपि वा। स्वप्नस्थमथवा

राजा तत्त्वयैव भविष्यतीत्याचक्षते स्वप्नविदो व्यासादयः ॥ ७ ॥ १ ॥ ७ ॥ ॐ पराभिध्यानात्तु तिरोहितं
ततो ह्यस्य बंधविपर्ययौ ॐ ॥ ५ ॥ बंधमोक्षप्रदत्वात्स एव स्वप्नतिरस्कर्ता स्वप्नादिबुद्धिकर्तृत्वं चि
तिरस्कृतमप्येवं च । तदभिध्यायतो ह्यस्य बंधमोक्षौ प्रतिष्ठिताविति च कौर्मे ॥ ७ ॥ २ ॥ ७ ॥ ॐ देहयो
गाद्वा सोपि ॐ ॥ ६ ॥ देहयोगेन वा सो जाग्रदपि तत एव । स एव जागरितं स्थापयति स स्वप्नस्य
प्रभुस्तु राजा घाट् स एको बहुधा भवतीति कौंडरव्यश्रुतेः ॥ ७ ॥ ३ ॥ ७ ॥ ॐ तदभावो नाडीषु तच्छ्रुतेरा
त्मनि ह ॐ ॥ ७ ॥ जाग्रत्स्वप्नाभावः सुषुप्तिर्नाडीस्थे परमात्मनि । आसु तदा नाडीषु सुप्तो भवति सता
सोम्य तदा संपन्नो भवतीति श्रुतेः ॥ ७ ॥ ४ ॥ ७ ॥ ॐ अतः प्रबोधोऽस्मात् ॐ ॥ ८ ॥ यतो [illegible] सुप्तः एष
एव सुप्तं प्रबोधयति । एतस्माज्जीव उत्तिष्ठते स एष प्रमाता एष परम इति कौंडिन्यश्रुतेः ॥ ७ ॥ ५ ॥ ७
ॐ स एव च कर्मानुस्मृतिशब्दविधिभ्यः ॐ ॥ ९ ॥ न च केषांचित्स्वप्नादिकर्तृत्वं न तु सर्वेषामिति एष
ह्येव साधु कर्म कारयतीति कर्मण्यवधारणात् । प्रदर्शकस्तु सर्वेषां स्वप्नादेरेक एव तु । परमः पु
रुषो विष्णुस्ततोऽन्यो नास्तिकश्चनेत्यनुसारिस्मृतेश्च । एष स्वप्नान्दर्शयति एष प्रबोधयतीत्येष ए

ब्र० २ वपरम आनंद इतिश्रुतिः। आत्मानमेव लोकमुपासीतेति विधिः॥ ३॥ ६॥ ३ मुग्धेऽर्धसंपत्तिः प भा० २
रिशेषात्॥ ॐ॥ मोहावस्थायां परमैश्वर्येऽर्धप्राप्तिर्जीवस्य हृदयस्थासराज्ञी वा दूरस्थो जारो दृश्यति
समीपस्थस्तथास्य च अंसंचपियस्मिन्नल्पं व्रजन् यत एवं त्रयोवस्थामोहस्तु परिशेषतः। अर्धप्राप्ति
रितिज्ञेयो दुःखमात्रप्रतिस्मृतेरितिवाराहे। सोपि तत एवेति सिद्धं। मूर्छा प्रबोधनं चैव यत एव प्र
५२ वर्तते स ईशः परमो ज्ञेयः परमानंदलक्षण इति कौर्मे॥ ३॥ ७॥ स्थानापेक्षया परमात्मनो भेदा ५२
दनुग्राह्यानुग्राहकभावइत्यत आह॥ ॐ न स्थानतोपि परस्योभयलिंगं सर्वत्र हि ॐ॥
॥१०॥ स्थानापेक्षया परमात्मनो न भिन्नं रूपं। सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षत इति हि श्रु
तिः॥ एकरूपः परो विष्णुः सर्वत्रापि न संशयः। ऐश्वर्याद्रूपमेकं च सूर्यवद्बहुधेयत इति हि
मात्स्ये। प्रतिदृशमिव नैकधार्कमेकं समधिगतोस्मि विधूतभेदमोह इति च भागवते॥ ॐ न
भेदादिति चेन्न प्रत्येकमतद्वचनात् ॐ॥ ११॥ कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ प्रा
ज्ञः कारणबद्धस्तु द्वौ तु तुर्ये न सिध्यत इति भेदवचनान्नेति चेन्न। एष त आत्मांतर्याम्यमृतः अय

मेवसयोयमात्मेदममृतमिदं ब्रह्मेदं सर्वं । अयं वै हरयोयं वै दशाचसहस्राणि बहूनि चानंता
म निचतदेतद्ब्रह्मापूर्वमनपर[illegible]मनंतरबाह्यमयमात्माब्रह्मसर्वानुभूरित्यनुशासनमितिप्रत्येक
मस्येदवचनात् ॥ ॐ अपि चैवमेके ॐ ॥ १२ ॥ एवमस्येदेनैव । चशब्दादनंतरूपत्वं चैके शाखि
नः पठंति ॥ अमात्रोनंतमात्रश्च द्वैत[illegible]स्योपशमः शिवः । ॐकारो विदितो येन समुनिर्नेतरो ज
न इति ॥ अभेदेपि भेदव्यपदेशो[illegible]ः स्थानभेदादैश्वर्ययोगाच्च युज्यते ब्रह्मतर्के च ॥ बध्यो बंधा
दिसाक्षित्वादिभोक्तृत्वेन्नेषु संस्थितेः निर्दोषाद्वयरूपोपि कथ्यते परमेश्वर इति ॥ ६ ॥ ८ ॥ ६ ॥ श्री
रूपवत्वादनित्यत्वमित्यतोवक्ति ॥ ॐ अरूपवदेव हि तत्प्रधानत्वात् ॐ ॥ १३ ॥ प्रत्यक्षादिप्रवर्त
कत्वेन तदुत्तमत्वान्नैव रूपवद्ब्रह्म । हिशब्दादस्थूलमनण्वित्यादिश्रुतेश्च । भौतिकानि हि रूपाणि
भूतेभ्योसौ परो यतः । अरूपवाननतः प्रोक्तः कृतदव्यक्तः परः इति च मात्स्ये ॥ ॐ प्रकाशवच्चा
वैयर्थ्यात् ॐ ॥ १४ ॥ यदा पश्यः पश्यते रुक्मवर्णं । शामाच्छबलं प्रपद्ये सुवर्णज्योतिरित्यादिश्रुती

॥ कर्तारमीशं पुरुषं ब्रह्मयोनिं ॥

सू॰ नां च न वैयर्थ्यं। विलक्षणरूपत्वात्। यथा चक्षुरादिप्रकाशो विद्यमानेपि वैलक्षण्यादप्रकाशादि भा॰
३ व्यवहारः॥ ॐ आह च तन्मात्रं ॐ॥१६॥ वैलक्षण्यं चोच्यते रूपस्य विज्ञानानंदमात्रत्वं। एको २
स्य प्रपंचस्य सारमिति। आनंदमात्रमजरं पुराणमेकं संतं बहुधा दृश्यमानं। तमात्मस्थं येनुपश्यं
ति धीरास्तेषां सुखं शाश्वतं नेतरेषामिति च नुर्वेदशिखायां॥ ॐ दर्शयति चाथो अपि स्मर्यते ॐ
स्य ५२ दर्शयति चानंदस्य रूपत्वं। तद्विज्ञानेन परिपश्यंती धीरा आनंदरूपममृतं यद्विभाति। शुद्ध
स्फटिकसंकाशं वासुदेवं निरंजनं। चिंतयीत यतिर्नान्यं ज्ञानरूपादृते हरेरिति च मात्स्ये ॐ
अत एव चोपमा सूर्यकादिवत् ॐ॥१७॥ यस्मादेवं परमेश्वरस्य रूपाणां मिथो न कश्चिद्दुःख
एव तत्सादृश्याज्जीवस्यापि तथा स्यादिति। तस्य प्रतिबिंबत्वमुक्त्वा च शाह्य नभेदं दर्शयति। रूपं रूपं प्रतिरूपो ५२
बभूव॥ बहवः सूर्यका यद्वत् सूर्यस्य सदृशा जले। एवमेवात्मका लोके परात्मसदृशा मता इत्यादि। अत
एव चित्त्वं तदधीनत्वं तत्सादृश्यैरेव सूर्यकाद्युपमानोपाध्यधीनत्वादिना॥ ७॥ ७॥ ८॥ नियसिद्ध
त्वा सादृश्यस्य नियानंदज्ञानादेर्न भक्ति ज्ञानादिना प्रयोजनमित्यतो ब्रवीति॥ ॐ अंबुवदग्रहणा

नुनतथात्वं ॐ ॥१८॥ अंबुवत्स्नेहेन ग्रहणं ज्ञानं भक्तिं विना न तस्माद्द्वयं सम्यगभिव्यज्यते।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वामिति हि श्रुतिः ॥ स हि वबुद्धिर्भक्तिस्तु स्नेहे
पूर्वाभिधीयते। तयैव व्यज्यते सम्यक् जीवरूपं सुखादि। क्रमिति पाठे ॥६॥११॥६॥ ॐ वृद्धि
ह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवं ॐ ॥१९॥ तस्य च भक्तिज्ञानादेर्वृद्धिह्रासभाक्त्वं
विद्यते। ब्रह्मादीनामुत्तमानां सर्वेषां भक्तत्वेंतर्भावात्। एवं भक्त्यादिविशेषांगीकारादेवेश्वरस्य
54 ब्रह्मादीनन्या[illegible]न्प्रति च सामंजस्यं भवति। साधनस्योत्तमत्वेन साध्यं चोत्तममाप्नुयुः ॥ ब्रह्मादयः
क्रमेणैव यथानंदश्रुतौ श्रुता इति च ब्राह्मे ॥ कुतः ॥ ॐ दर्शनाच्च ॐ ॥२०॥ अथात आनंदस्य मी
मांसा भवतीत्यारभ्य ब्रह्मपर्यंतेषु सुखे विशेषदर्शनात्। चशब्दात्स्मृतिः। यथाभक्तिविशेषोत्र दृ
श्यते पुरुषोत्तमे। तथा मुक्तिविशेषोपि ज्ञानिनां लिंगभेदन इति ॥६॥१२॥६॥ सृष्टिसंहार
कर्तृत्वमेवास्य न पालकत्वं स्वतःसिद्धेरिसत आह ॥ ॐ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति
च भूयः ॐ ॥२१॥ उक्तं सृष्टिसंहारकर्तृत्वमात्रं प्रतिषिध्यते ततोधिकं ब्रवीति। नैतावदेनापरो भ

सू॰ न्यदस्मृक्षासद्यावापृथिवीबिभर्तीति। चशब्दात्स्मृतिश्च। सृष्टिंच पालनं चैव संहारं नियमं तथा। ए भा॰
३ क एव करोतीशः सर्वस्य जगतो हरिरिति ब्रह्माण्डे॥ ॥१२॥ ॥ परमात्मापरोक्ष्यं च तत्प्रसादादेव। २
न जीवशक्त्येति वक्तुमुच्यते॥ ॐ तदव्यक्तमाह हि ॐ॥२२॥ अव्यक्तमेवेन हृत्स्वतः। अनूपम
५४ क्षरं ब्रह्म सदाव्यक्तं च निष्कलं। यज्ज्ञात्वा मुच्यते जंतुरानंदश्चाक्षयो भवेदिति कौंठरव्यश्रुतिः
ॐ अपि संराधने प्रत्यक्षानुमानाभ्यां ॐ॥२३॥ आराधनेप्यव्यक्तमेव ज्ञानि प्रत्यक्षेणेतरे
षामतिसूक्ष्मत्व लिंगा[?]नुमानेन। न तु माराधयितापि किं चिद्व्यक्तीकरिष्यति नित्याव्यक्तो यतो दे
वः परमात्मा सनातन इति च ब्रह्मवैवर्ते। नित्याव्यक्तरूपेण न थैव लिष्यति। व्यक्तं किंचिद्रूपं ग
हीत्वा दृश्यते। यथाग्न्यादयस्तन्मात्रारूपेणादृश्या अपि स्थूलरूपेण दृश्यंत एवमिति चेन्न॥ ५४
व ॐ प्रकाशवच्चावैशेष्यं ॐ॥२४॥ अग्न्यादिषु स्थूलसूक्ष्मत्वे विशेषाभावात्। नासौ सूक्ष्मो न स्थू
लः पर एव स भवति तस्मादाहुः परम इति मांडव्यश्रुतेः। स्थूलसूक्ष्मविशेषोच न क्वचित्परमेश्वरे
सर्वत्रैकप्रकारोसौ सर्वरूपेष्वजो यत इति गारुडे। अव्यक्ते व्यक्तभावो च न क्वचित्परमेश्वरे॥

सर्वत्राव्यक्तरूपोयं यत एव जनार्दन इति चकोर्मेत र्हि किंयत्नेनेत्यत आह ॥ ॐ प्रकाशाश्चकर्म

ण्यभ्यासात् ॐ ॥ २५ ॥ विषयभूते तस्मिन्नेव श्रवणाद्यभ्यासात्प्रकाशश्च भवति आत्मा वा अरे

द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति श्रुतेः ॥ नित्याव्यक्तस्य कथं प्रकाश इत्यत उच्यते ।

ॐ अतोनन्तेन तथा हि लिंगं ॐ ॥ २६ ॥ उभयत्र प्रमाणभावात्प्रसादादेव प्रकाशो भवति तस्या

भिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिरिति लिंगात् । युज्यते च तस्यानन्तश

क्तित्वात् । नित्याव्यक्तोपि भगवानीक्ष्यते निजशक्तितः । तमृते परमात्मानं कः पश्येतामितं प्रभुमि

ति नारायणाध्यात्मे ॥ ७ ॥ १४ ॥ ७ ॥ स्वरूपेणानन्दादि [illegible] यत उच्यते ॥ ॐ उभयव्यपदेशात्व

हिकुण्डलवत् ॐ ॥ २७ ॥ आनन्दं ब्रह्मणो विद्वान् अथैष एव परम आनन्द इत्युभयव्यपदेशा

दहिकुण्डलवदेव युज्यते ॥ यथा हिः कुण्डली कुण्डलं च । तु शब्दात्केवलश्रुतिगम्यत्वं दर्शयति ॥ ॐ

प्रकाशाश्रयवद्वा तेजस्त्वात् ॐ ॥ २८ ॥ यथादित्यस्य प्रकाशत्वं प्रकाशित्वं च एवं वा दृष्टां

तः तेजोरूपत्वाद्ब्रह्मणः ॥ ॐ पूर्ववद्वा ॐ ॥ २९ ॥ यथैक [illegible] एव कालः पूर्व इति [illegible]

जनात्कथमानन्दादी

सू॰ ३ दकोऽवच्छेद्यश्चभवति। अति[illegible]पेक्षयैष दृष्टांतः। स्थूलमतीनां प्रदर्शनार्थमहिकुं सू॰
उलदृष्टांतः। प्रकाशा व कालवद्वा यथा गेहच्छायानादिकं। ब्रह्मणाश्चैवमुक्तानामानंदो भिन्न
एव इतिनारायणाध्याले। आनंदेनव भिन्नेन व्यवहारः प्रकाशवत्। कालवद्वा यथा कालः
५५ स्वावच्छेदकतां व्रजेदिति ब्राह्मे। ॐ प्रतिषेधाच्च ॐ॥३०॥ एकमेवाद्वितीयं नेह नानास्ति किं
चनेति भेदस्य। ॐ परमतः सेतून्मानसंबंधभेदव्यपदेशेभ्यः ॐ॥३१॥ न चानंदादिवाल्लौ
कानंदादिवत्। एषसेतुर्विधृतिः य एषआनंदः परस्य। एषनित्यो महिमा ब्राह्मणस्येति सेतु
त्वं श्रु[illegible]ते। यतो वाचो निवर्तंत इत्युन्मानत्वंच। एतस्यैवानंदस्यान्यानि भूतानि मात्राउपजीवंती
तिसंबंधः। अन्यज्ज्ञानं तु जीवानामन्यज्ज्ञानं परस्य च। नित्यानंदाव्ययं पूर्णं परज्ञानं विधीय ५५
त इति भेदः। अतो लौकिकत्वापरमेव ब्रह्मानंदादिकं। ॐ दर्शनात्[illegible] ॐ॥३२॥ दर्शनादेव
चान्यानंदादिहीनां। अदृष्टमव्यवहार्यमव्यपदेश्यं सुखं ज्ञानमोजो बलमिति ब्रह्मणस्तस्माद्ब्रह्मे
त्याचक्षते इति कौंडिन्यश्रुतिः। अप्रसिद्धस्य कथमानंद इत्यादिव्यपदेश इत्यतो वक्ति। ॐ बुध्य

र्थःपादवत् ॥ ३३ ॥ जीवेश्वरसंबंधज्ञापनार्थमप्रसिद्धोऽपि पादो यथा पादशब्देन व्यपदिश्य
ते। पादोस्य विश्वाभूतानीति। यथाऽलौकिकोपि ज्ञानादिस्वच्छब्दैरेव भण्यते। ज्ञापनार्थाय लोक
स्य यथा राजेव देवरोऽइतिच पाद्मे ॥ ६० ॥ १८ ॥ ६० ॥ परानंदमात्रत्वे कथं ब्रह्माद्यानंदादीनां विशेष
इत्यत उच्यते ॥ स्थानविशेषात्प्रकाशादिवत् ॥ ३४ ॥ यथा दिव्यस्य दर्पणादिस्थानविशेषा
त्प्रतिबिंबविशेषः एवमानंदादेरपि। ब्रह्मादिगुणवैशेष्याद्दानंदः परमस्य च। प्रतिबिंबत्वमाया र
तिमध्योत्कादिविशेषत इति च वाराहे ॥ उपपत्तेश्च ॥ ३५ ॥ ऐश्वर्याद्दिमाद्विष्णोर्भक्त्यादीनाम म
नादितः। ब्रह्मादीनां नूपपन्ना ह्यानंदादेर्विचित्रतेतिच पाद्मे ॥ ६० ॥ १७ ॥ ६० ॥ ध्यानकाले यच्चित्ते दृ
श्यते तदेव ब्रह्मरूपं अतः कथमव्यक्तत्वमित्यत आह ॥ तथान्यप्रतिषेधात् ॥ ३६ ॥ यथा
जीवानंदादेरन्य ब्रह्म तथोपास्यात्कृतादपि। यन्मनसा न मनुते येनाहुर्मनो मतं। तदेव ब्रह्म त्वं
विद्धि नेदं यदिदमुपासत इति प्रतिषेधात्। पश्यंति परमं ब्रह्म चित्ते यत्प्रतिबिंबितं। ब्रह्मैव प्र
तिबिंबे यदतस्तेषां फलप्रदं। तदुपासनं च भवति प्रतिमोपासनं यथा। दृश्यते ह्यपरोक्ष्येण।

५६

स्व ज्ञानेनैवपरंपदं।उपासनावापरोक्ष्यंगमयेतत्प्रसादनंइतिचब्रह्मतर्के।देशकालांतरेष्व भा०
३ तोपिसृष्ट्यादिक्रियायुक्तेत्यतोब्रूते।।ॐअनेनसर्वगतत्वमायामयशब्दादिभ्यः ॐ।।३७।। २
सर्वदेशकालवस्तुष्वनेनैवसृष्ट्यादिकंप्रवर्तते।एषसर्व।एषसर्वगतएषईश्वरएषोचिंत्यए सर्वे
५६ षपरमइतिभाल्लवेयश्रुतिः।।सर्वत्रसर्वमेतस्मात्सर्वदासर्ववस्तुषु।स्वरूपभूतयानित्यशक्त्यामा
याख्ययायतः।अतोमायामयंविष्णुंप्रवदंतिसनातनमितिचतुर्वेदशिखायां।आदिशब्दा
दन्यत्रप्रमाणाभावाच।कर्मापेक्षत्वात्फलदानस्यतदेवददातीतिनवाच्यं।कुतः।ॐफलमतउ
पपत्तेः ॐ।।३८।।अतएवेश्वरात्फलंभवति।नह्यचेतनस्यस्वतःप्रवृत्तिर्युज्यते।।ॐश्रु
तत्वाच्च ॐ।।३९।।विज्ञानमानंदंब्रह्मरातिर्दातुःपरायणमिति।।ॐधर्मंजैमिनिरतएव ॐ। ५६
यतःफलंतदेवकर्मेश्वराद्भवति।एषह्येवसाधुकर्मकारयतीतिश्रुतेरितिजैमिनिः।।ॐपूर्वंतु
बादरायणोहेतुव्यपदेशात् ॐ।।४१।।परस्यकर्मणश्चोभयोःफलकारणत्वेपिनकर्मपरप्रवर्त
कंपरएवकर्मप्रवर्तकः।पुण्येनपुण्यंलोकंनयतिपापेनपापमितिहेतुव्यपदेशात्।द्रव्यंकर्मचकाल

च

श्चेति॥ इति श्रीमद्व्यासद्वैपायनकृतब्रह्मसू॰ भा॰ श्रीमदानंदतीर्थ॰ वृ॰ तृ॰ द्वि॰ पादः॥
श्रीरस्तु॥ उपासनाक्रियादृ उच्यते सर्वपरिज्ञानं प्रथममत उच्यते॥ ॐ सर्ववेदांतप्रत्ययं चोदनाद्यवि
शेषात् ॐ॥ १॥ अंतो निर्णयः उभयोरपि दृष्टांत इति वचनात्॥ सर्ववेदनिर्णयो ह्यायज्ञानं ब्र
ह्म। आत्मेत्येवोपासीतेति विधानात् तदुक्तयुक्तीनां चाविशिष्टत्वात्॥ ॐ भेदान्नेति चेन्नैकस्याम
पि ॐ॥ २॥ विज्ञानमानंदं ब्रह्म। सत्यं ज्ञानमनंतं ब्रह्मेत्यादि प्रतिशाखमुक्तिभेदान्नैकोधिकारि
विषयाः सर्वशाखा इति चेन्न॥ एकस्यामपि शाखायामात्मेत्येवोपासीत केवलं ब्रह्मत्वं ब्रह्मेत्यादिभे
ददर्शनात्॥ ॐ स्वाध्यायस्य तथात्वेन हि समाचारेधिकाराच्च ॐ॥ ३॥ स्वाध्यायोध्येतव्य
इति सामान्यविधेः॥ हि शब्दाद्वेदः कृत्स्नोधिगंतव्यः सरहस्यो द्विजन्मनेति स्मृतेः। सर्ववेदोक्तमा
र्गेण कर्म कुर्वंति निःसंशः॥ आनंदो हि फलं यस्माच्छाखाभेदो ह्यशक्तिजः। सर्वकर्मकृतो यस्
मादशक्ताः सर्वजंतवः॥ शाखाभेदं केऽमन्निदं व्यासस्तस्मादचीक्लृपत् इति सर्वेषामधिकाराच्च
॥ ॐ सलिलवच्च तन्नियमः ॐ॥ ४॥ यथा सर्वं सलिलं समुद्रं गच्छति एवं सर्वाणि वचनानि ब्र

सू॰ सज्ञानार्थानि नियमः॥ आग्नेये च॥ यथा नदीनां सलिलं शक्यं सागरगं भवेत्॥ एवं सर्वाणि वाक्या भा॰
२॥ नि पुंशक्त्या ब्रह्मविन्नयइति॥ ८३॥ दर्शयति च॥ ८४॥ ५५॥ सर्वैश्च वेदैः परमो हि देवो जिज्ञास्यो ३॥
सो नाल्पवेदैः प्रसिध्येत्॥ तस्मादेव सर्ववेदानधीत्य विचार्य चेज्ञानुमितो मुमुक्षुरिति च। तत् नं
५७ वेदशिखायां॥ सर्वान्वेदान्सेतिहासान्सपुराणान्सयुक्तिकान्॥ सपंचरात्रान्विज्ञाय विष्णुर्ज्ञे
यो न चान्यथेति ब्रह्मतर्के॥ ८२॥ १॥ ८४॥ सर्ववेदैर्ज्ञेयो नोपास्यः शक्यत्वादित्यत आह॥ ॐ उ
पसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॐ॥ ६॥ सर्ववेदोक्तान्गुणान्दोषाभावांश्चोपसंहृ
त्यैव परमात्मोपास्यः॥ उपास्य एकः परतः परो यो वेदैश्च सर्वैः सह चेतिहासैः॥ सपंचरात्रैः स
पुराणैश्च देवः सर्वैर्गुणैस्तत्र तत्र प्रतीतैरिति भाल्लवेयश्रुतिः॥ आग्नेये च। विधिशेषाणि कर्माणि ५७
सर्ववेदोदितान्यपि। यथा कार्याणि सर्वैश्च सर्वाण्येवाविशेषतः॥ एवं सर्वगुणाः सर्वदोषाभावा
श्च यत्नतः। योजयित्वैव भगवानुपास्यो नान्यथा क्वचिदिति। समाने विषये चोपसंहारो नतु सारो
स ही दियादीनां॥ गुणैरेव न तूपास्यो नैव दोषैः कदाचन। गुणैरेव न तूपास्यो ये पूर्वविविरोधिन पि

इतिब्रह्मतन्त्रे ॐ॥ अन्यथात्वं च शब्दादिति चेन्नाविशेषात् ॐ॥ ७॥ आत्मेत्येवोपासीतेति श-
ब्दादुपसंहारस्यान्यथात्वमिति चेन्न। एते गुणा नोपास्या इति विशेषवचनाभावात्। सर्वैर्गुणैरेक
एवेशिता सावुपासितव्यो न तु दोषैः कदाचिदिति विशेषवचनाच्च। आत्मेत्येवेत्यवधारणमना-
त्मनिरस्यर्थं॥ ॐ न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॐ॥ ८॥ प्रकरणभेदान्नैवोपसं-
हारः कार्यः परोवरीयस्त्वादिषु तावदेव ह्युक्तं॥ ॐ संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॐ॥ ९॥
सर्वविद्या उक्ताः सोऽहं नाम विदेवास्मि नाहं विदिति वचनात् सर्वस्य ब्रह्मनामत्वात्तदुपसंहारः का-
र्यः। नाम ह्यासर्वविद्यानां गुणानामुपसंहृतिः॥ कार्यैव ब्रह्मणि परे नात्र कार्यो विचारणेति ब्रह्म-
तर्के इति चेत्। सत्यं। उक्तोऽप्युपसंहारस्तथापामप्यस्त्येव। नाम वा एता ब्रह्मणः सर्वविद्यास्तस्मा-
देकः सर्वगुणो विचिंत्य इति कौण्डिन्यश्रुतिः॥ ५॥ २॥ ५॥ ॐ प्राप्तेश्च समञ्जसं ॐ॥ १०॥ युज्यते चोप-
संहारोऽनुपसंहारश्च योग्यताविशेषात्। सर्वैर्गुणैरूपास्योऽसौ ब्रह्मणा परमेश्वरः॥ अन्यैर्यथाक्रमं चै-
वमानुषैः कैश्चिदेव हि तिष्ठविष्णुपर्वणि॥ ५॥ ३॥ ५॥ ॐ सर्वाभेदादन्यत्रेमे ॐ॥ ११॥ सर्व

सू॰ गुणयुक्तत्वेनोपासनादन्यत्रैवफलेब्रह्मादयोभवंति। संपूर्णोपासनाद्ब्रह्मसंपूर्णानंदभाग्भवेत्। भा॰
३ इतरेतुयथायोग्यंसम्यङ्मुक्तौभवंतिहीतिपाद्मे॥ ६८॥ ७॥ ६८॥ सर्वेषांमुमुक्षूणांकिंपन्नियमेनो ३
पास्यं इत्यतआह॥ ॐ आनंदादयःप्रधानस्य ॐ॥ १२॥ प्रधानफलस्यमोक्षस्यार्थे। आनंदोज्ञा
नं। सदात्मेत्युपास्य एव। सच्चिदानंदआत्मेतिब्रह्मोपास्ताविनिश्चिता। सर्वेषांचमुमुक्षूणांफल
५८ साम्यादपेक्षितेतिब्रह्मतर्के॥ ॐ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौहिभेदे ॐ॥ १३॥ फ
लभेदार्थमुपचयापचययोर्भावान्नसर्वेषांप्रियशिरस्त्वादिगुणोपासाप्राप्तिः। नैवसर्वगु
णास्सर्वैरुपास्यामुक्तिभेदतः। विरिंचस्यैवयन्मुक्तावानंदस्यसुपूर्णतेतिवाराहे॥ ६८॥ ६॥ ६८
ॐ इतरेत्वर्थसामान्यात् ॐ॥ १४॥ इतरेगुणाःफलसाम्यापेक्षयोपसंहर्तव्याः॥ ६८॥ ७॥ ६८॥ ५८
उपसंहारानुपसंहारप्रमाणमाह॥ ॐ आध्यानायप्रयोजनाभावात् ॐ॥ १५॥ आध्याना
र्थंहिसर्वेगुणाउच्यंते। प्रयोजनांतराभावात्॥ ज्ञानार्थमथध्यानार्थंगुणानांसमुदीरणा। ज्ञा
तव्याश्चैवध्यातव्यागुणाःसर्वेप्यतोहरेः। नान्यत्प्रयोजनंज्ञानाध्यानात्कर्मकृतेरपि। श्रवणा

अथ पापहानिर्विद्याभिः किंचिदिष्यत इति परमसंहितायां ॥ गुणाः सर्वेपि वेत्तव्या ध्यातव्यास्तु
न संशयः ॥ नान्यत्र प्रयोजनं मुख्यं गुणानां कथनेऽभवेत् ॥ ज्ञानध्यानसमायोगाद्रूपाणां सर्वशः
फलं ॥ मुख्यं भवेन्न चान्येन फलं मुख्यं कचिद्भवेदिति बृहत्तंत्रे ॥ ॐ आत्मशब्दाच्च ॐ ॥१६॥ आत्मे
त्येवोपासीतेत्यनुपसंहारे प्रमाणं ॥ छ ॥ ८ ॥ छ ॥ ॐ आत्मगृहीतिरितरवदुत्तरात् ॐ ॥१७॥
न चानंदादयः प्रधानस्येत्युक्तिविरोधः ॥ यतः सत्यं ज्ञानमनंतं ब्रह्म विज्ञानमानंदं ब्रह्मैव देवा ति
त्मशब्दगृहीतिः ॥ अत्रैवेते सर्व एकीभवंतीत्युत्तरात् ॥ आनंदानुभवत्वाच्च निर्दोषत्वाच्च भण्य
ते ॥ नित्यत्वाच्च तथात्मेति वेदवादिभिरीश्वर इति बृहत्तंत्रे ॥ ॐ अन्वयादिति चेत्स्यादवधार
णात् ॐ ॥१८॥ सर्वगुणानामन्वय आत्मशब्देऽभव[illegible]ति ॥ आत्मव्याप्तेरात्मशब्दः परमस्य प्रयुज्य
त इति वचनादिति चेत्सत्यं ॥ स्याच्चैवमात्मेत्यवधारणात् ॥ अन्यथा सर्वेपि संहारवचनविरो त्येवे
धात् ॥ ॐ कार्याख्यानादपूर्वं ॐ ॥१९॥ अलौकिकास्तस्य गुणा ह्युपास्या अलौकिकं मुक्तिकार्यं
यतोस्येति कार्याख्यानादन्यत्रादृष्टा एव गुणा उपास्याः ॥ छ ॥ ११ ॥ छ ॥ ॐ समान एवं चाभेदात्

सू ३ ॐ॥२०॥ अपूर्वत्वेपि समानानामेवोपसंहारः॥ न तु त्रिविक्रमत्वादीनां कादाचित्कानां पृथक्त्वेन भा ३
नित्यविक्रांत्यादिष्वंतर्भावात्॥ ॐ संबंधादेवमन्यत्रापि ॐ॥२१॥ परमात्मसंबंधित्वेन नित्यत्वा
पा त्रिविक्रमत्वादिष्वप्युपसंहार्यत्वं युज्यते॥ गुणास्त्रैविक्रमाद्याश्च संहर्तव्या न संशयः॥ विरिंचस्यैव नान्
न्येषां सर्वे हि सर्वगुणाधिक इति ब्रह्मतंत्रे॥ ६॥१२॥६॥ ॐ न वा विशेषात् ॐ॥२२॥ न वा समशब्देन
५९ सर्वगुणग्रहीतिः। अधिकारिविशेषात्॥ ॐ दर्शयति च ॐ॥२३॥ सर्वान्गुणानलं शब्दो ब्रवीति
ब्रह्मादीनामितरेषां न चैवेति भाल्लवेयश्रुतिः॥६॥१३॥६॥ ॐ संभृतिद्युव्याप्त्यपि चातः ॐ॥२४॥
संभृतिद्युव्याप्ती अपि देवादीनामुपसंहर्तव्ये॥ देवादीनामुपास्यास्तु भृतिव्याप्त्यादयो गुणाः॥ आ ५९
नंदाद्यास्तु सर्वेषामन्यथानर्थकृद्भवेदिति च ब्रह्मवैवर्ते॥ ६॥१४॥६॥ यस्यां विद्यायां महागुणा
उच्यंते सा समानानामितरान्येषामिति चेन्न॥ ॐ पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॐ॥
पुरुषसूक्तोक्तविद्यायामपि केषांचिद्गुणानामनाम्नानात्॥ सर्वतः पौरुषे सूक्ते गुणा विष्णोरुदी
रिताः॥ तत्रापि नैव सर्वेपि तस्मात्कार्योपसंहृतिरिति ब्रह्मतंत्रे॥ ॐ वेधाद्यर्थभेदात् ॐ॥२५॥

४ कुशाग्रहणस्तु स्तुपगानवदेवमोक्षउपासनादि॥ ब्रह्मतर्कैश्च।उक्ताअपिहि कुर्वंति स्वेच्छयो

सिद्धिविद्धिश्रुणी हीतिफलभेदेनसर्वेशः।यमादीनां तेष्वयोगाअधिकारैकताभवेत्॥ अयो
ग्योपासनादीयुरनर्थंचार्थनाशनमितिबृहत्तंत्रे॥ ८॥ १६॥ ८॥ मुक्तस्योपासनाकर्तव्यानचेत्य
तोब्रवीत्॥ ॐ हानौतूपायनशब्दशेषत्वात्कुशाछंदस्तुत्युपगानवत्तदुक्तं ॐ॥ २७॥ नियत
स्वाध्यायानंतरं स्वेच्छयोपासनंहरेः।नियमानंतरंविप्राकुशाग्रैरप्यधीयतइति।लब्ध्वामुक्तैरि
ज्यतेवीतमोहैरितिश्रुते॥ ॐ सांपराये तर्तव्याभावात्तथाह्यन्ये ॐ॥ २८॥ स्वेच्छयैवेयंगीत
र्तव्यंमुक्तस्यतीर्णत्वात्।तीर्णोहितदासर्वांछोकान्हृदयस्यभवतीतिह्यन्येपठंति।वायुप्रोक्तेच
स्थितप्रज्ञत्वमापाद्येज्ञानेनपरमात्मनः।ब्रह्मलोकंगताःसर्वेब्रह्मणाचपरंगताः।तीर्णतर्तव्यभा
गाश्चस्वेच्छयोपासतेपरमिति।कर्मापिकुर्वंतिनवेत्याह॥ ॐ छंदतउभयाविरोधात् ॐ॥ २९॥
स्वेच्छयाकुर्वंतिनवाबंधप्रत्यवाययोरभावात्॥ ॐ गतेरर्थवत्त्वमुभयथान्यथाहि विरोधः ॐ
बंधप्रत्यवायाभावेहिमोक्षस्यार्थवत्त्वं।अन्यथामोक्षत्वमेवनस्यात्।कदाचित्कर्मकुर्वंति कदा
चिन्नैवकुर्वते॥नित्यज्ञानस्वरूपत्वान्नित्यं ध्यायंतिकेशवं॥ तीर्णतर्तव्यभावाद्येप्राप्तानंदाःपरात्म

१ x ब्रह्मविदाप्नोतिपरमितिमोक्षवाक्यशेषात्पादितरेखा॥ तद्योर्थः एतत्सामगायन्नास्त इत्यादि x

60

सू ३ नः॥ प्रसवायस्य बंधस्याप्यभावात्स्वेच्छया प्रवेदिति ब्रह्मा ३ ॐ उपपन्नस्तल्लक्षणार्थोपल भा ३
ब्धेर्लोकवत् ॐ ॥३१॥ उपपन्नश्चैवंभावः प्राप्तत्वात्तल्लक्षणस्य फलस्य॥ यथा लोके विध्यर्थेले
न विष्णुक्रमणादिके लब्धासमासकर्मेच्छया करोति न करोति च॥ ॐ अनियमः सर्वेषामविरोधा
६० च्छब्दानुमानाभ्यां ॐ ॥३२॥ प्राप्तज्ञानानामपि केषांचिन्मुक्तिप्राप्तिः केषांचिन्न यथोपसंहार इति
नमंतव्यं॥ सर्वे गुणा ब्रह्मणे वह्युपास्या नान्यैर्देवैः किंतु सर्वैर्मनुष्यैरित्युपसंहारविरोधादन्य
त्राविरोधात्॥ न कश्चिद्ब्रह्मविद्वृतिमनुभवति मुक्तो ह्येव भवति तस्मादाहुः स्मृतिहेतोति कौटि ६०
ल्यश्रुतेश्च। यथा केषांचिन्मोक्ष एवमन्येषामिति सनुमानाच्च॥ ॐ यावदधिकारमवस्थितिरा
धिकारिकाणां ॐ ॥३३॥ यथा यथाधिकारो विशिष्यत एवं मुक्तावानंदो विशिष्यते मनुष्ये
भ्यो गंधर्वाणां गंधर्वेभ्य ऋषीणां ऋषिभ्यो देवानां देवेभ्य इंद्रस्येंद्राद्रुद्रे रुद्राद्ब्रह्मण एव ह्येव स्व
शतानंद इति चतुर्वेदशिखायां। अध्यासे च। ज्ञानं चोपासनं चैवं मुक्तावानंद एव च॥ यथा

धिकारंदेवानांभवत्येवोत्तरोत्तरमिति॥ ॐ अक्षरधियांत्ववरोधःसामान्यतद्भावाभ्यामौ
पसदवत्तदुक्तं ॐ॥ ३३॥ नचास्यमत्वेनविरोधोभवति। ब्रह्मधीष्वद्दोषाभावसाम्यादुत्तमेभ्योन्यूनानांभा
व्यं। औपसदवच्छिष्यवत्। उक्तंचतुरश्रुतौ। नानाविधाजीवसंघाविमुक्तानचैवतेषांब्रह्मधियांवि
रोधः। दोषाभावाद्गुरुशिष्यादिभावाल्लोकेविनालौकिकंतुतेषांविमुक्तेरिति॥ ॐ इयदामननात् ॐ॥ ३५
नामाधारभ्यप्राणपर्यंतमुत्तरोत्तमत्वमुक्तंनप्राणात्किंचिदूर्ध्वमुक्तंतथापिपूर्ववस्यादितिनवाच्यं। प्रा
णोवावसर्वेभ्योभूयान्नहिप्राणाद्भूयान्। प्राणोह्येवभूयांस्तस्माद्भूयान्नामेतिकौठरव्यश्रुतेः॥ ॐ
अंतराभूतग्रामवदितिचेन्नतदुक्तं ॐ॥ ३६॥ यथाभूतग्रामेएकस्मिन्देहउत्तमोऽस्त्येवएवंप्राणाद
पि। परमात्मानमंतराविद्यतइतिचेन्न। प्राणादुत्तमोऽभावेप्रमाणमुक्तं। अन्यत्रोत्तमाभावेनप्रम
णं। दृश्यतेचान्यत्रोत्तमत्वं॥ ॐ अन्यथाभेदानुपपत्तिरितिचेन्नोपदेशान्तरवत् ॐ॥ ३७॥ प्रा
णस्यसर्वोत्तमत्वेपरमात्मनोभेदानुपपत्तिरितिचेन्न। श्रुतस्योपदिष्टवदुपपत्तेः। अन्येभ्यःप्रा
णस्योत्तमत्वंतस्मात्परमात्मनोऽस्त्युपदिष्टं। नेतिचेन्न। ॐ व्यतिहारोविशिंषन्तिहीतरव

तरमु
61
पी

२नी

सू० २ सूत्र ॐ ॥ ३८ ॥ उक्तं प्राणाहरमात्मन उत्तमत्वं पूर्वोक्तव्याहारेण । एषत्रु वा अतिवदतीति विशि- भा० ३
षंति हि । यथेतरेषु विशेषणो उत्तमहं हि देवो मुक्तापि हि मानवानां तेभ्यः प्राणस्य तस्माच्च
नित्यमुक्तस्य वै हरेरिति च बृहत्तंत्रे ॥ ५२ ॥ अरेति निष्ठि ज्ञानमित्यादीनां भेदाद्ध हवउ वि
त्तमा इति चेन्न ॥ ॐ सैव हि सत्यादयः ॐ ॥ ३९ ॥ सत्यादिगुणास्तु स एव हि परदेवतायाः स्वरू-
६१ पभूताः ब्रह्मतर्के च । नामादिप्राणपर्यंताद्यो सत्यादिरूपवान् । तस्मै नमो भगवते यस्मादे- पि
व विमुच्यत इत्याद्याख्याने प्रकृतेरपि जन्मादेः संसारप्राप्तेः किमिति नामादिष्वपाठ इत्यत उ-
च्यते । ॐ कामादितरत्र तत्र चायतनादिभ्यः ॐ ॥ ४० ॥ स्वेच्छयैव मूलस्थाने स्थितान्यत्र ६१
चावतारान्करोतीश्वरेच्छानुसारेण ॥ सर्वा पतना सर्वकाला सर्वावस्था सर्वेक्षा सर्वज्ञानबंधा-
बंधिका सैषा प्रकृतिर्विकृतेरिति वसंश्रुतेः । नामादयस्तु बंधहान्मोचकत्वासरो पिच । उभ-
योरप्यभावेन यथा व्यक्तं न नूदितं श्रुतौ तथा जीवपरावुच्यते किंचनेतरत् । नोच्यते च तद्वा-
तत्र हृयं वै समुद्राहृतमिति ब्रह्मतर्के ॥ ॐ आदरादलोपः ॐ ॥ ४१ ॥ अवधृत्वेपि भक्ति

५ तस्मै नमो भगवते । विष्णवे सर्वजिष्णवे इति च ॥ सत्याद्याः अजमान्ताः यन्दुबनः

विशेषादेवोपासनाऽलोपस्तस्याभवति। यथा श्री नित्यमुक्तापि प्राप्तकामापि सर्वदा। उपास्तेनि
त्यशो विष्णुमेवं भक्तोऽलरेभवेदिति बृहत्तंत्रे॥ ॐ उपस्थितेऽतस्तद्वचनात् ॐ॥ ४१॥ अनादिकाले
भगवत्संबंधिता युज्यते नित्यमुक्तत्वं तस्याः। द्वावेतावनादिनित्यावनादिमुक्तौ। नित्ययुक्तावन
नादिकौ तौ यो यं परमो या च परा तौ रमते ह्यस्यां परमो रमते ह्यस्मिन्परा तिःस्य स्मिन्हि रमते पर
मो न स्वस्मिन्परा तिरत एनमाहुः परम इति गोपवनश्रुतिवचनात्॥ ७॥ २४॥ ८॥ दर्शनार्थं
ह्युपासनं तच्च श्रवणादेव भवति अतः किमर्थमित्यत्रोच्यते॥ ॐ तन्निर्धारणार्थनियमस्तद्दृष्टेः पृ
थग्घ्यप्रतिबंधः फलं ॐ॥ ४२॥ तत्तु निश्चयो वेदांतनियमश्च ब्रह्मदृष्टेः पृथगेव। हिशब्देनात्मा वा
अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुतिं सूचयति। श्रवणादिफलं चाज्ञानविपर्य
यादिदर्शनप्रतिबंधनिवृत्तिः। ब्रह्मतर्के च। श्रुतिर्मतिस्तथाध्यानं। तदज्ञानविपर्ययौ। संशयं च प
राणुद्य लभते ब्रह्मदर्शनमिति॥ ७॥ ७॥ २॥ ॐ प्रदानवदेव हि तदुक्तं ॐ॥ ४३॥ नच श्रवण
दिमात्रेण ब्रह्मदृष्टिर्भवति। किंतु सततकर्तव्येन। यथा गुरुदत्तं तथैव भवति॥ आचार्यवान्पुरुषो

सू॰ ३ वेदेति ह्युक्तं ॥ ६४ ॥ २६ ॥ ६४ ॥ गुरुप्रसादः स्वप्रयत्नो वा बलवानिति निगद्यते ॥ ॐ लिंगभूयस्त्वान्न भा॰ ३
श्चिवलीयस्तदपि ॐ ॥ ६५ ॥ ऋषभादिभ्यो विद्यां ज्ञात्वापि सत्यकामेन भगवांस्त्वेव मे कामे ब्रूया
दिति श्रुतं ह्येव मे भगवद्दृशेभ्य आचार्याद्ध्येव विद्या विदिता साधिष्ठं प्रापयतीति वचनादत्र लब्धं किंचि
६२ न्नवीयाय इत्यनुज्ञानादुपकोसलवच[illegible]नाच्च लिंगभूयस्त्वाद्गुरुप्रदानमेव बलवत्तावताऽपि
तिन मंतव्यं । श्रोतव्यो मंतव्य इत्यादेस्तदपि कर्तव्यं । वाराहे च । गुरुप्रसादो बलवान् ॥ तस्माद्ब
लवत्तरं ॥ तथापि श्रवणादिश्च कर्तव्यो मोक्षसिद्धय इति च ॥ ६५ ॥ २७ ॥ ६५ ॥ ॐ पूर्वविकल्पः प्र ६२
करणात्स्यात्क्रियामानसवत् ॐ ॥ ६६ ॥ न च पूर्वप्राप्त एव गुरुरिति नियमः । समग्रानुग्रहं चेत्पश्चा
त्तनः करोति स एव तदा विकल्पः स्यान्मानसक्रियावत् । यथोभयोर्ध्यानयोः समयोः पूर्वस्मादुत्तमो
लब्धः स एव गुरुर्यदि । गृह्णीयाद्विचारेण विकल्पः समयोर्भवेत् । समग्रानुग्रहाभावे सत्यकामः
स्वकं गुरुं ऋषभाद्यनुज्ञया चैव प्रापत्समाधिपु ज्य तदिति ब्रह्मतंत्रे । समग्रानुग्रहं कश्चित्स्वयमेव समो
यदि । कुर्यात्पुनश्च गृह्णीयादविरोधेन कामतः । ध्यानयोः समयोर्यद्वद्विकल्पः कामतो भवेत् । ए

63 न

वंगुरो द्वितीयस्य विक्रमोऽयं हृणोपि चेति महासंहितायां॥ ॐ अतिदेशाच्च ॐ॥४७॥ ब्रह्मोपास्य
ब्रह्मोपचरस्व तच्छृणु हि ते ब्राह्मवं तु यथा ब्रह्मोपचरेर्यथा मामुपचरेये चान्ये सम द्विधाः॥ श्रेयसश्च
तानुपास्व तानुपचरस्व तेभ्यः शृणु हि ते ब्राह्मवं हि तिपौष्यायणा श्रुतावतिदेशाच्च॥४॥२॥४७॥
न च कर्मणैव हि संसिद्धिमास्थिता जनकादय इत्यादिनान्यस्मान्मोक्षसाधनं॥ ॐ विद्यैव तु निर्धारणा
त् ॐ॥४८॥ तमेवं विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति निर्धारणाद्विद्ययैव मोक्षः॥
ॐ दर्शनाच्च ॐ॥४९॥ न केवलं विद्यया किंतु परोक्षज्ञानेन च॥ स वन्मिरोमायपायं सिनीते दृष्ट्वे
वर्तमुच्यते नापरेणेति कौशिकश्रुतेः॥ ॐ श्रुत्यादिबलीयस्त्वाच्च न बाधः ॐ॥५०॥ साव
धारणा बलवती श्रुतिः। इंद्रो स्वमेधांध्न मिष्ट्वापि राजा ब्राह्मणमीड्यं समुवाचोपसन्नः। न क
र्मभिर्न धनैर्नैव चान्यैः पश्येत्सुखं तेन तत्त्वं ब्रवीहीति बलवल्लिंगं। नास्त्यकृतः कृतेनेत्युपपत्तिश्च।
कर्मणा बध्यते जंतुर्विद्यया च विमुच्यते। तस्मात्कर्म न कुर्वंति यतयः पारदर्शिन इति युक्तिमच्च
वचनं। अतो न प्रमाणांतर[illegible]बाधः कर्मणैव संयोगव्यवच्छेदः॥४॥२॥०॥५०॥ ॐ अनुबधा

सू॰ २ दिभ्यः ॐ ॥५१॥ न केवलं श्रवणादिभिर्गुरुप्रसादेन च ब्रह्मदर्शनं किं तु भक्त्यादिभिश्च । सर्वल भा॰ ३
क्षणसंपन्नः सर्वज्ञो विष्णुतत्परः । यद्गुरुः सुप्रसन्नः स्याद्द्यात्तन्नान्यथा भवेत् । तथाप्यनादिसंसि
द्धभक्त्यादिगुणपूगतः । लभेद्गुरुप्रसादं च तस्मादेव च तद्भवेदिति । भक्तिर्विष्णौ गुरौ चैव गुरोर्नि
त्यप्रसन्नता । दयाच्छमदमादिश्च तेन चैते गुणाः पुनः । तैः सर्वैर्दर्शनं विष्णोः श्रवणादिकृतं भवे
दिति च नारायणतंत्रे ॥५॥३१॥५०॥ ॐ प्रज्ञांतरपृथक्त्ववद्दृष्टिश्च तदुक्तं ॐ ॥५२॥ उपासना
ढ़ि३ भेदवद्दर्शनभेदः । तथोक्तं कमठश्रुतौ । अंतर्दृष्टयो बहिर्दृष्टयोऽवतारदृष्टयः सर्वदृष्टय इति दे
वा वा व सर्वदृष्टयस्तेषु चोत्तरोत्तरमा ब्रह्मणोन्येषु यथायोग्यं यथा ह्याचार्या व्याचक्षत इति । अध्या
त्मे च । दृष्ट्वैव ह्यवताराणां मुच्यंते केचिदंजसा । दर्शनेनांतरेणान्ये देवाः सर्वत्र दर्शनात् । तेषां विशेष ढ़ि३
माचार्यो वेत्ति सर्वज्ञतां गत इति ॥५॥३२॥५०॥ ॐ न सामान्यादप्युपलब्धेर्मृत्युवन्नहि लोकापत्तिः
ॐ ॥५३॥ न सामान्यदर्शनमात्रेण मुक्तिः । यथा मृत्युमात्रात् । नहि लोकापत्तिमात्रं मुक्तिः । सामा
न्यदर्शनाल्लोका मुक्तिर्योगात्स दर्शनादिति हि नारायणतंत्रे । मुच्यते नात्र संदेहो दृष्ट्वा तु स्वाल्पयो

६५

ग्पयेतिच। दर्शनेनात्मयाथात्म्येन मुक्तिर्नान्येन केनचिदिति चाध्यात्मे॥ ॥ ३३॥ ॥ भक्तिरेवैनं नय
ति भक्तिरेवैनं दर्शयति भक्तिवशः पुरुषो भक्तिरेव भूयसीति कमठश्रुतेर्न परमात्मना दर्शनमिति
चेन्न। तस्यैव आत्मा विशते ब्रह्मधामेति श्रुतेः। कथं तर्ह्येषा श्रुतिः। ॐ परेण चशब्दस्य ताद्वि
ध्यं भूयस्त्वात्त्वनुबन्धः ॐ॥५४॥ परमात्मैव भक्त्या दर्शनं प्राप्य मुक्तिं ददातीति प्रधानसाधन
त्वाद्भक्तिः करणत्वेनोच्यते। मायावैभावे च। भक्तिस्थः परमो विष्णुस्तयैवैनं वशं नयेत्। त
येव दर्शनं यातः प्रदद्यान्मुक्तिमेतया। स्नेहानुबन्धो यस्तस्मिन्बहुमानपुरःसरः। भक्तिरित्युच्य
ते सैव कारणं परमेशितुरिति। सर्वशब्दानां ब्रह्मणि प्रवृत्तेश्च॥ ॥ ३४॥ ॥ जीवांशानां पृथगु
क्तेर्नानादियोग्यतापेक्षेति न मन्तव्यं॥ ॐ एक आत्मनः शरीरे भावात् ॐ॥५५॥ अंशांशि
नोरैकत्वमेव। अंशिकर्मनिर्मितशरीर एवांशस्य भावात्॥ ॐ व्यतिरेकस्तद्भावभावित्वान्न तू
पलब्धिवत् ॐ॥५६॥ ज्ञानादिभेदे विद्यमानेपि नांशांशिनोः पृथग्भाव एव। तदुपासनादि
भेदादंशस्य। परमसंहितायां च। अंशिनस्तु पृथक् जाता अंशास्तस्यैव कर्मणा। पुनरैक्यं प्रप

सू० ३ घंते नान्नकार्यविचारणेति ॥ ५७ ॥ ३५ ॥ ५७ ॥ ॐ अंगावबद्धास्तु न शाखासु हि प्रतिवेदं ॐ ॥ भा० ३
ब्रह्माद्यंगदेवतावबद्धोपासनादि प्रतिशाखं प्रतिवेदं च नोपसंह्रीयते । हिशब्दः समवाद्योतमं
वाह्यानां गदेवाद्युपासनं । उपसंहार्यमित्याहु वेद सिद्धांतवेदिन इति ब्रह्मतर्कवचनात् ॥ ॐ मं
त्रादिवद्वाविरोधः ॐ ॥ ५८ ॥ सर्वदेवतामंत्रा यथाधीयंते एवमविरोधो वा । उपासनांगदेवानां
५८ परमांगतयाप्यवेत् । उपसंहृति विशेषेतु फलानामन्यथा ननु । पुरुषाणां विशेषाद्वा यथायोगं भवि
ष्यतीति ब्रह्मतंत्रे ॥ ५७ ॥ ३६ ॥ ५७ ॥ ॐ भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति ॐ ॥ ५९ ॥ सर्वगुणेषु भूम
गुणस्य ज्यायस्त्वं क्रतुवत्सर्वत्र सहभावात् । दीक्षा प्रायणीयोदयनियसवनत्रयावभृथात्मकः क्र ५८
तुः । भूमैव देवः परमो ह्युपास्यो नैवाभूमा फलमेषां विधत्ते । तस्माद्भूमागुणतो वै विशिष्टो यथा क्र
तुः कर्ममध्ये विशिष्ट इति गोपवनश्रुतिः ॥ ॐ नानाशब्दादिभेदात् ॐ ॥ ६० ॥ शब्दोनुमा तथैवा
क्षो योग्यता से ह तः सदा । ब्रह्मादीनामेकमर्थं बहुधा दर्शयंति हि । अतः पूर्णत्वमीशस्य नानै

८ ज्ञानसामर्थ्यमस्मिन्पादउच्यते॥ ॐ पुरुषार्थोऽतः शब्दादिति बादरायणः ॐ॥ १ ॥ ८

सू ३ स्तत्तद्गुणान्परमेसंहरेत तोऽप्यापि तत्रैव विचिंत्य देवान्स्थानं मुमुक्षुः परमं व्रजेतेति काषायणश्रुतौ भा ३

समाहारवचनाच्च॥ ॐ गुणसाधारण्यश्रुतेश्च ॐ॥ ६६॥ साधारण्यात्सर्वगुणाः परस्यसमा

हार्यास्तत्वदृशो मुमुक्षोरिति माण्डव्यश्रुतेश्च॥ ६७ ॥ ४१ ॥ ६२ ॥ ॐ न वा तत्सहभावश्रुतेः ॐ॥ ६७॥

नवांगदेवतोपसंहारः कार्यः। उपसंहारस्य सहाश्रवणात्॥ ॐ दर्शनाच्च ॐ॥ ६८॥ सर्वो

६५ ज्ञानः परानंदरूपो आत्मेत्येवं नित्यदोपासनं स्यात्॥ नान्यत्किंचित्समुपासीत धीरः सर्वैर्गुणैर्दे

वगणा उपासत इति कमठश्रुतौ॥ ॥ इति श्रीमद्व्यासद्वैपायनकृतब्रह्मसूत्रभाष्ये

श्रीमदानंदतीर्थभगवत्पादविरचिते त्रितीयाध्यायस्य तृतीयः पादः॥ ॥ श्रीरस्तु॥

यद्दर्शनार्थमुपासनोक्तातस्माद्दर्शनात्सर्वपुरुषार्थप्राप्तिरिति बादरायणो मन्यते। यं यं लोकं मन ६५

सा संविभाति विशुद्धसत्वः कामयते यांश्च कामान्॥ तं तं लोकं जयते तांश्च कामांस्तस्मादात्म

ज्ञं ह्यर्चयेद्भूतिकाम इति शब्दात्॥ ॐ शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः ॐ॥ १॥

65

वेषां प्रदृश्यते। अतः फलस्य नानात्वे नानैवोपासनं यत इति ब्रह्मतर्के। अतोऽभूमत्वमपि नानै
वोपास्यते॥ ५५॥३८॥ ५५॥ ॐ विकल्पोऽविशिष्टफलत्वात् ॐ॥ ६१॥ स्वयोग्योपासनानंतरं
सामान्यस्यापि कस्यचिदुपासनं विकल्पेन भवति विशिष्टफलापेक्षया॥ मुक्त्यर्थमात्मयोग्यं
हि कार्यमेव ह्युपासनं। नृसिंहादिकमन्यच्च दुरितादिनिवर्तये। उपासते यथायोगं न वा फल
विशेषत इति च ब्रह्मतर्के॥ ॐ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॐ॥ ६२॥
यस्य यस्य हि यः कामस्तस्य तस्य ह्युपासनं। तादृशानां गुणानां च समाहारं प्रकल्पयेत्॥ अका
महान्मुमुक्षूणां न वा तेषामुपासनं। तुष्ट्यर्थमीश्वरस्यैव नैवोपासा विदुष्यतीति ब्रह्मतन्त्रे॥ ५५॥ ८५
मे ॐ अंगेषु यथाश्रयभावः ॐ॥ ६३॥ अंगदेवतानां यथा परस्परांगाश्रयत्वं चक्षोः सूर्योऽजाय
तेत्यादि तथा भावना कर्तव्या॥ ॐ शिष्टेश्च ॐ॥ ६४॥ यस्मिन्यस्मिन्यो हि चांगे निविष्टः परस्पराचिं
सः स तथा तथैवेति पौत्रायणश्रुतेः॥ ॐ समाहारात् ॐ॥ ६५॥ अंगैः परा ह्येहि देवा विसृष्टा

अस्यैवमोक्षसाधनत्वंज्ञानस्यस्वर्गादिषु।तत्साधनकर्मशेषत्वेन।स्वर्गंधनाद्दृहतोवैरला
श्चप्राप्संतिधीरानत्वधीराःकुतश्चेदितिवदतिजैमिनिः॥ॐआचारदर्शनात्ॐ॥२॥ज्ञानिना
मेवदेवादीनामाचारदर्शनात्॥ॐतच्छ्रुतेःॐ॥३॥यदेवविद्ययाकरोतिश्रद्धयोपनिषदातदे
स्य वैवीर्यवत्तरंभवतीतिश्रुतेः॥ॐसमन्वारंभणात्ॐ॥४॥कर्मैवदेहंदैविकंमानुषंवाप्यन्वार
भेत्तापरस्तत्रहेतुः।भोगांस्तदीयांश्चयथाविभागंददातिकर्मैवशुभाशुभंयदितिभाट्टश्रु
तेश्च।संशब्दःप्राधान्यंदर्शयति॥ॐतद्वतोविधानात्ॐ॥५॥ज्ञानीचकर्मापिसद्दृष्टादिनानि
66 कुर्यादिकामःभवेदितिकमठश्रुतौज्ञानवतोविधानात्॥ॐनियमाच्चॐ॥६॥कुर्वन्नेवेहक पि
र्माणिजिजीविषेच्छतंसमाः।एवंत्वयिनान्यथेतोस्तिनकर्मलिप्यतेनरइति॥ॐअधिकोपदे
शात्तुबादरायणस्यैवंतद्दर्शनात्ॐ॥७॥ज्ञानादेवस्वर्गोज्ञानादेवापवर्गोज्ञानादेवसर्वेका
माःसंपद्यंतेतथापितुयथायथाकर्मकुरुतेतथातथाधिकोभवतीतिकौठरव्यश्रुतेःयुधिरा

सततं

मे स्य

सू॰ ३ दीनां राजसूयादीनां फलाधिक्यदर्शनाच्चेति बादरायणसूत्रं ॥ तुल्यं तु दर्शनं ॥ ८ ॥ रा भा॰
जसूयादिकृतेन वरतो च समं एव तेषां विज्ञानं। विज्ञानमेतं सर्वेषां मुनीनां ब्रह्मदर्शनात् ॥ स्याद्देव
मोक्षो नान्यस्मादिति तत्रापि चिन्तता ॥ स्वर्गादयः क्रमेणैव नान्ये मे स परे विदुः। ज्ञानेनाधिक्यमि
घा त्याहुर्जैमिन्यास्तु केचन। अदृष्टमेव ज्ञानेन दृष्टं नैवोपलभ्यते। इति केचिद्विदुः प्राहुर्व्याससिष्या
९६ इमे खिलाः ॥ यस्मा व्यासमतं सर्वं स समेव ततो खिलं। यथाकाशस्य नंतोपि व्यामोहस्तावधिस्त
था। प्रादेशोपि हि सत्येन तथै तेषां मतानि तु। स्वयं तु भगवान्व्यासो व्याह ज्ञानमहांशुमान्। अन
न्ताकाशवदस्य नि खिलं पुरुषोत्तमः। ज्ञानेनैवाप्यते सर्वं कर्मणाप्यधिकं भवेत्। इति प्राह महा ९६
योगी पुमर्थानां विनिर्णयमिति भविष्यत्सर्वेपि। ज्ञानिनामपि देवानां विशेषः कर्मभिर्भवेत्।
वीर्यवन्ते वा ज्ञानस्य न विशेषो हि कर्मणीति च ब्रह्मतर्के ॥ ८ ॥ १ ॥ ८ ॥ सर्वेषां पुरुषार्थापेक्ष
त्वाद्ज्ञानाधिकारित्वे प्राप्ते अत आह ॥ असार्वत्रिकी ॥ १० ॥ न सर्वेषामधिकारः ॥ विभा

गः ज्ञातवत् ॐ ॥१०॥ नवकोट्यो हि देवानां तेषां मध्ये शतस्य तु । सोमाधिकारो वेदोक्तो ब्रह्मणी द्देश
ताधिके । यथा तथैवासंख्येयाः प्रजास्तासु क्रियावनः । ज्ञानाधिकारी संप्रोक्तो विष्णुपादैकसंश्रय
इति वचनात् । सुखापेक्षयाँ साम्येपि विभाग इष्यते ऽधिकारार्थी । कस्याधिकारः ॥ ॐ अध्ययनमा
त्रवतः ॐ ॥११॥ अवैष्णवस्य वेदेपि ह्यधिकारो न विद्यते । गुरुभक्तिविहीनस्य शमादिरहितस्य
च । न च वर्णावरस्यापि तस्मादध्ययनान्वितः । ब्रह्मज्ञाने तु वेदोक्ते ह्यधिकारी सतां मत इति ब्रह्म
तर्के । पठेद्वेदान् यथार्थं निधीयीताथ विचार्य ब्रह्म विंदेदिति च कौषारव श्रुतिः ॥ ७॥ २॥ ६२॥ ॐ
नाविशेषात् ॐ ॥१२॥ न सामान्येनाधिकारो देवादीनां । अथ पुमर्थसाधनान्यर्थो धर्मो ज्ञान
मित्युत्तरोत्तरं । तत्राधिकारिणो मनुष्याः पयो देवा इत्युत्तरोत्तरमिति कौडिंन्य श्रुतिः ॥ ६२॥ ३॥ ५॥
अथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एवेति
ज्ञानिनो यथेष्टाचरणं विधीयत इति अत आह ॥ ॐ स्तुतयेनुमतिर्वा ॐ ॥१३॥ न विधिर्ज्ञा

स्तू ३ निनःस्तुतयेनुमतिमात्रंवा।युज्यतेच।ॐकामकारेणचैकेॐ॥१४॥कामचाराःकामभक्षाः भा
कामवादाःकामेनैवेमंदेहमुत्सृज्याथपरासरमीयुरनारंभणमितिचैकेपठंति॥ॐउपमर्दंच ३
ॐ॥१५॥ॐमित्युच्चार्यांतरिममात्मानमभिपश्योपमृद्यपुण्यंचपापंचकाममाचरंतोब्रह्मानु
च व्रजंतीतितुरश्रुतौ॥ॐऊर्ध्वरेतःसुचशब्देहिॐ॥१६॥नतावताकामचारिणांज्ञा॥नैष्ठिका
६ रःयश्चमंपरमंगुह्यमूर्ध्वरेतःसुश्रावयेत्॥नतथाविद्यतेभूयान्यंप्राप्यान्योपिभूयसइतिमाठ
रश्रुतेः॥ॐपरामर्शंजैमिनिरचोदनाचापवदतिहिॐ॥१७॥प्रातरुत्थायाथसंध्यामुपासीतय
संध्यामुपासतेब्रह्मैवतदुपास्तेऽथदेवानमेज्जुहुयाद्वेदानावर्तयीतनान्यत्किंचिदाचरेत्॥नसु ६७
रांपिबेन्नपलांडुभक्षयीतनभ्रष्टंवदेन्नविस्मरेतात्मानंसोमंपिबेद्ध्रुतशेषेणावर्तयेदित्युक्ताचार
परामर्शेनविधिबंधवर्जितत्वेनकामतएवतस्याचरणंकामचारइतिजैमिनिर्मन्यते नचनिषि
द्धंकर्मकर्तव्यमेवेतिचोदना।ब्राह्मणोनहंतव्यइत्याद्यपवादश्च।॥ॐअनुष्ठेयंबादरायणःसा

प्रश्रुतेः॥ॐ॥१८॥अनुष्ठेयानांमध्यएवकामतश्चरणंकामते।निरस्तिरितिबादरायणोमन्यते।
केनस्याद्येनस्यात्तेनेदृशएवेतिसाम्यश्रुतेः॥यस्मात्सरतिरेवस्याद्ब्रह्मवृत्तस्थमानवः॥आत्मसे
वचसंतुष्टस्तस्यकार्यंनविद्यतइतिभगवद्वचनाच्च॥ॐविधिर्वाधारणवत्॥ॐ॥१९॥केनस्या
द्येनस्यादितिविधिर्वा।यथावेदधारणंत्रैवर्णिकानांविहितंनान्येषामेवंस्वमतानुसारिणीप्रव
त्तिर्ज्ञानिनांविहिता॥नतत्राधर्मशंकाकार्यानान्येषामितिवा।स्वेच्छयैवप्रवृत्तिस्तुब्रह्मणोविधि
चोदिता।नाशंक्यंतन्मतंक्वापिविष्णोःप्रसक्तचोदना॥इतरेषांनविहितास्वेच्छाचारवृत्तिःकथंच
नेतिब्राह्मे॥ॐस्तुतिमात्रमुपादानादितिचेन्नापूर्वत्वात्॥ॐ॥२०॥स्तुतिमात्रमेवस्वेच्छाचर
णंनविधिस्तैरपिसामान्यविधिस्वीकारादितिचेन्न।अपूर्वत्वात्परवशत्वात्।सर्वविध्यतिक्रमे
न णस्तुतिमात्रविषयत्वंपरब्रह्मणएवहिविधीनांविषयात्वन्येब्रह्मणःस्वेच्छयाकृतौ।परस्य
ब्रह्मणोह्येवसर्वविध्यतिदूरतेतिब्राह्मतर्के॥ॐभावशब्दाच्च॥ॐ॥२१॥यथाविधानमपरेवि
धिर्भाविप्रजापतेः।ब्रह्मणःपरमस्यैवसर्वविध्यतिदूरतेतिचतुरश्रुतौ॥ॐपरिप्लवार्था श्री

इति चेन्नाविशेषितत्वात् ॥ २२ ॥ केनस्याद्येनस्यादित्यादयः स्थिरवन्निरर्था इति चेन्न । त्रे
धाहि ज्ञानिनो भवंति विधिनियता अनियताः स्वेच्छानियता इति । विधिनियता मनुष्याः अ
नियता हि देवा ब्रह्मैव स्वेच्छानियत इति गोपवनश्रुतौ विशेषितत्वात् ॥ ॐ तथा चैकवाक्योप
९८ बंधात् ॐ ॥ २३ ॥ एवं सति विधिवाक्यानां स्वेच्छावृत्तिवाक्यानां च संबंधो भवति ॐ अत एव
चाग्नींधनाद्यनपेक्षा ॐ ॥ २४ ॥ अत एव ज्ञानस्य मोक्षदाने नाग्निहोत्राद्यपेक्षा । ब्रह्मतर्के च ।
एषां ज्ञानं समुत्पन्नं तेषां मोक्षो विनिश्चितः । शुभकर्माधिकं विपरीते विपर्ययः । स्वेच्छानु
वर्त्यैव सर्वे ब्रह्मरूपाः प्रायशस्तथा देवानामपि सर्वेषां विशेषादुत्तरोत्तरमिति ॥ ॐ सर्वापेक्षा
च यज्ञादिश्रुतेरश्ववत् ॐ ॥ २५ ॥ सर्वधर्मापेक्षा च ज्ञानस्योत्पत्तौ विविदिषंति । यज्ञेन दानेन तप
साऽनाशकेनेति श्रुतेः ॥ यथा गतिनिष्पत्त्यर्थमश्वादयोऽपेक्ष्यंते न तु निष्पन्नगतेर्ग्रामादिप्राप्तौ ॥
ॐ शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात् ॐ ॥ २६ ॥ यद्यपि ज्ञा

नेनैव मोक्षो नियतस्तथापि ज्ञानी शमदमाद्युपेतः स्यात् । आचार्याद्विद्यामवाप्य तमाज्ञानमपि प
स्य शांतो भवेद्दांतो भवेदनुकूलो भवेदाचार्यं परिचरेदाचार्यमिति माठरश्रुतौ ज्ञानिनो ४
पि तद्विधेः ॥ ब्राह्मीं वाव त उपनिषदमब्रूमेति तस्यै तपो दमः कर्मेति प्रतिष्ठा वेदाः सर्वांगानि स
त्यमायतनं यो वा एतामुपनिषदं वेदेति ज्ञानांगतया तेषामवश्यानुष्ठेयत्वात् ॥ यस्य ज्ञानं तस्य मो
क्ष इति नात्र विचारणा । तस्य शांत्यादयोंगानि तस्मात्तेषामनुष्ठितिः ॥ अवश्यकरणीयास्स्या
दन्यथाल्पफलं भवेदिति चाग्नेये । तुशब्दः पूर्वपक्षं सूचयति ॥ ॐ सर्वान्नानुमतिश्च प्रा
णात्यये तद्दर्शनात् ॐ ॥ २७ ॥ यदि ह वा अप्येवं विन्निखिलं भक्षयीतैवमेव स भवती
ति सर्वान्नानुमतिः प्राणात्यये विषया ॥ न वा अजीविष्यमिमानखादन्निति होवाच कामो म
उदपानमिति दर्शनात् ॥ ॐ अबाधाच्च ॐ ॥ २८ ॥ अन्यायचरणाभावेन हि ज्ञानस्याबाधनं
अतो विद्वानपि न्यायं वर्तेत कथं सिध्यय इति ब्रह्मतर्के ॥ अपि स्मर्यते ॐ ॥ २९ ॥ अनीतानागतज्ञा
नी त्रैलोक्योद्धरणाक्षमः ॥ एतादृशोपि नाचारं श्रौतं स्मार्तं विसर्जयेदिति हरिवंशेषु ॥ ॐ शब्द

श्रू २ ॐअतोकामचारेॐ॥३०॥ सयएतदेवंविद्वेवंमन्वान एवंपश्यन्न कामचरितंचरेन्न कामभक्षयी भा
तनकाममनुवर्ततेतिकौण्डिन्यश्रुतिः॥ अतइत्यल्पफलंसूचयतिननिषिद्धानिवर्तेतपूर्णज्ञानफ
लेच्छयेतिपाद्मे॥ ॐविहितत्वाच्चाश्रमकर्मापिॐ॥३१॥ नकेवलंनिषिद्धाकरणेनपूर्यते। कर्त
व्यंचवर्णाश्रमविहितंकर्मापश्यन्नपीममात्मानंकुर्यात्कर्मविचारयन्॥ यदात्मनःसुनियतमानं
६९ दात्कर्षमाप्नुयादितिकौषारवश्रुतौविहितत्वाच्च। अपिशब्दोवर्णधर्मसमुच्चयार्थः॥ ॐसहका
रित्वेनचॐ॥३२॥ यथाराज्ञःसहकार्येवमंत्रीतथाप्यतेनंक्षितिपःकार्यमृच्छेत्॥ एवंज्ञानंकर्मवि
नापिकार्यसहायस्तूतंनविचारःकुतश्चिदितिकमठश्रुतौसहकारित्वोक्तेश्च। ज्ञानान्मोक्षोभवे
त्सेवसर्वकार्यकृतोपितु॥ ध्यानंदोहसतत्कार्याद्दुग्धंरक्षाविवर्धतइतिब्रह्मांडे॥ सर्वदुःखनि ६९
वृत्तिस्तुज्ञानिनोनिश्चितैवहि॥ उपासयाकर्मभिश्चभक्त्याचानंदचिन्नतेतिबृहत्तंत्रे॥ धर्मस्यचानू
पचित्रत्वाद्यायोदेवमनोगतः॥ सएवधर्मोविज्ञेयोनह्येतल्लोकसंमिताइतिचपाद्मे॥
ॐसर्वथापितुतएवोभयलिंगात्ॐ॥३३॥ सर्वप्रकारेणोत्साहेपियज्ञानयोग्यास्तएवब्रा

नमान्मुवंतिनान्ये॥ य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोपिपासः सत्यकामः स
सत्यसंकल्पः सोन्वेष्टव्यः स विजिज्ञासितव्य इति श्रुत्याचार्योपदेशसाम्येपि विरोचनो विपरीतज्ञा
नमापेंद्रः सम्यग्ज्ञानमित्युभयविधलिंगात्॥ ॐ अनभिभवं च दर्शयति ॐ॥२४॥ दैवीमेव सं
पत्तिं देवा अभिगच्छंत्यासुरीमेव चासुरा नैतयोरभिभवः कदाचित्स्वभाव एवावतिष्ठत इति
स्वभावानभिभवं च दर्शयति॥ ॐ अंतरा चापि तु तद्दृष्टेः ॐ॥२५॥ सम्यग्ज्ञानविपरीतज्ञानयो
रंतरा स्थितानामपि देवासुरभावयोर्दार्ढ्यदृष्टेः॥ ॐ अपि स्मर्यते ॐ॥२६॥ असुरा आसुरे
णैव स्वभावेनैव कर्मणा॥ ज्ञानेन विपरीतेन तमो यांति विनिश्चयात्। देवा दैवस्वभावेन कर्मणा चा
70 था प्यसंशयं। सम्यग्ज्ञानेन परमां गतिं गच्छंति वैष्णवीं। नानयोरन्यभावः कदाचित्क्वापि विद्यते। मानु
षामिश्रगतयोपि चेति स्कांदे॥ ॐ विशेषानुग्रहं च ॐ॥२७॥ शृण्वे वीर उग्रमुग्रं द
मायन्नन्यमन्यमतिनेनीयमानः॥ एधमानद्विळुभयस्य राजा चोष्कूयते विश इंद्रो मनुष्यानि
ति विशेषानुग्रहं च दर्शयति। देवेषु परमेश्वरस्य॥ असुरान्दमयन्विष्णुः स्वपदं च सुरान्नय

सू॰ नू। पुनः पुनर्मानुषांस्तुस्ततावावर्तयत्यसावितिभविष्यत्पर्वणि॥ ॐ अतस्त्वितरज्यायो लिंगा भा॰
३ च्च ॐ॥३८॥ देवभागाद् असुरभाग एव बहुलः। तस्मात्तज्जनतामियादिति लिंगात्॥ चशब्दात्ततः क
नीयसा एव देवा ज्यायसो असुरा इति श्रुतेश्च॥ असुरा बहुला यस्मात्तस्मात्तज्जनतामियादि
ति ब्राह्मे॥ ॐ तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ॐ॥३९॥ असुरजाते
७० रेवासुरत्वं देवजातेरेव देवत्वं जैमिनेरपि सिद्धमेव॥ नासुरा दैवीं न देवा आसुरीं न मनुष्या दै
वीमासुरीं च गतिमीयुरा लीयामेव गतिमनुभवन्तीति नियमश्रुतेः। नासुराणां दैवं रूपं न देवा
स नामासुरं न चोभयं मनुष्याणां यो यद्रूपः स तद्रूपो निसर्गो ह्येष भवतीत्यतद्रूपत्वश्रुतेः। तं भूति ७०
रिति देवा उपासांचक्रिरे ते बभूवुस्तस्मा ह्याप्येतर्हि सुप्तो भूर्भूरित्येव प्रश्वसत्यभूतिरित्यसु
रास्ते ह पराबभूवुरिति देवासुराणां भावाभावश्रुतेश्च। देवानां भूतिरित्येवमनो विष्णोः स्वभाव
तः। असुराणामभूतिर्हि नैतन्नेयमतोऽन्यथा। देवाः शापाभिभूतत्वात्स्वाह्लादाद्या बभूविरे। अतः
सुगतिरेतेषां नान्यथाव्ययोऽभवेदिति चाध्यात्मे॥ ॐ न चाधिकारिकमपि पतनानुमानात्तद्यो

॥ सू० ७९ ॥ ८० ॥ न च परमात्मैश्वर्यादिकमाकांक्ष्यं किमु परस्येति सूचयितुमपिशब्दः ॥ चशब्दस्तु ज्ञाना
र्थिनां पूर्वोक्तादिस्थं भावानां रसं सूचकः ॥ अयोग्यमारोढुं प्रयतमानस्य पतनं हि दृश्यते ॥ एवमयोग्यस्य परमात्मै
श्वर्यस्य ब्रह्मादिपदस्याकांक्षायां पतनमनुमीयते ॥ न देवपदमन्विच्छन्ति कुत एव हरेर्गुणान् ॥ इच्छन्पत
ति पूर्वस्मादधस्ताद्यत्र नो स्थितिरिति ब्रह्माण्डे ॥ स्वकीयमिच्छमानं तु राजा घातयेति हि ॥ एवमेवसु
राद्योऽप्यहरिश्चस्वपदेच्छुकमित्यनुमानरूपवाक्याच्च ॥ मायासिरूहिस्स्पष्टतरं ज्ञायामारुरुक्षतः ॥
अवदत्सूनधूनथा इति च श्रुतिः ॥ ॐ उपपूर्वमपीत्येके भावशमनवत्तदुक्तं ॐ ॥ ८१ ॥ उपदेवपदं
च नाकांक्ष्यमित्येके भावशमनवद्द्विपदवद्देव ॥ तथोक्तं मिं ऊ घुम्नश्रुतौ ॥ अथ यंऋषीन्प्रजापती थ
आकांक्षे देवं न गंधर्वान्न विद्याधरान्न सिध्यामिति बृहत्संहितायां च ॥ न देवानपि कांक्षेत कुत एव ह
रेर्गुणान् ॥ प्राजापत्याम्न चापश्चिगंधर्वादीनपि कंचित् ॥ रव्यादिषु विशेषे तु दोषो नैवा विशेषतद
ति विशेषदर्शनार्थमेकरस्युक्तं ॥ ॐ बहिस्तूभयथापि स्मृतेराचाराच्च ॐ ॥ ८२ ॥ देवऋषिगंधर्वा
दिपदेभ्योऽन्यत्र शुभविषय आकांक्षायामनाकांक्षायां च न पतनं ॥ देवऋषिगंधर्वाणां पदाकांक्ष ॥

सू० २ पतेर्ध्रुवं। अन्यत्र शुभमाकांक्षन्नपतेदविरोधत इति स्मृतेः॥ नानात्वमेव कामानां नाकामः क्वचिदृश्य- भा० ७
ते। अतोऽविरोधकामः स्यादकामस्तेन भण्यत इत्याचाराच्च॥ ॐ स्वामिनः फलश्रुतेरित्यात्रेयः॥ ॐ
ब्रह्मविदाप्नोति परमित्यादिफलं स्वामिनां देवानामेव भवति। यदु किंचेमाः प्रजाः शुभमाचरं-
७१ ति देवा एव तदाचरंति। यदु किंचेमाः प्रजा विजानते देवा एव तद्विजानते देवानां ह्येतद्भवतीति स्वा-
मीहि फलमश्नुते नास्वामी कर्म कुर्वाण इति माध्यंदिनायनश्रुतेरित्यात्रेयो मन्यते॥ ॐ आ-
र्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते॥ ॐ॥ ४४॥ सत्रयागेष्वृत्विजामपि फलदर्शनादन्यफलं
प्रजानामपि भवतीत्यौडुलोमिर्मन्यते। तदर्थं देवैः क्रियमाणत्वात्॥ ॐ सहकार्यंतरविधिः पक्षे- ७१
ण तृतीयं तद्वतो विध्यादिवत्॥ ॐ॥ ४५॥ तृतीयः स्वपक्षो देवानां ज्ञानादिकर्मापि सहकार्यंतर-
त्वेन प्रजा विधीयंते। यथा प्रजावतो राज्ञः प्रजाः सहकारित्वेन विधीयंते। यथाचार्यस्य शिष्याः
वोराज्ञेच। ज्ञानादिदानं देवानां विष्णुना साधु चोदितं। वेदे च तेषां विहितं तत्राचार्यो महत्तरः॥
विहितः सहकारित्वे सहकार्यंतरं प्रजाः। पात्रत्वेन यथा राज्ञो यथा शिष्या गुरोरपि। तस्मा-

प्युतं फलं तासामाचार्याणांमहत्तरं। ततोमहत्तरं प्रोक्तं देवानामुत्तरोत्तरमिति ।।ॐ कृत्स्नभा
वात्तु गृहिणोपसंहारः ॐ।।४६।। कुटुंबी शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधदि
सुक्त्वा नचपुनरावर्तत इति गृहिणोपसंहारः क्रियते। तस्माद्गृहस्थस्यैवोत्तमत्वमितिनमंत
व्यं। यतः कृत्स्नगृहस्थान्देवानपेक्षायैवोपसंहारः क्रियते। कृत्स्नाश्चैते गृहिणो देवाः कृत्स्ना
प्तेयतयोतएषांनपुत्रादायमुपयंति नचैते गृहान्विसृजंत्यरागाऽद्वेषाऽलोभाः सर्वभोगाः
सर्वज्ञाः सर्वकर्तार इति पौत्रायणश्रुतिः।।ॐ मौनवदितरेषामप्युपदेशात् ॐ।।४७।।न
चाश्रमद्वयमेव देवानां। देवाएव ब्रह्मचारिणो देवाएव गृहस्था देवाएव वनस्था यथैते मुन
१५ यएवं सर्ववर्णाः सर्वाश्रमाः सर्वत्रैते कर्म कुर्वंतीति कौठरव्यश्रुतौ यतित्वदृष्टांतेनान्येषा
मप्युपदेशात्।।ॐ अनाविष्कुर्वन्नन्वयात् ॐ।।४८।।एतां विद्यामधीत्य ब्रह्मदर्शीवाभ
वति।।सएतां मनुष्येषु विब्रूयाद्यथायथाऽवै ब्रूयात्तथातथाधिको भवतीति माठरश्रुतौ

सू २ विद्यादानंश्रूयते तच्चबहूनांस्वीकरणार्थमा॰विष्कारेणेतिनमंतव्यं। अन्वयायुक्तेः। आवि भा ८
ष्कारेअयोग्यानामपिस्वीकारप्राप्तिः। तच्चनिषिद्धं। मानस्तेनेभ्योयेऽभिद्रुहस्पदेनिरामिणो
रिपवोऽन्येषुजागृधुः। एषांनैतन्नापरंकिंचनैकंब्रह्मणस्पतेब्रूहितेभ्यःकदाचित्। अथोग्रामे
नोपरतामनुष्यायेधर्मिणोब्रूहितेभ्यःसद्दानः। आदेवानामोहतेविव्रियोहृदिबृहस्पतेन
८२ परःसाम्नोविदुरितिविद्याहवैब्राह्मणमाजगामगोपायमांसेवधिष्टेऽहमस्मि। अनार्यका
यानृजवेशठायनमांब्रूयात्ऋजवेब्रूहिनियमितिच॥ ॐ ऐहिकमप्रस्तुतप्रतिबंधेतद्दर्श ८२
नात् ॐ॥ ८१॥ आत्मावाअरेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यइतिदर्शनार्थंश्रवणा
दिविधीयते। तच्चदर्शनमैहिकमेवप्रारब्धप्रतिबंधाभावे। श्रुत्वात्मानंमतिपूर्वंह्युपास्यइहैव
दृष्टिंपरमस्यविंदेत्। यद्यारब्धंकर्मनिबंधकंस्यात्सैवपश्येयोगमेवान्ववेक्ष्येतिसोप
र्णश्रुतौदर्शनात्। अनादिजन्मसंबंधंनिर्भेत्तुंपापपंजरं। यावत्सासेवयाशक्यंतावत्का

र्येन संशयः। यावद्दूरे स्थितो गम्यस्तावद्गंतव्यमेव हि।। इह जन्मांतरे वापि तावत्सैव नु दर्शनं
श्रवणं मननं चैव निदिध्यासनमेव च। परे गुरौ च या भक्तिः परिचर्यादिकं हरेः। एषा सेवेति
संप्रोक्ता यया तद्दर्शनं भवेदिति ब्रह्मसंहितायां।। ॐ एवं मुक्तिफलानियमस्तदवस्थावधृ
तेस्तदवस्थावधृतेः ॐ ।।५०।। एवमेव प्रारब्धकर्माभावे शरीरपातानंतरमेव मोक्षस्त
द्भावे जन्मांतराणीत्यनियमः।। धर्मोस्वर्गे विधर्मो निरकमे।। येवं ब्रह्मसंस्थोऽमृतमेवेति
ब्रह्मसंस्थस्य मोक्षस्यैवावधारणात्। विद्वानमृतमाप्नोति नात्र कार्या विचारणा। अवश्यं
यदारब्धं कर्म तत्रैव गच्छति। न चेद्बहूनि जन्मानि प्राप्यैवांते न संशय इति नारायणाध्यात्मे।।
इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानंदतीर्थभगवत्पादविरचिते
तृतीयाध्यायस्य चतुर्थः पादः।। श्री।। ।।ॐ।। ॐ ।।ॐ।। ॐ ।।ॐ ।। ॐ ।।ॐ ।।

सू° ४ श्रीरस्तु। फलं निगद्यतेऽस्मिन्नध्याये कर्मनाशाख्यं फलमस्मिन्पादे। निःसंशं कार्यं सर्वथाभ्यासं साधनं प्रथमत भा° १
उच्यते। प्रायिकत्वाश्चाध्यायानां पादानां च न विरोधः॥ ॐ आवृत्तिरसकृदुपदेशात् ॐ॥ १॥ आत्मा वा
अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादीनां नाग्निष्टोमादिवदेकवारेणैव फलप्राप्तिः किं त्वाव
त्तिः कर्तव्या। स एषोऽणिमैतदात्म्यमिदं सर्वमित्याद्यसकृदुपदेशात्॥ ॐ लिंगाच्च ॐ॥ २॥ स तपोऽतप्य
त पुनरेव वरुणं पितरमुपससारेत्यावर्तनलिंगाच्च॥ निःसंशः श्रवणं चैव मननं ध्यानमेव च कर्तव्य
८३ मेव पुरुषैर्ब्रह्मदर्शनमिच्छुभिरिति ब्रह्मतर्के॥ ५५॥ १॥ ५५॥ ॐ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॐ
आत्मेत्युपदेश उपासनं च मोक्षार्थिभिः सर्वथा कार्यमेव। नान्यं विचिन्तयेदात्मानमेवाहं विजानी ८३
यामात्मानमुपास आत्मा हि ममैष भवतीति ह्युपगच्छन्ति। आत्मेत्येवोपास्यात्मेत्येव विजानीहि नान्यं
किंचन विजानथ आत्मा ह्येवैष भवतीति ग्राहयन्ति च॥ आत्मेत्युपासनं कार्यं सर्वथैव मुमुक्षुभिः। मा
नाक्लेशसमायुक्तोऽप्येतावन्नैव विस्मरेदिति भविष्यत्पर्वणि। आत्मा विष्णुरिति ध्यानं विशेषेण विशेष्यतः॥
सर्वेषां च मुमुक्षूणामुपदेशश्च तादृशः। कर्तव्यो नास्य हानेन कस्यचिन्मोक्ष इष्यत इति ब्राह्मे॥ ॐ
न प्रतीके न हि सः ॐ॥ ४॥ नामब्रह्मेत्युपास्व इत्यादिना शब्दभ्रांत्यान प्रतीके ब्रह्मदृष्टिः कार्या। किंतु त

॥१॥नामादिप्राणपर्यंतमुभयोः प्रथमा बलःऐक्यदृष्टिमितिभ्यां तिरद्रुत्यानां भविष्याति॥१॥

स्वहृदेनैवोपासनंकार्यं।ब्रह्मतर्केच।नामादिष्वितिरेवात्र ब्रह्मणोहि विधीयते।सर्वार्थो प्रथमायस्मात्सह
मर्थात्ततोमतेति॥५॥३॥५॥ॐब्रह्मदृष्टिरुत्कर्षात्ॐ॥५॥ब्रह्मदृष्टिश्चसर्वथाकार्यैवपरमेश्वरे उ
त्कृष्टत्वात्।ब्रह्मदृष्ट्यासदोपास्यो विष्णुः सर्वैरपिध्रुवं।महत्त्ववाचीह्यब्दोयंमहत्त्वज्ञानमेवहि सर्वतःप्री
तिजनकमतस्तत्सर्वथाभवेत्।आस्येयेवयदोपास्या तदाब्रह्मत्वसंयुता।कार्यैवसर्वथा विष्णोर्ब्रह्मत्वंनप
रित्यजेदिति ब्रह्मतर्के॥५॥४॥५॥ॐआदित्यादिमतयश्चांगउपपत्तेःॐ॥६॥चक्षोःसूर्योऽजायतेत्या
द्युपासनंदेवादीनांकार्यमेव।स्वोत्पत्तिस्थानत्वात्स्वाश्रयत्वान्मुक्तौ तत्रलयस्यापेक्षितत्वाच्चोपपन्नंतेषांतथोपा
सनं।नारायणतंत्रेच।आधिव्याधिनिमित्तेनविक्षिप्तमनसोपितु।गुणानांस्मरणाशक्तौविष्णोर्ब्रह्मत्वमेवतु
स्मर्तव्यंसततंतत्तुनकदाचित्परित्यजेत्।अत्रसर्वगुणानांचयतौ तद्भावइष्यते।स्वोत्पत्त्यंगंचदेवानांवि
ष्णोश्चियंसदैवतु।तेषांतत्रप्रवेशोहिमुक्तिरित्युच्यतेबुधैः।तदाश्रितास्वतेनित्यंतनश्चियंविशेषतइति ५
ॐआसीनःसंभवात्ॐ॥७॥सर्वदोपासनंकुर्वन्नपासीनोविशेषतःकुर्यात्।तदाविक्षेपाल्पत्वेनसं
भवात्।ॐध्यानाच्चॐ॥८॥स्मरणोपासनंचैवध्यानात्मकमितिद्विधा।स्मरणंसर्वदायोग्यंध्यानो
पासनमासने।नैरंतर्यंमनोवृत्तेर्ध्यानमित्युच्यतेबुधैः।आसीनस्यभवेत्तत्तुनशयानस्यनिद्रया।स्थि

ब्र० तस्य गच्छतो वापि विक्षेपस्यैव संभवात् । स्मरणाक्षरमंत्रेयं ध्यानं नास्त्यत्र संशय इति नारायणतंत्रे । अ सू०
४ तो ध्यानं वाच्यं ॥ अचलत्वं चापेक्ष्य ॥ ९ ॥ अचलत्वं च शरीरस्यात्मनः सध्यायचालनं । चलने च शरीर १
स्य चंचलं च मनो भवेदिति ब्रह्मांडे ॥ स्मरंति च ॥ १० ॥ समं कायशिरोग्रीवं धारयन्नचलं स्थिरः । संप्रेक्ष्य नासि
काग्रं स्वं दिशश्चानवलोकयन्निःसादि ॥ यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥ देशकालावस्थादिषु यत्रैकाग्र
८४ ता भवति तत्रैवस्थातव्यं । तमेव देशं शेवेत तत्काले तामवस्थितिं ॥ तानेव भोगान्भुंजीत मनो यत्र प्रसीदति । न हि देश
दिभिः कश्चिद्विशेषः समुदीरितः । मनःप्रसादनार्थं हि देशकालादिचिंतनेति वाराहे ॥ आप्रायणात्तत्रापि हि २
दृष्टं ॥ १२ ॥ यावन्मोक्षस्तावदुपासनादि कार्यं । स यो ह वै तद्भगवन्मनुष्येषु प्रायणांतमोंकारमभिध्यायीतेति हि श्रुतिः
सर्वदैनमुपासीत यावद्विमुक्ति मुक्ता अपि ह्येनमुपासत इति सौपर्णश्रुतिः । श्रुण्वाद्यावदज्ञानं मतिर्यावदयुक्तता ८४
ध्यानं च यावदीक्षा स्यात्तेक्षा कैश्चन बाध्यते । दृष्टेतस्य च ध्यानं यदा दृष्टिर्न विद्यते । भक्तिर्ध्यानं तत्काले नापरमेव
मपि स्फुटा । आ विमुक्तेर्विधिर्निःसंस्यत एवततः परमिति ब्रह्मांडे ॥ तदधिगम उत्तरपूर्वाघयोरश्लेषविना
शौ तद्व्यपदेशात् ॥ १३ ॥ ब्रह्मदर्शने उत्तराघस्याश्लेषः पूर्वाघस्य विनाशश्च । तद्यथैषीकातूलमग्नौ प्रोतं प्रदू
यतएवं हैवास्य सर्वे पाप्मानः प्रदूयंत इति तद्व्यपदेशात् ॥ इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥ पु
ण्यस्याप्येवमश्लेषः पाते । तु शब्दोनुष्ठानवाची यथाश्लेषो विनाशश्च मुक्तस्य तु विकर्मणः ॥ एवं सुकर्मणश्च्या

विपततस्तमसि ध्रुवमित्याम्नेये॥ॐ अनारब्धकार्ये एव तु पूर्वे तदवधेः ॐ॥१५॥ अनारब्धकार्ये एव पूर्वे पु
ण्यपापे विनश्यतः। तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति तदवधेः। तुशब्दः स्मृतिद्योतकः। यदनार
ब्धपापं स्यात्तद्धि नश्यति निश्चयात्। पश्यतो ब्रह्म निर्द्वंद्वं हीनं च ब्रह्म पश्यतः। क्षिपतो वासवे पुण्यनाशो नास्त्यत्र सं
शयः। तस्याप्यारब्धकार्यस्य न विनाशो हि कुत्रचित्। आरब्धयोश्च नाशः स्याद्भोगतः पुण्यपापयोरिति च ना
रायणतंत्रे॥ॐ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॐ॥१६॥ अग्निहोत्राद्यपि मोक्षेऽनुभावाय एव। तुशब्दाद्ब्रह्म
दर्शनवतः। स एनमविदितो न भुनक्ति यथा वेदो वाननूक्तोऽन्यद्वा कर्माकृतं। यदि ह वा अप्यनेवंविन्महत्पुण्यं कर्म करोति तद्धा
स्यांततः क्षीयत एवात्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयते अस्माद्ध्येवात्मनो यद्यत्का
मयते तत्तत्सृजत इति तद्दर्शनात्॥ॐ अतोऽन्यापीत्येकेषामुभयोः ॐ॥१७॥ मुक्तावनुभवकाले यद्यदन्यत् पुण्यमपि वि
नश्यति। अप्रारब्धमनश्लिष्टं च तथा ह्येकेषां पाठः उभयोस्त्यागेन तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृ
प्प त्यामिति। अनभीष्टमनारब्धं पुण्यमस्य विनश्यति किमु पापं परं ब्रह्मज्ञानिनो नात्र संशय इति पाद्मे॥ॐ यदेव विद्ये
ति हि ॐ॥१८॥ ब्रह्मदर्शिकृतमल्पमपि पुण्यं महत्तममनंतं च भवति। यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वी
र्यवत्तरं भवतीति श्रुतेः। न हास्य कर्म क्षीयत इति च। अल्पमात्रकृतो धर्मो भवेज्ज्ञानवतो महान्। महानपि कृतो धर्मोऽज्ञा
नानां निष्फलो भवेदिति च भारते॥ॐ भोगेन त्वितरे क्षपयित्वाथ संपद्यते ॐ॥१९॥ आरब्धपुण्यपापे भोगेन क्ष

सू० ४ पयिहा ब्रह्म संपत्स्यते। अथेति नियमसूचकः। आरब्धपुण्यपापस्य भोगेन क्षपणादनु। प्राप्नोत्येव तमो घोरं ब्रह्मवाना भा० २
त्रसंशयः। ब्रह्मणां ज्ञानकालात्तु पूर्वमारब्धसंक्षयः। नियमेन भवेन्नात्र कार्या काचिद्विचारणेति च नारायणतंत्रे ॥११॥
इति श्री० ब्रह्मसू० भा० श्रीमदानंदतीर्थभगवत्पादविरचिते चतुर्थाध्यायस्य प्रथमः पादः ॥ ॥ छ ॥ श्रीरस्तु
हरिः ॐ देवानां मोक्षउत्क्रांतिश्चाद्धिमा दृ उच्यते। ॐ वाङ्मनसि दर्शनाच्छब्दाच्च ॐ ॥१॥ वागभिमानिन्युमाम
नोभिमानिनि रुद्रे विलीयते वाचो मनो वशात् दर्शनात्। तस्य यावन्न वाङ्मनसि संपद्यत इति शब्दाच्च। उमा वै वाक् स
८५ मुद्दिष्टा मनो रुद्र उदाहृतः। तदेतन्मिथुनं ज्ञात्वा नदांपत्याद्विहीयत इति स्कांदे ॥ ॐ अत एव च सर्वाण्यनु ॐ ॥२॥
अत एव च शब्दात्सर्वाणि दैवतानि यथानुकूलं विलीयंते। अग्नौ सर्वे देवा विलीयंते। अग्निरिंद्रे इंद्र उमायामुमा रुद्रे वि
लीयत एवमन्यानि दैवतानि यथानुकूलमिति गौपवनश्रुतिः ॥ ॐ तन्मनः प्राण उत्तरात् ॐ ॥३॥ मनः प्राण इत्युत्तराद्व
चनात् मनोभिमानी रुद्रः प्राणे। वायौ विलीयते। वायो वै रुद्र उदेति वायौ विलीयते तस्मादाहुर्वायुर्देवानां श्रेष्ठ इति
कौंडिन्यश्रुतिः ॥ ॐ सोध्यक्षे तदुपगमादिभ्यः ॐ ॥४॥ स प्राणः परमात्मनि विलीयते सर्वे प्राणमुपगच्छंति प्रा ८५
णः परमुपगच्छति। प्राणं देवा अनुप्राणंति प्राणः परमनुप्राणितीति तस्मादाहुः प्राणस्य प्राण इति। प्राणः परस्यां दे
वतायां। मुक्ताः संतोग्निदेवाः सर्वे विभुंजते। अग्निरिंद्रं तथेंद्रश्च वायुमाविश्य सोपि तु। आविश्य परमात्मानं भुंक्ते भो
गांस्तु बाह्यकान्। न ह्यानंदो निजस्तेषां परैर्देयः कथंचन। किमु विष्णोः परानंदो नन्ते विष्णाविति श्रुतेः। प्राणस्य तेज

सिद्धयोमार्गमात्रमुदाहृतं। सर्वेशितुश्च सर्वादेस्तस्यान्यत्र लयः कथमित्यादिश्रुतिस्मृतिभ्यः॥ ॐ भूतेषु तच्छ्रुतेः
ॐ॥ ५॥ भूतेष्वन्येषां देवानां लयः। भूतेषु देवा विलीयन्ते॥ भूतानि परे न परं उद्देति नोऽस्तमेति। स एव मध्ये ध्याते
ति बृहच्छ्रुतेः॥ ॐ नैकस्मिन्दर्शयतो हि ॐ॥ ६॥ नैकस्मिन्भूते सर्वेषां देवानां लयः पृथिव्यामप्सु वो विलीयन्ते व
रुणोऽग्निना वृष्णाव यो वायाविन्द्रः सोम आदित्यो बृहस्पतिरित्याकाश एव साध्या विलीयन्ते। ऋभवः पृथिव्यां वरुण
आपोऽग्नयस्तेजसि मरुतो मारुत आकाशे विनायका विलीयन्त इति महोपनिषच्चतुर्वेदशिखा च दर्शयतः। अतो यां
नैको सर्वदेवा विलीयन्त इति सूत्रनिर्दिष्टानामेव॥ ॐ समना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॐ॥ ७॥ देशतः
कालतश्च व्याप्त्या समो नापरमपुरुषो यस्याः सा समना। संसारानुपक्रमा स्यात एवामृतत्वं तस्याः। बृहच्छ्रुतिश्च॥
द्वौ वाव सृष्ट्यनुपक्रमौ प्रकृतिश्च परमश्च द्वावेतौ नित्यमुक्तौ नित्यौ सर्वगतौ चैतौ ज्ञात्वा विमुच्यत इति नैतावता साम्यं
ॐ तदपीतेः संसारव्यपदेशात् ॐ॥ ८॥ समावेतौ प्रकृतिश्च परमश्च नित्यौ सर्वगतौ नित्यमुक्तौ। असमावे
तौ प्रकृतिश्च परमश्च विलीनो हि प्रकृतौ संसारमेति विलीनः परमे ह्यमृतत्वमेतीति सौपर्णश्रुतेः॥ ॐ सूक्ष्मं प्र
माणतश्च तथोपलब्धेः ॐ॥ ९॥ सूक्ष्मत्वं चाधिकं ब्रह्मणः प्रकृतेः ज्ञानानन्दैश्वर्यादि प्रमाणाधिक्यं च सर्वतः
प्रकृतिः सूक्ष्मा प्रकृतेः परमेश्वरः। ज्ञानानन्दौ तथैश्वर्यं गुणाश्चान्ये धिकाः प्रभोरिति हि तुरश्रुतिः॥ ॐ नोपमर्द्दे
नातः ॐ॥ १०॥ अतस्तस्य ये विशेषगुणास्तेषामनुपमर्द्दे नैव साम्यं। देशतः कालतश्चैव समा प्रकृतिरीश्वरे। उभयो

76

२ यत्र जिघ्रंति न पश्यंति न शृण्वंति न विजानंति अथानुष्णावत्स्कृतिश्च प्राकृतं च २

सू रप्यबध्यत्वं तद्बंधः परात्मनः। स्वत एव परेशस्य साध्योपास्ते सदा हरिः। प्रकृतेः प्राकृतस्यापि ये गुणास्ते तु विष्णुना॥ भा

६ नियता नैव केनापि नियता हि हरेर्गुणा इति भविष्यत्पर्वणि॥ॐ अस्यैव चोपपत्तेरूष्मा ॐ॥११॥ द्विधा हीदमवदृश्य २

तदुष्णावदनुष्णावच्च तत्रोष्णावत्परं ब्रह्म यत्र जिघ्रंति। जिघ्रंति च यत्र पश्यंति पश्यंति च यत्र शृण्वंति शृण्वंति

च यत्र जानंति जानंति चेति सौपर्णश्रुतेः किंचित्साम्योपपत्तेः॥ॐ प्रतिषेधादिति चेन्न शारीरात् ॐ॥१२॥

असमो वा एष पुरुषो न हि कश्चिदेवं दृश्यते सर्वे ह्येते अणवो जायंते म्रियंते च क्षिद्रा ह्येते भवंति अथ परो न

८६ जायते न म्रियते पूर्णश्चैष भवतीति चतुर्वेदशिखायां साम्यप्रतिषेधान्नेति चेन्न शारीरादिसाम्यं प्रतिषिध्यते

कुतः॥ॐ स्पष्टो ह्येकेषां ॐ॥१३॥ अथातः समाश्चासमाश्चाभिधीयंते समासमाश्चाथ समानि ब्रह्मणो रूपा

णि यैरुत्पत्तिस्थितिलयो नियतिः प्रायतिश्चैकं ह्येवैतद्भवति। अथासमा ब्रह्मेंद्रो रुद्रः प्रजापतिर्बृहस्पतिर्ये के

च न देवा गंधर्वा मनुष्याः पितरोऽसुरा यक्षाश्चेदं चरमचरं च। अथ समासमा प्रकृतिर्वा विसमा समैषा हि नित्या ८६

ऽजरा न ह्यशाश्चेति स्पष्टो हि माध्यंदिनानां समादिवादः॥ॐ स्मर्यते च ॐ॥१४॥ मत्स्यकूर्मवराहाद्याः समा

विष्णोरभेदतः। ब्रह्माद्यास्त्वसमाः प्रोक्ताः प्रकृतिश्च समासमेति वाराहे॥ॐ तानि परे तथा ह्याह ॐ॥१५॥

प्राणद्वारेण सर्वाण्यपि दैवतानि परमात्मनि विलीयंते। सर्वे देवाः प्राणमाविश्य देवे मुक्ताः लये परमे यांत्यविस्रद

तिकौषारवश्रुतिः ।।ॐअविभागोवचनात्ॐ।।१६।। एतेदेवाएतमात्मानमनुविश्यसत्याःसत्यकामाःसत्यसं
कल्पाःयथाकाममंतर्बहिःपरिचरंतीतिगोपवनश्रुतिः। तत्परमेश्वरकामाद्यविभागेनैवतेषांसत्यकामत्वं।कोमे
नमेकामआगाद्धृदयाद्धृदयंमृत्योरितिवचनात्।मुक्तानांसत्यकामत्वंसामर्थ्यंचपरस्यतु।कामानुकूलकामत्वंना
न्यत्तेषांविधीयतइतिहिब्राह्मे।।ॐतदोकोग्रज्वलनंतत्प्रकाशितद्वारोविद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगा
च्चहार्दानुगृहीतःशताधिकयाॐ।।१८।।उत्क्रांतिकालेहृदयस्याग्रज्वलनंभवति।तस्यहैतस्यहृदयस्याग्रंप्र
द्योततइतिश्रुतेः।तत्प्रकाशितद्वारोनिष्क्रामतिविद्यासामर्थ्यात्।यंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरं।तंतमेवै
तिकौंतेयसदातद्भावभावितइतिस्मृतेर्विद्याशेषगत्यनुस्मरणयोगाच्च।आचार्यस्तुतेगतिंवक्तेतिहिलिंगं।हृदि
स्थेनैवहरिणातस्यैवानुग्रहेणात्।उत्क्रांतिर्ब्रह्मरंध्रेणतमेवोपास्यतोभवेदितिचाध्यात्मे।शतंचैकाचहृदयस्यना
ड्यस्तासांमूर्धानमभिनिःसृतैका।तयोर्ध्वमायन्नमृतत्वमेतिविष्वगन्याउत्क्रमणेभवंतीतिच।।ॐरश्म्यनुसारीॐ।।
निष्क्रामतिसहस्रंवाआदित्यस्यरश्मयआसुनाडीष्वाततास्तत्रश्वेतःसुषुम्नोब्रह्मयानःसुषुम्नायामाततस्तत्प्रका
शेनैषनिर्गच्छतीतिहिपौत्रायणश्रुतिः।।ॐनिशिनेतिचेन्नसंबंधात्ॐ।।२०।।रश्म्यभावान्निशिज्ञानिनउत्क्रमणंन
युक्तमितिचेन्न।सर्वदासंबंधाद्रश्मीनांकिंयह्लल्लं।।ॐयावद्देहभावित्वाद्दर्शयतिचॐ।।२१।।यावद्देहोविद्यतेना

ब्र० वद्रश्मिसंबंधोस्त्येव। संसृष्टा वा एते रश्मयश्चैतेषां वियोगो यावदिदं शरीरमत एतैः पश्यति एते रुक्मासेतैः प्रवर्त्तंत भा०
८ इति माध्यंदिनायनश्रुतिः॥ॐ अतश्चायनेपि हि दक्षिणे ॐ॥२२॥ दक्षिणे मरणाद्याति स्वर्गं ब्रह्मोत्तरायणादित्युक्ते २
पनो पितॄणामिनो दक्षिणोक्तो निर्युज्यते। शतं पंचैव सूर्यस्य दक्षिणायनरश्मयः॥ तावंत एव निर्दिष्टा उत्तरायणरश्मयः॥
ते सर्वे देहसंबंधाः सर्वदा सर्वदेहिनां। महदेवीकादिगंतार उत्तरायणरश्मिभिः॥ निर्गच्छंतीतरैश्चापि यैरेष्टव्यो त
रागतिः उत्तरं दक्षिणमिति तत एवं तु निगद्यते। न तु कालविशेषोस्ति ज्ञानिनां नियमात्फलं। ददाति काले नु गुणोप्यलं
४४ किंचिद्विशिष्यते। अत्युत्तमानां केषांचिन्न विशेषोस्ति कालत इति हि नारायणाध्यात्मे॥ॐ योगिनः प्रतिस्मर्ये
ते स्मार्ते चैते ॐ॥२३॥ न केवलं कालादिरूते ब्रह्मचंद्रगती स्मर्येते किंतु ज्ञानयोगिनः कर्मयोगिनश्च। अग्नि
र्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं। तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः। धूमो रात्रिस्तथा कृष्णः षण्मा ४४
सा दक्षिणायनं। तत्र चांद्रमसं ज्योतिर्योगी प्राप्य निवर्तत इत्यत्र योगीति विशेषणात्स्मरणनिमित्ते चैते गती॥ गत्यनु
स्मरणाद्ब्रह्म चंद्रं वा गच्छति ध्रुवं। अननुस्मरतः काले स्मरणं प्राप्य वै गतिरित्यध्यात्मे॥४४॥ इति श्रीमद्ब्र० ब्र०
भा० श्रीमदा० चतुर्थाध्यायस्य द्वितीयः पादः॥ ॥४४॥ ॐ मार्गो गम्यश्चास्मिन्पादे उच्यते। ॐ अर्चिरादिना
तत्प्रथितेः ॐ॥१॥ नेर्चिषमभिसंभवंति अर्चिषोहरह्न आपूर्यमाणपक्षमित्यर्चिषः प्राथम्यं श्रूयते। यदा वै पुरुषो
ऽस्माल्लोकात्प्रैति स वायुमागच्छतीति वायोस्तत्रार्चिषः प्राग्गिरेवमथमा। द्वावेव मार्गौ प्रथितावर्चिरादिर्विपश्चितां। धू

मादिः कर्मिणां चैव सर्वं वेदविनिर्णयात् । अग्निर्ज्योतिरिति द्वेधैवार्चिषः संप्रतिष्ठितिः । अग्निं गत्वा ज्योतिरेति प्रथ
मं ब्रह्म सेव्रजन् । एकस्मिंस्तु पुरे संस्थो द्विरूपो स्तः सुतो महान् इति ब्रह्मतर्के ॥ ॐ वायुशब्दादविशेषविशेषाभ्यां
ॐ ॥ २ ॥ अर्चिषो वायुं गच्छतीति स वायुमागच्छतीति सामान्यवचनात् । स इतो गतो द्वितीयां गतिं वायुमागच्छति वायो
रह्नः आपूर्यमाणपक्षमिति विशेषवचनात् । ॐ तडितोऽधि वरुणः संबंधात् ॐ ॥ ३ ॥ मासेभ्यः संवत्सरं संवत्सरा
द्वरुणलोकं वरुणलोकात्प्रजापतिलोकमिति कौषीतकिश्रुतिः ॥ संवत्सरात्तडितमागच्छति तडितः प्रजापतिलोकमिति च
गोपवनश्रुतिः । तत्र तडितो वरुणं गच्छति तडिता ह्येते वरुणलोकस्तडिदुपरि मुक्तास्ययोराजन्ते तत्रासौ वरुणो यज्ञा
स्यान्ते विविंचती स्युपरि संबंधत्वश्रुतेः ॥ ॐ आतिवाहिकास्तल्लिंगात् ॐ ॥ ४ ॥ पूर्वोक्ताः स्यातिवाहिको वायुः पूर्वग
मनलिंगात् ॥ कुतः ॥ ॐ उभयव्यामोहात्तत्सिद्धेः ॐ ॥ ५ ॥ स वायुमागच्छतीति प्रथममुच्यते । उत्क्रांतो विद्वान्परमं लिंग
च्छति विद्युतमेवांतत उपगच्छति द्यौर्वा विद्युत्प्रसृतिं वायुमुपगम्यते नैव ब्रह्म गच्छंतीसंतेपि वायुगमनश्रुतेः पूर्वोक्ता आ
तिवाहिकः परो वेति व्यामोहे उत्तरे दिवस्पतिरिति विशेषणात्पूर्वेषामातिवाहिकस्यैव सिद्धेः ॥ ब्रह्मतर्के च । उत्क्रांतस्तु श
रीरात्स्वाद्गच्छत्यर्चिषमेव तु । ततो हि वायोः पुत्रं च यो सौ नाम्नातिवाहिकः ॥ ततो ह्नः पूर्वपक्षं चाप्युदक् संवत्सरं तथा
तडितं वरुणं चैव प्रजापं सूर्यमेव च । सोमं वैश्वानरं चेंद्रं ध्रुवं देवीं दिवं तथा । ततो वायुं परं प्राप्य तेनैति पुरुषोत्तम
मिति ॥ ५ ॥ ४ ॥ ५ ॥ ॐ वैद्युतेनैव ततस्तच्छ्रुतेः ॐ ॥ ६ ॥ प्रकारांतरेण तत्र तत्रोच्यमानत्वाद्वायोरपि पर . तो ब्रह्मणो वा

ब्र· गंतव्योस्तीतिनशंकनीयं। विद्युत्सतिनावायुनेव। सएनान्ब्रह्मगमयतीतिब्रह्मगमनश्रुतेः॥ विद्युत्सतिर्वायुरेवनयेद्ब्रह्म भा·
४ नचापरः। कुतोन्यस्यप्रवेच्छा किंस्वमृतेप्रार्थनायकमितिब्रह्मतंत्रे॥ ॐ कार्यंबादरिरस्यगत्युपपत्तेः ॐ॥ ७॥ सएना ३
न्ब्रह्मगमयतीतिकार्यंब्रह्मगमयतीतिबादरिर्मन्यते। इतोदेवान्परं ब्रह्मकः पुमान्प्राप्नुयात्क्वचित्॥ यद्यपिब्रह्मदृष्टिः
स्याद्ब्रह्मलोकमवाप्नुयादितिअध्यात्मवचनात्तस्यैवगत्युपपत्तेः॥ ॐ विशेषितत्वाच्च ॐ॥ ८॥ यदिह्वापरमसि
पश्यतिप्राप्नोतिब्रह्माणंचतुर्मुखंप्राप्नोतिब्रह्माणंचतुर्मुखमितिकौषारवश्रुतो॥ ॐ सामीप्यात्तुतद्व्यपदेशः ॐ॥ ९॥
७८ ब्रह्मविदाप्नोतिपरमितिव्यपदेशस्तुसमीपएवपरमस्मिप्राप्नोतीयेतदर्थएवकेद्दा॥ ॐ कार्यात्ययेतदध्यक्षेणसह त
तःपरमभिधानात् ॐ॥ १०॥ तेहब्रह्मलोकमभिप्रपद्यदेतद्द्वितीयतेअथसहब्रह्मणापरमभिगच्छतीतिसौपर्णश्रुतेः॥
महाप्रलयेतदध्यक्षेणब्रह्मणासहगच्छंति॥ ॐ स्मृतेश्च ॐ॥ ११॥ ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे। परस्यांते
परात्मानःप्रविशंतिपरंपदमितिच॥ ॐ परंजैमिनिर्मुख्यत्वात् ॐ॥ १२॥ ब्रह्मशब्दस्यतत्रैवमुख्यत्वात्परमेवब्रह्म
गमयतीतिजैमिनिर्मन्यते॥ ॐ॥ दर्शनाच्च ॐ॥ १३॥ दृष्टत्वाच्चपरब्रह्मणः॥ ॐ नचकार्येप्रतिपत्त्यभिसंधिः ॐ॥ १४॥ ७८
नहिकार्यप्रतिपत्तिःप्राप्नुवानीत्यभिसंधिश्च। यदुपास्तेपुमान्जीवन्प्राप्तुमभिवांछतियच्चपश्यतितत्सःसंस्तहा
प्नोतिमतेरन्वितिद्रूपात्॥ ॐ अप्रतीकालंबनान्नयतीतिबादरायणउभयथाचदोषात्तत्क्रतुश्च ॐ॥ १५॥ प्रती
कदेहउद्दिष्टाएषांतत्रैवदर्शनं। नतुव्याप्ततयाक्वापिप्रतीकालंबनास्तुते। अप्रतीकादेवतास्तुऋषीणांशतमेकंच
राज्ञांचशतमुद्दिष्टंगंधर्वाणांशतंतथा। एतेषिण्मारिकोव्यामे [illegible] दर्शनेस्येनतुकेचित्॥ अयोग्यदर्शनेयत्नाद्

शः पूर्वस्य चापि तु। अग्न्यातीकाश्रया ये हि ते यान्ति परमेव तु। स्वदेहे ब्रह्म दृष्ट्वैव गच्छेद् ... सद्यो हि ते। ब्रह्मणा सह सं
प्राप्ते संहारे परमं पदमिति गारुडवचनात् उभयत्रोक्तदोषाभावः प्रतीकालंबनानपरं नयति॥ स यथाकामो भवति तत्क्र
तुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यत इति श्रुतेश्च॥ अत्र कर्मोपासनमेवाभ्यां कार्यमयतीति भगव
न्मतं॥ ॐ विशेषं च दर्शयति ॐ॥१६॥ अन्तःप्रकाशा बहिःप्रकाशाः सर्वे प्रकाशादेवा वाव सर्वप्रकाशा ऋषयो न तःप्रका
शा मनुष्या एव बहिःप्रकाशा इति चतुर्वेदशिखायां॥ ॥ इति श्रीमद्० ब्र०सू०भा० श्रीमदानंद० चतुर्थाध्यायस्य तृ
तीयः पादः॥ ॥ श्री ॥ हरिः ॐ॥ ओगमाहास्मिन्नादे॥ ॐ संपद्याविर्भावः स्वेन शब्दात् ॐ॥१॥ स एवं विद्वेवं
मन्वान एवं पश्यन्नात्मानमभिसंपद्येते नात्मना यथाकामं सर्वान्कामाननुभवतीति सौपर्णश्रुतिः। परं ज्योतिरुपसंपद्य
स्वेन रूपेणाभिनिष्पद्यत इति च। एतं सेतुं तीर्त्वा अंधः सन्ननंधो भवतीति च। तत्र तरणं नाम तत्प्राप्त्येऽन्यतरणमेव। इ
मां घोरामशिवां नदीं तीर्त्वैतं सेतुमाप्य तेनैव सेतुना मोदते प्रमोदत आनंदी भवतीति मौद्गल्यश्रुतेः॥ ॥१॥ ॥ ॐ
मुक्तः प्रतिज्ञानात् ॐ॥२॥ मुक्त एवात्रोच्यते अहरहरेनमनुप्रविशति उपसंक्रमते च न तत्र मोदते न प्रमोदते न कामा
ननुभवति बद्धो द्वेष तदा भवति। अथ यदैनं मुक्तोऽनुविशति मोदते च प्रमोदते च कामांश्चैवानुभवतीति रुद्रश्रुतौ प्र
तिज्ञानात्॥ ॥२॥ ॥ ॐ आत्मा प्रकरणात् ॐ॥३॥ परं ज्योतिःशब्देन परमात्मैवोच्यते॥ तत्प्रकरणत्वात्॥ परं ज्योतिः
परं ब्रह्म परमात्मादिका गिरः। सर्वत्र हरिमेवैकं ब्रूयुर्नान्यं कथंचनेति ब्रह्मांडे॥ ॐ अविभागेन दृष्टत्वात् ॐ॥४॥ ये
भोगाः परमात्मना भुज्यंते त एव मुक्तैर्भुज्यंते॥ यानेवाहं शृणोमि यान्पश्यामि याञ्जिघ्रामि तानेवैते इदं शरीरं विमुच्यानु

ब्र० भवंतीति दृष्टत्वाच्चतुर्वेदशिखायां। भविष्यत्पुराणेच मुक्ताः प्राप्य परं विष्णुं तद्भोगान् लेशतः क्वचित्। बहिष्ठान् भुंजते भा०
४ नित्यं नानंदादीन् कथंचनेति॥ ॐ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॐ॥ ५॥ सर्वदेहपरित्यागेन मुक्ताः संतो ब्राह्मेण व ४
देहेन भोगान् भुंजत इति जैमिनिर्मन्यते। स वा एष ब्रह्मनिष्ठ इदं शरीरं मर्त्यमतिसृज्य ब्रह्माभिसंपद्य ब्रह्मणा पश्यति ब्रह्मणा शृ
णोति ब्रह्मणैवेदं सर्वमनुभवतीति माध्यंदिनायनश्रुतावुपन्यासात्। आदद्गेहं हरिरुत्तानहरिदृष्ट्यैव पश्यति। गच्छेच्च हरिपा
८९ देन मुक्तस्यैवास्थि निर्भेदेदिति स्मृतेः। गच्छामि विष्णुपादेन विष्णुदृष्ट्याच दर्शनं। इत्यादि पूर्वस्मरणान्मुक्तस्यैतादृ विष्यतीति
बहुलं त्रोक्तयुक्तेश्च॥ ॐ चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॐ॥ ६॥ चितिमात्रो देहो मुक्तानां पृथग्विद्यते तेन भुंजते। सर्व
वा एतदचिच्छरीरं सृज्य चिन्मात्र एवैष भवति। चिन्मात्र एवावतिष्ठते। तामेतां मुक्तिरित्याचक्षत इत्युद्दालकश्रुतेरौदालक्ला
दिर्यौडुलोमिर्मन्यते॥ ॐ एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॐ॥ ७॥ स वा एष एतस्मान्मर्त्याद्विमुक्त ८९
श्चिन्मात्रीभवत्यथ तेनैव रूपेणाभिपश्यत्यभिशृणोत्यभिमनुते भिविजानातीतामाहुर्मुक्तिरिति सौपर्णीश्रुतौ चिन्मात्रेणाप्यु
पन्यासाज्जैमिन्युक्तस्य च भावादुभयत्राप्यविरोधं बादरायणो मन्यते। नारायणाध्यात्मे च। स यदि हं परित्यज्य चितिमात्रात्म
ग्र देहिनः। चितिमात्रं द्रियाश्चैव प्रविश्य विष्णुमव्ययं। तदंगानुग्रहीतैश्च स्वांगैरेव प्रवर्तनं। कुर्वंति भुंजते भोगांस्तदंतर्बहि
रेव वा। यथेष्टं परिवर्तेत तस्यैवानुग्रहेणहेति॥ ॐ संकल्पादेव च तच्छ्रुतेः ॐ॥ ८॥ न तेषां भोगादिषु प्रयत्नापेक्षा। स यदि
पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठंतीत्यादिश्रुतेः॥ ॐ अत एव चानन्याधिपतिः ॐ॥ ९॥ स स्वसंक
ल्पादेव। परमोऽधिपतिस्तेषां विष्णुरेव न संशयः। ब्रह्मादिमानुषांतानां सर्वेषामविशेषतः। ततः प्राणादिनामांताः सर्वेऽपि प

तयः क्रमात्। आचार्यश्चैवसर्वेपियेज्ञानिसुप्रतिष्ठित। एतेष्वेयोन्यः पतिर्नैवमुक्तानां नात्रसंशय इतिवाराहे॥ ॐ अभावं
बादरिराह ह्येवं ॐ॥१०॥ चिन्मात्रं विनान्यो देहस्तेषां न विद्यत इतिबादरिः। अशरीरो वाव तदा ह्येष भवति अशरीरं वाव सं तं
न प्रियाप्रिये स्पृशतः। याभ्यां ह्येष उन्मथ्यत इत्येव कौण्डरव्यश्रुतावाह हि॥ ॐ भावं जैमिनिर्विकल्पामननात् ॐ॥११॥
स वा एष एवं विसरमक्षिपश्यत्स अक्षिशृणोति ज्योतिषैव रूपेण चिन्तावाचिन्तावा नियेन वा नियेन वा थानं दीप्येष भवति। नाना
नंदं किंचिदुपस्पृशतीसोद्वाब्क श्रुतौ विकल्पामननात्॥ अन्यदेहस्याप्यभावं जैमिनिर्मन्यते॥ ॐ द्वादशाहवदुभयवि
धं बादरायणोतः ॐ॥१२॥ यथा द्वादशाहः क्रतुसकः सत्रात्मकश्च भवति। एवं मुक्तभोगो बाह्यशरीरकृतश्चिन्मात्र
कृतश्च भवतीति बादरायणो मन्यते उपपत्तिश्च॥ ॐ तन्वभावे संध्यवदुपपत्तेः ॐ॥१३॥ संध्यं स्वप्नः संध्यं तृतीयं स्व
प्नस्थानमिति श्रुतेः॥ ॐ भावे जाग्रद्वत् ॐ॥१४॥ ब्रह्मवैवर्ते च। स्वप्नस्थानो यथा भोगो विना देहेन युज्यते॥ एवं मुक्ताव
पि भवेद्विना देहेन भोजनं। स्वेच्छया वा शरीराणि तेजोरूपाणि कानिचित्। स्वीकृत्य जागरितवद्भुंक्ते भोगः कदाचने
ति॥ ॐ प्रदीपवदावेशस्तथा हि दर्शयति ॐ॥१५॥ शरीरमनुविश्यापि तत्सुकाशयंतः पुण्यानेव भोगाननुभवंति न दुःखा
३० दीन्। यथा प्रदीपो दीपिकादिषु प्रविष्टस्तत्स्थं तैलाद्येव भुंक्ते न तु तत्काष्ठादि। तीर्णो हि तदा सर्वांछोकान्हृदयस्यैव भ
वतीति दर्शयति। न च स्वर्गे लोके न भयं किंचनास्तीत्यादिना स्वर्गादिस्थस्यैतदिति वाच्यं। यतः॥ ॐ स्वाप्ययसंपत्त्योरन्य
तरापेक्षमाविष्कृतं हि ॐ॥१६॥ सुषुप्तौ मोक्षे वा तदुच्यते। अत्र पिता पिता भवति अनन्वागतं पुण्येनानन्वागतं पापेने त्या
विष्कृतत्वात्। ब्रह्मतर्के च। जोतिर्मयेषु देहेषु स्वेच्छया विश्रमो क्षिणः॥ भुंजते सुसुखान्येव न दुःखादीन्कदाचन

ब्र॰ तीर्णा हि सर्वशोकांस्ते पुण्यपापादिवर्जिताः॥ सर्वदोषविनिर्मुक्तास्ते गुणमात्रस्वरूपिण इति॥ ॐ जगद्व्यापारवर्जं भा॰
९ सर्वान्कामानाप्त्वामृतः समभवदित्युच्यते। तत्र सृष्ट्यादिष्वो न्यानाप्नोति कुतः॥ ॐ प्रकरणादसंनिहितत्वाच्च ॐ॥ १८॥ ९
जीवप्रकरणत्वाज्जीवानां नादृक् सामर्थ्यविदूरत्वाच्च। वाराहे च। स्वाधिकारानंदसंप्राप्तौ सृष्ट्यादिव्यापृतिष्वपि॥
मुक्तानां नैव कामः स्यादन्यान्कामांस्तु भुंजते। न चैश्यतानेव तेषां कदाचित्क्वापि विद्यते। न चायोग्यं विमुक्तोपि प्राप्नु
८० यान्न च कामयेदिति॥ ॐ प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमंडलस्थोक्तेः ॐ॥ १९॥ नायो वेदसर्वेद्ब्रह्म सर्वेऽस्मै
देवा बलिमावहंतीति प्रत्यक्षोपदेशाज्जगदैश्वर्यमप्यस्तीति चेन्न॥ आधिकमंडलाधिपतिर्ब्रह्मा हितत्रोच्यते। गारुडे
च। आलये च परं देवमुपाश्रयहरिमव्ययं केचिदत्रैव मुच्यंते नोत्क्रामंति कदाचन॥ अत्रैव च स्थितिस्तेषामंतरिक्षे
च केचन। केचित्स्वर्गे महर्लोके जने तपसि चापरे। केचित्सत्ये महाज्ञाना गच्छंति क्षीरसागरं। तत्रापि क्रमयोगेन॥
ज्ञानाधिक्यात्समीपगाः॥ सालोक्यं च सरूपत्वं सामीप्यं योग एव च। इमामारभ्य सर्वत्र यावत्स्युः क्षीरसागरे। पुरुषो ८०
नंतशयनः श्रीमान्नारायणाभिदः॥ मानुषा वर्णभेदेन तथैवाश्रमभेदतः॥ क्षितिपा मनुष्यगंधर्वा देवाश्च पितर
श्चिराः। आजानजाः कर्मजाश्च तात्विकाश्च शचीपतिः। रुद्रो ब्रह्मेति क्रमशस्तेषूच्चे वोत्तमोत्तमाः॥ निसानंदे च
भोगे च ज्ञाने ऐश्वर्यगुणेषु च। सर्वे शतगुणोद्रिक्ताः पूर्वस्मादुत्तरोत्तरं। पूज्यं ते चावरैस्ते तु सर्वपूज्यश्चतुर्मुखः॥
स्वजगद्व्यापृतिस्तेषां पूर्ववत्समुदीरिता॥ सयुजः परमात्मानं प्रविश्य च बहिर्गताः॥ चिद्रूपान्भोगांश्चापि

81

विना भोगं स्तु कांश्चन ॥ श्रुतं अतो मुक्तिरेवं तो विस्पष्टं समुदाहृतेति ॥ ॐ विकारावर्त्ति च तथा हि दर्शयति ॐ ॥ २० ॥ वि
कारावर्त्ति व्यापारो मुक्तानां न विद्यते ॥ इमं मानवमावर्त्तं नावर्त्तत इति हि श्रुतिः ॥ वाराहे च ॥ स्वाधिकारेण वर्त्तंते देवा मु
क्तावपि स्फुटं ॥ बर्हिर्हरंति मुक्ता य विरिंचाय च पूर्ववत् ॥ सब्रह्मकास्तु ते देवा विष्णावेव च विशेषतः ॥ न विकारा
धिकारस्तु मुक्तानामन्य एव तु ॥ विकाराधिकृता ज्ञेया ये नियुक्तास्तु विष्णुनेति ॥ ॐ स्थितिमाह दर्शयतश्चैवं प्रत्य
क्षानुमाने ॐ ॥ २१ ॥ एतत्साम गायन्नास्त इत्युच्यते । तत्रानंदादीनां वृद्धिह्रासश्च विद्यते ॥ एकप्रकारेणैव सदा स्थि
तिः । स एष एतस्मिन् ब्रह्मणि संपन्नो न जायते न म्रियते न हीयते न वर्धते ॥ स्थित एव तदा भवति दर्शनेवास्यानं
तस्यैवं दर्शयतो नापत्तिर्न विपत्तिरित्याह जाबालश्रुतौ । यत्र गत्वा न म्रियते यत्र गत्वा न जायते । न हीयते यत्र
गत्वा यत्र गत्वा न वर्धत इति मोक्षधर्मे विद्वत्प्रत्यक्षात्कारणाभावलिंगाच्च ॥ ब्रह्मवैवर्त्ते च ॥ न ह्रासो न च वृद्धि
र्विमुक्तानां विद्यते क्वचित् ॥ विद्वत्प्रत्यक्षसिद्धत्वात्कारणाभावतोनुमा ॥ रूपासना चात्र सदैव सुखरूपि
णी । न तु साधनभूता सा सिद्धिरेवात्र सा यत इति ॥ ॐ भोगमात्रसाम्यलिंगाच्च ॐ ॥ २२ ॥ न च भोगविशेषादि
विरोधः । एतमानंदमयमात्मानमनुविश्य न जायते न म्रियते न ह्रसते न वर्धते यथाकामं चरति यथाकामं पि
बति यथाकामं रमते ॥ यथाकाममुपरमत इति भोगमात्रसाम्यलिंगात् ॥ अवृद्धिह्रासरूपत्वं मुक्तानां प्रायिकं
भवेत् ॥ कादाचित्कविशेषस्तु नैव तेषां निषिध्यत इति कौर्मे ॥ प्रवाहतस्तु वृद्धिर्वा ह्रासो वा नैव कुत्रचित् ॥

ब्र॰ नाप्रियं किंचिदपि तु मुक्तानां विद्यते क्वचित्। कुत एव तु दुःखं स्यात् सुखमेव सदोदितं। भोगानां तु विशेषे तु वै सू॰
चित्र्यं लभ्यते क्वचिदिति नारायणतंत्रे॥ ॐ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॐ॥ २२॥ न च पुनरावर्तते भा॰
न च पुनरावर्तते सर्वान्कामानाप्त्वामृतः समभवदमृतः समभवदित्यादिश्रुतिभ्यः॥ ८८ ॥ ज्ञानानंदादिभिः स
र्वैर्गुणैः पूर्णाय विष्णवे। नमोस्तु गुरवे नित्यं सर्वथातिप्रियाय मे॥ १॥ यस्य त्रीण्युदितानि वेदवचने रूपा=
णि दिव्यान्यलं बट् तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत्। वायो रामवचोनयं प्रथमकं पृक्षो द्वि
८१ तीयं वपुर्मध्वो यत्तु तृतीयकं कृतमिदं भाष्यं हरौ तेन हि॥ २॥ नित्यानंदो हरिः पूर्णो नित्यदा प्रियतां मम
नमस्तस्मै नमस्तस्मै नमस्तस्मै च विष्णवे॥ ३॥ ॥ इति श्रीमदानंदकृष्णद्वैपायनकृतब्रह्मसूत्र ८१
भाष्ये श्रीमदानंदतीर्थभगवत्पादविरचिते चतुर्थाध्यायस्य चतुर्थः पादः॥ ॥ श्रीमद्वायुह
नुमद्भीममध्वांतर्गतनृसिंहरामवेदव्यासात्मक श्रीकृष्णार्पणमस्तु॥ ॥ श्री ॥ श्री ॥ श्री ॥
यदक्षरपदभ्रष्टं मात्राहीनं तु यद्भवेत्। तत्सर्वं क्षम्यतां देव नारायण नमोस्तु ते॥ ॥ ॥
भौंसेकर रामेन लिखितं॥ श्रीनिवासार्पणमस्तु। यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया।

82

83

34

॥श्रीब्रंह्मसूत्रभाष्यलेखन॥

॥प्रारंभ॥ ॥ श्री॥ श्रीरस्तु॥